पञ्चैकादशगुणान्द्विवगतो ।

२१ नाडित्वंगग. २२. °तिथयोऽब्दान्विताः. स्त्र्याग्नीदुहृदया° २३. मध्यतः. चारक्रकुर्यात् २४ विक्षेपांशकान्. गतितोऽथा° २५. ततो चक्रं शीघ्राद्यनाष° २६ समर्तत्य. गतिचारादिना क्रमं. २७ चत्वारिंशशिनुमष्टयमा° प्रथमगतो. °मीनद्वाशि° २८ °गुणान्द्वियतगो

सहितास्वरैकपक्ष-
र्तुचंद्रशीतांशुभिःक्रमशः ॥ २८ ॥
ऋषवृश्चिकाजवापे-
षुवक्रेषु षड्सप्तकेनवभागं ।
विकृतेनदिनगतिवक्री-
दिनषष्ट्यषोडशानुगतिः ॥ २९ ॥
गोमिथुनतौलिकन्या-
नुवासनैः स्तरानांशान् ।
खकृतैर्दशचिषष्टी-
सप्तदशयथाक्रमंवक्राशा ॥ ३० ॥
कर्कटसिंहयोर्वै-
दसागरैःसप्तसप्तखार्णवैश्चदिवसान् ।
षट्षाष्ट्याष्टादश च
क्रामाकुजोवक्रपूर्वासु ॥ ३१ ॥
घटमृगयोर्यमदहनैः
षड्भागानववह्नताशनैरेवव
मुनिविषयैःपंचदशां
शकांश्चतद्वत्ययेप्यारः ॥ ३२ ॥
वक्रेदिनचिभागै-
र्नवांशयुततुल्यजिनैर्भुक्तैः ॥
अतिवक्रे विपरीतं
वक्रमनुवक्रगस्त्र्यंशं ॥ ३३ ॥
एकेंद्रियवसुशिवमनु-
भवचिवर्गैतुपक्षशंयुक्तं
शीघ्रगतौपंचाष्टक-
मूनंचशशांककृतवेदैः ॥ ३४ ॥
षड्विंशस्तंयुक्ता
द्विकलाङ्कार्काचिवर्गगणशून्यैः ।
दिवसाः सप्तमगत्यां
चावोयच्चदृष्टम्यां ॥ ३५ ॥ भौमः ॥

सहिताः स्वरैकपक्ष-
र्तुचन्द्रशीतांशुभिः क्रमशः ॥ २८ ॥?
ऋषवृश्चिकाजचापे
वक्रे षट्सप्तकेन नवभागान् ।
द्विकृतेन नगान् वक्रो
दिनषष्ट्या षोडशानुगतिः ॥ २९ ॥
गोमिथुनतौलिकन्या-
स्वब्धिसमुद्रैः स्वरानंशान् ।
खकृतैर्दश चिषष्ट्या
सप्तदश यथाक्रमं वक्रात् ॥ ३० ॥
कर्कटसिंहकयोर्वै-
दसागरैः सप्त खार्णवैर्दिवसैः ।
षट् षष्ट्याष्टादश च
क्रमात् कुजो वक्रपूर्वासु ॥ ३१ ॥
घटमृगयोर्यमदहनैः
षड् भागान् नवहुताशनैश्च नव ।
मुनिविषयैः पञ्चदशां-
शकांश्च तद्वत्ययेऽप्यारः ॥ ३२ ॥
वक्रे दिनचिभागै-
र्नवांशयुततुल्यजिनैर्भुक्तैः ।
अतिवक्रे विपरीतं
वक्रमनुवक्रगस्त्र्यंशम् ॥ ३३ ॥?
एकेन्द्रियवसुशिवमनु-
भवचिवर्गं तु पक्षसंयुक्तम् ।
शीघ्रगतौ पञ्चाष्टक-
मूनं च शशाङ्ककृतवेदैः ॥ ३४ ॥
षट्त्रिंशत्संयुक्ता
द्व्यनलाङ्कार्कचिवर्गगुणशून्यैः ।
दिवसाः सप्तमगत्यां
चारो यस्तद्वदृष्टम्याम् ॥ ३५ ॥

---

२९ ऋषवृश्चिकाजचापाजेषु. षष्टसप्तकेन. नवभागा. ३०. तौलिकं. क्रमचक्रात् ३१. सप्तखर्णवैश्च° षट्षष्ट्याष्टादश वक्रमानकुजो ३२. °नवबृहताशनैरेवचमुनि° ३३ तुल्यजिनैर्भुक्ते °रीतंव-हुमनुगस्त्र्यंशं. ३४. भवचिवर्गैनुपक्षसंयुक्तं. शशांक तत्त° ३५. °द्विफलाङ्कार्का °चारोयतद्वदृष्टम्यां.

दद्यासप्तचतुष्कान्
द्युगणेऽयशश्चवसुगुणोभागः ।
मुनि[यम]नवकैरपिरो-
हितस्यमेद्यादिनाष्टांशाः ॥ ३६ ॥

कृत्वाचतुर्भिरुदयान्नाड्यः
शोध्यादुधस्यदिवसेभ्यः ।
चिदशयमघ्नानुदयान्ना
मार्णवर्वर्जितांश्छिद्यात् ॥ ३७ ॥

नववसुयममध्यमधोः
साक्रमानुदशैश्च-
पंचयुतैस्त्रिंशद्भि
स्त्रिंशद्भक्त स्फुटानंशान् ॥ ३८ ॥

नवकृत्यात् षष्टिर्वसु
युतावशीत्याशतं सतीक्ष्णांशोः ।
सर्वैस्त्रिभिर भ्यधिके
स्त्रिंशद्भिस्त्रिंशदेवार्कात् ॥ ३९ ॥

चतुरधिकेनशतेन
चिभिरूनंशतमतोर्धसंयुतया ।
षड्विंशत्याऽधिकां
विंशतिमेवंस्फुटःसौम्यः ॥ ४० ॥

अनयोर्विश्लेषांशादिवसेभ्यःशोधयेस्फुटाभ्यधिके
वतुरधिकेपंचशतेन चिरूनं शतमतोर्द्धसंयुतया ।
षड्विंशत्याऽधिकां धिशतिरेवंस्फुटःसौम्यः
अधिकेतुमध्यमेस्याद धाच्चारस्फुटबुधाच्च ॥ ४१ ॥

मेषेदिनषड्कृत्यांशंभव
स्वरसप्रहीनयाभागः ।
पंचविंशद्विकृतिचि
सप्तकंषट्गवेवगणितं ॥ ४२ ॥

गाव वेदेयमद्विकृतेा-
द्विघ्नेर्विषयग्निगणनवाभ्यधिकेः ।

दद्यात् सप्तचतुष्कान्
द्युगणे चांशं च वसुगुणो भागः ।
मुनियमनवकैरपि रो-
हिणस्य वेदा दिनाष्टांशाः ॥ ३६ ॥

हृत्वा चतुर्भिरुदयान्
नाड्यः शोध्या बुधस्य दिवसेभ्यः ।
चिदिवसपघ्नानुदयान्
रामार्णवर्वर्जितान् छिंद्यात् ॥ ३७ ॥

नववसुरामैर्मध्यं
शेषैरष्टांशकान् क्रमाद्रसैश्च ।
पञ्चयुतैस्त्रिंशद्भि-
स्त्रिंशद् भुक्ते स्फुटानंशान् ॥ ३८ ॥

नवकृत्या षष्टिं वसु-
युतयाऽशीत्या शतं स तीक्ष्णांशून् ।
शर्वैस्त्रिभिरभ्यधिके-
स्त्रिंशद्भिस्त्रिंशदेवांशान् ॥ ३९ ॥

चतुरधिकेन शतेन
चिभिरूनं शतमतोऽर्धसंयुतया ।
षड्विंशत्या चाधिकां
विंशतिमेवं स्फुटः सौम्यः ॥ ४० ॥

अनयोर्विश्लेषांशान्
दिवसेभ्यः शोधयेत् स्फुटाभ्यधिके च ।
अधिके तु मध्यमेऽशान्
दद्याच्चारः स्फुटबुधाच्च ॥ ४१ ॥

मेषे दिनषट्कृत्या
सभुवा स्वरसप्रहीनया भागान् ।
पञ्चविंशद् द्विकृति-
चिसप्तकं षट्कृमिषुगुणितम् ॥ ४२ ॥

गवि वेदयमद्विकृते-
र्दिग्घ्नैर्विषयाग्निगुणनवाभ्यधिकैः ।

---

३६. दद्यात्सप्तचतुष्कान् °गुण- भागः ३७. °द्वादशांशमाणव° ३८ नववसुमध्यममध्यमधोः शाक्रमाहृत° षष्ट्यं-शत्या ४१ शोधयेत् स्फु° ४२. दिनषड्वसाभ्यं° °सप्तकं षटुयर्गाणतमाव. ४३. वेदयमद्वि ततो° °त्रिरसंयुता° °व्यैकां.

विरसंशताधंममलो-
रुद्रावयसप्रभिर्व्येका ॥ ४३ ॥
द्विदशंसपंचवर्गं
खरसचिघनान्वितंचमिथुनंच ।
भागार्धशतं ह्यून-
मुनयस्त्रिघनंपवसुतश्च ॥ ४४ ॥
कर्कीनिदिघ्नैः कृतशशि-
गुणवेदैः सद्विकाष्टशून्यरसैः ।
सैकांदलितांसेंदु-
पंच[क]वर्गान्वितांश्चांशान् ॥ ४५ ॥
सिंहेगुणेंदुरामा-
र्णवैर्दिग्घ्नैस्तथासार्णवर्तुयमविषयाः ।
तुल्यासप्तविहीनां
सदृशांमधिकांविषयकृत्या ॥ ४६ ॥
कन्यायामुकृत्या-
ष्टचिंशतयातयानभूयः ।
त्रिघननवपंचसप्ता-
ष्टकदशशतार्धचरवियुक्तं ॥ ४७ ॥
विंशतिरेकेणयुता-
व्यनखांसांतिथित्रिसंगुणैश्च ।
अंशास्त्रिवसुविहीना
द्येकत्रिंशद्युताश्चैव ॥ ४८ ॥
अलिनिदशघ्नीशशिकृत-
दहनाः षड्वस्वशर्णवाष्टयुताः ।
तेशायममुनीशोना
षड्विंशत्यासमेनाव ॥ ४९ ॥
थर्न्वि[नि]दिचसाथाष्टौ
षोडसषड्सप्तकंदशोनंव ।
तेस्फुः शशिविषयोनैः
सैकाच्यंशान्विताभागाः ॥ ५० ॥

विरसं शतार्द्धममरै-
रुद्रैरथ सप्तभिर्हीनम् ॥ ४३ ॥
द्विदश सपञ्चवर्गं
खरसत्रिघनान्वितं च मिथुने च ।
भागार्द्धशतं ह्यूनं
मुनयस्त्रिघनं च पञ्चवसु ॥ ४४ ॥
कर्कीणि दिग्घ्नैः कृतशशि-
गुणवेदैः सद्विकाष्टशून्यरसैः ।
सैकान् दलितान् सेन्दून्
पञ्चकवर्गान्वितांश्चांशान् ॥ ४५ ॥
सिंहे गुणेन्दुरामा-
र्णवदिग्घ्नैः सार्णवर्तुयमविषयैः ।
तुल्यां सप्तविहीनां
सदृशां च्यधिकां विषयकृत्या ॥ ४६ ॥
कन्यायामुत्कृत्या-
ष्टचिंशता तया तयाऽच भूयः ।
त्रिघननवपञ्चसप्ता-
ष्टकं शतार्द्धं च रवियुक्तम् ॥ ४७ ॥
विंशतिरेकेन युता
हीना खाशाग्निभिर्द्विसङ्गुणाश्च ।
अंशास्त्रिवसुविहीना
ह्येकत्रिंशद्युताश्चैव ॥ ४८ ॥
अलिनि दशघ्नाः शशिकृत-
दहनयुगा वसुशरार्णवाष्टयुताः ।
तेऽशा यममुनीशेन
षड्विंशत्या समेताश्च ॥ ४९ ॥
धन्विनि दिवसार्थाष्टौ
षोडश षट्सप्तकं दशोनं च ।
ते स्युः शशिविषयोनाः
सैकास्त्र्यंशान्विता भागाः ॥ ५० ॥

४४ °घनपचसु. ४५.४६ श्लोकयोस्त्रुटिरस्ति तथा ४७ श्लोकस्य, 'सप्ताष्टकदशशतार्धरवियुक्तं' इति वाक्यं विहाय. ४८ °तिथित्रिसंगुणैश्च. विहीनायक. ४९. दशघ्नाशशिकृतदहनाः षट् स्वरार्णवा° समेनाच. ५० दिवसायाष्टौ षोडशषट्सप्तकं दशोनं च. सैकात्रिंशान्वि°

मकरेद्युदशंखयुतं
मुनिहीनं धृतिदिवाकराभ्यधिकं ।
अशारूपेणोना:
सैकैकाश्चोत्कृतियुताश्च ॥ ५१ ॥

कुंभेहूांचिंशत्या-
युतयाद्गतभुग्दिवेददिननाथे: ।
द्वार्विंशतिरंशा: पं-
चवर्गमथाधिकाषष्टि: ॥ ५२ ॥

मीनेच्यष्टकमहूां
शशिविषययुतंद्गताशसशरं ।
च्यष्टककृतिर्विंशत्या-
शतार्धमेकोनमष्टां स्यु: ॥ ५३ ॥

अष्टोदयांतरांशान्
बुधस्यकलांशकास्त्रिगन्युनात् ।
दिवसाश्चतुर्थगत्या
अनुवक्रमजमीनयोन्दं ॥ ५४ ॥

गतिविश्लेषकृतिघ्ने-
रंशैर्गतवर्गभाजितैर्लब्धं ।
हित्वाराशिभ्योभु-
क्तं प्रथमगतौवक्रषश्चाश्चा ॥ ५५ ॥

वर्गैक्रगतौ पूर्वार्धे-
तृतीयगत्याचयात्कृतं गुणितै: ।
भागैर्गतिकृतिभक्तै:
फलमनुपाताश्चतुर्थभागागनौ ॥ ५६ ॥

ज्याविधिविक्षेपघ्ना-
चरकालादंबराष्टवेदांशं
जह्यात्क्षिपेच्चयान्मो-
त्तरंग्रहेस्वंयथाकक्षं ॥ ५७ ॥

एवंकृतेग्रहार्कां
तरांशकैरस्तदर्शनंतेषां ।

मकरे द्विदशं खयुतं
मुनिहीनं धृतिदिवाकराभ्यधिकम् ।
अंशा रूपेणोना:
सैकैकाश्चोत्कृतियुताश्च ॥ ५१ ॥

कुम्भेऽहां विंशत्या
युतया हुतभुग्द्विवेददिननाथे: ।
द्वार्विंशतिरंशा: प-
ञ्चवर्गमर्थाब्धिका: षष्टि: ॥ ५२ ॥

मीने च्यष्टकमहूां
शशिविषययुतं हुताशसंयुक्तम् ।
च्यष्टककृतिर्विंशत्या
शतार्द्धमेकोनमंशा: स्यु: ॥ ५३ ॥

अर्कोदयान्तरांशान्
बुधस्य कालांशकांस्त्रिगत्यूनान् ।
दिवसाश्चतुर्थगत्या
अनुवक्रमजमीनयोर्मन्दम् ॥ ५४ ॥?

गतिविश्लेषकृतिघ्ने-
रंशैर्गतवर्गभाजितैर्लब्धम् ।
हित्वा राशिभ्यो भु-
क्तं प्रथमगतौ वक्रपश्चाच्च ॥ ५५ ॥?

वक्रगतौ पूर्वार्द्धे
तृतीयगत्या च यत्कृतं गुणितम् ।
भागैर्गतकृतिभक्तै:
फलमनुपाताच्चतुर्थगतौ ॥ ५६ ॥?

ज्याविधिविक्षेपघ्ना-
श्चरकालादम्बराष्टवेदांशम् ।
जह्यात् क्षिपेच्च याम्यो-
त्तरे ग्रहे स्वे यथाकक्षम् ॥ ५७ ॥

एवं कृते ग्रहार्का-
न्तरांशकैरस्तदर्शनं तेषाम् ।

५१ आशारूपे° °श्चोत्कृति° ५२. कुंभेहूां ५३. °युतं हुताशशीरं ५४ °तरांशा. °शकांस्त्रिगन्यूनान् °मीनयोर्मंदं ५५ प्रथमगतौ वक्रपश्चाच्चा. ५६. चक्रगतौ °गत्याचयाचतक्षतगु° भागैर्गतिकृतिभक्तैर्फलमनुपाश्चचतुर्थभागगतौ. ५७ °ग्राचरकादि. चराष्ट° जह्यात् क्षिपेच्च याम्योंतरे

चंद्रादीनांद्वादश-
मनुरविंतिथ्यष्टतिथिसंज्ञैः ॥ ५८ ॥
विंशतिविनाडीगुणिते
घटशनाडीप्रमाणहृतैः ।
लब्ध्यांशकप्रमाणा-
दुदयेास्तं वा स्फुटं वाच्यं ॥ ५९ ॥
ज्ञसितारेज्यार्कोना-
शशिनः प्रत्युत्तरं स्वरांशोना ।
ज्ञात्वैवं विद्वेषा-
दादेशमनागतंकुर्यात् ॥ ६० ॥
आवंत्यकः समासा-
च्छिष्यहितार्थंतमद्यस्फुटांकसमं ।
चक्रेवराहमिहर-
स्तारायहकारिकातंत्रं ॥ ६१ ॥
प्रद्युम्नभूमितनये-
जीवे शौरथवावीजयनंदिकृते ।
बुधेवनग्ना-
स्फुटमिदं करणं भजतां ॥ ६२ ॥
दृष्टं वराहमिहरेणसुखप्रबोधं
... ...
... ...
... ... ॥ ६३ ॥
प्रस्तावेपिनदोषा
जानन्नापिनवक्ति यः पटोज्ञस्य ।
प्रथयतिगुणाश्चतस्मै
सुजनयानमपरहिताय ॥ ६४ ॥
अष्टादशभिर्बद्धा-
न्यातारायहतंत्रमेतदार्याभिः ।
वराहमिहवराहमिहिरो
ददातिनिर्मत्सरः करणं ॥ ६५ ॥

चन्द्रादीनां द्वादश-
मनुरविंतिथ्यष्टतिथिसंज्ञैः ॥ ५८ ॥
विंशतिविनाडीगुणिते-
रुदयविनाडीप्रमाणहृतैः ।
लब्ध्यांशकप्रमाणा-
दुदयेाऽस्तं वा स्फुटं वाच्यम् ॥ ५९ ॥
ज्ञसितारेज्यार्कोनाः
शशिनः प्रत्युत्तरं खगांशेन ।
ज्ञात्वैवं विद्वेषा-
दादेशमनागतं कुर्यात् ॥ ६० ॥
आवन्त्यकः समासा-
च्छिष्यहितार्थं ततः स्फुटाङ्कसमम् ।
चक्रे वराहमिहर-
स्तारायहकारिकातन्त्रम् ॥ ६१ ॥
प्रद्युम्नभूमितनये
जीवे सौरेऽथ विजयनन्दिकृते ।
बुधे च भग्नोत्साहः
प्रस्फुटमिदं करणं भजतात् ॥ ६२ ॥
दृष्टं वराहमिहरेण सुखप्रबोधं
... ...
... ...
... ... ॥ ६३ ॥
प्रस्तावेऽपि न दोषान्
जानन्नपि वक्ति यः परोज्ञस्य ।
प्रथयति गुणांश्च तस्मै
सुजनाय नमः परहिताय ॥ ६४ ॥
अष्टादशभिर्बद्धा-
न्यातारायहतन्त्रमेतदार्याभिः ।?
वरमिति वराहमिहरो
ददाति निर्मत्सरः करणम् ॥ ६५ ॥

५८ °रविंतिष्टतिथिसंज्ञैः ५९ गुणितैश्च ६० ज्ञसितारें° °मनागमतत्कुर्यात् ६१ आर्यंतकः समासाः छिसंध्यं ६२ प्रद्युम्नभूमितनये जीवे सौरेयवाविजयनन्दिकृतेोक्षुधेचभग्ना स्फुट° ६३. °प्रबोधाम् ६४ दोषाज्ञानानापि. गुणास्तस्मै सुजनथातमः पर°

आकरणाद्रविभागा
दिवसाश्चारांशकारवौकार्याः ।
अधिकार्यदादितेभ्ये-
भागाज्ञेयास्तदाचक्रात् ॥ ६६ ॥
नवयमगुणार्नुहीना
कृताहृतेविषयसप्तखाग्निहृते ।
भूयोहृतेचतुर्भि-
र्विरंसदिवसामहीजस्य ॥ ६७ ॥
षड्वित्सवैस्तिथ्यूनो
दृष्टावसुधृतिरंशकाच्छष्टिः ।
अष्टशतेनवषष्टिः
सप्तत्याह्यधिकया नवतिः ॥ ६८ ॥
षष्ठ्योष्टयुक्तयासंत-
दलंचखाब्धिद्विकैः स्वरादिघ्राः ।
अस्तमितोतः सप्ता-
ष्टकेनतिथयोनिरंशगतिः ॥ ६९ ॥ कुजः ॥
त्रिंशच्छिवसुरसेंद्रा
नवनवगुणितेर्कैरागुणभक्ते ।
गुणकारहृतेलब्धा-
न्यहानिशीतांशुपुत्रस्य ॥ ७० ॥
दशभिर्द्वादशहीनाः
प्रागुदितोमनिभीरूनभश्चांशाः ।
धृतिभिः शनवोस्तमितः
त्रिंशद्विरुदेत्तिसरसाश्चः ॥ ७१ ॥
अष्टादभिः नव-
षोडभिश्चाष्टवर्जितोस्तमितः ।
पश्चात् वसुभिर्नवव
र्जितोनिरंसबुधोपियाति ॥ ७२ ॥ बुधः ॥
रहितेष्टद्वियमशराष्टिभि-
र्नागहृतेद्विविषयश्चराश्विहृते ।

आकरणाद्रविभागा
दिवसाश्चारांशका रवौ कार्याः ।
अधिका यदा दिनेभ्यो
भागा ज्ञेयास्तदा चक्रात् ॥ ६६ ॥
नवयमगुणार्तुहीने
कृताहृते विषयसप्तखाग्निहृते ।
भूयो हृते चतुर्भि-
र्निरंशदिवसा महीजस्य ॥ ६७ ॥
षड्वर्गैस्तिथ्यूनो
दृष्टो वसुधृतिभिरंशकाः षष्टिः ।
अष्टशतेन च षष्टिः
सप्तत्या ह्यधिकया नवतिः ॥ ६८ ॥
षष्ठ्याष्टयुक्तया शत-
दलं च खाब्धिद्विकैः स्वरा दिग्घाः ।
अस्तमितोऽतः सप्ता-
ष्टकेन तिथयो निरंशगतिः ॥ ६९ ॥
विंशशिवसुरसेन्द्रे
नवयमगुणितेऽर्करामगुणभक्ते ।
गुणकारहृते लब्धा-
न्यहानि शीतांशुपुत्रस्य ॥ ७० ॥
दशभिर्द्वादशहीनः
प्रागुदितो मनुभिरूनिताश्चाशाः ।
धृतिभिः सनवोऽस्तमित-
स्त्रिंशद्विरुदेति सरसांशः ॥ ७१ ॥
अष्टादशभिः सनवः
षोडशभिश्चाष्टवर्जितोऽस्तमितः ।
पश्चाद्वसुभिर्नवव-
र्जितो निरंशं बुधो याति ॥ ७२ ॥
रहितेऽष्टद्वियमशराष्टिभि-?
र्नागहृते द्विविषयस्वराश्विहृते ।

---

६६. °वसाश्चांशका° ६७. तमयमगुणार्तुहो° °तुर्भिश्चरं ६८. षड्विवैस्तिथ्यूना दुष्टो. °का षष्टिः ° सप्तत्यधि-
कया. ६९ षष्टोष्टयुक्तया सप्तदलं च खाब्धिद्विकैः °मितोतः साष्टकेन तिथयो निरङ्गशनिकुजः ७० विशाशवसु°
°नव्यान्य तांशु° ७१ दशभिर्द्वा° °दितोर्मनाभो° धृतिभिः नवो. ७२ अष्टादशभिः नवषोडशभि° निरंश° ७३. °विषयस्वच
दिवसा निरंशगम्याः

सप्तहृतेदेवगुरौ-
भवंति दिवसातिरांसंगम्याः ॥ ७३ ॥
सर्वैकात्संशोध्याः
षोडशभिर्द्वादशोदितः प्राक्
कृतविषयैः कृतवेदाः
सप्तत्यासार्णवाः षष्टिः ॥ ७४ ॥
नवदिग्भिः शून्यार्का-
ष्टाशीत्यारसस्वराद्याभिः ।
शून्यकृतिर्द्वाचिंश-
तोतुमस्तगाषोडशभिरर्कात्॥७५॥ जीवः ॥
नयनार्कमितिदुने-
द्विगुणेरूपेंद्रियैः स्वरैर्भक्ते ।
शेषः यत्तदलितं
भृगुतनयनिरंशदिवसाः स्युः ॥ ७६ ॥
विषयैर्नवकविहीनः
प्रागुदितस्तिथिरेकपमहीनः ।
वसुकृत्यातिथ्युन ।
कृताष्टिभिः स ॥ ७७ ॥
षष्ठा[ष्ट]केनसदृश
निरंसतोतोविलोमगः पश्चात् ।
उदयतितिथिनिरंशकालो-
नयतिवास्तंविनाथगतिः ॥ ७८ ॥ शुक्रः ॥
विधृतिशररसषट्कवर्कशशांके-
चिघ्रेधृतिरुद्रभाजितेग्निहृते ।
सौरस्यधृति[भि]रष्टाभि-
सार्धार्कहानिरुदितः प्राक् ॥ ७९ ॥
अष्टनवतिर्ज्यानवति-
र्दलंचमनुभिस्त्रयोदशविहीनः ।
गुणरुद्रैः शून्यार्का-
द्व्युनेन शतेनशशिनवकं ॥ ८० ॥

सप्तहृते देवगुरो-
र्भवन्ति दिवसा निरंशेभ्यः ॥ ७३ ॥
सर्वैऽर्कात् संशोध्याः
षोडशभिर्द्वादशोदितः प्राच्याम् ।
कृतविषयैः कृतवेदाः
सप्तत्या सार्णवा षष्टिः ॥ ७४ ॥
नवदिग्भिः शून्यार्का-
ऽष्टाशीत्या रसस्वराऽऽद्याभिः ।
शून्यकृतेर्द्वाचिंश-
त्ततोऽस्तगः षोडशभिरर्कान् ॥ ७५ ॥
नयनार्कमहीन्दूने
द्विगुणे रूपेन्द्रियेश्वरैर्भक्ते ।
शेषं यत्तद्विलितं
भृगुतनयनिरंशदिवसाः स्युः ॥ ७६ ॥
विषयैर्नवकविहीनः
प्रागुदितस्तिथिभिरेकयमहीनः ।
वसुकृत्या तिथ्यूनः
कृताष्टभिः सेषुरस्तगतः ॥ ७७ ॥
षष्ठाष्टकेन सदृश
निरंशगोऽतो विलोमगः पश्चात् ।
उदयति निरंशकाले-
न याति चास्तं विलोमगतिः ॥ ७८ ॥
विधृतिशररस (षट्कवर्क) शशाङ्के ?
चिघ्रे धृतिरुद्रभाजितेऽग्निहृते ।
सौरस्य धृतिभिरष्टिः
सार्द्धार्कहानिरुदितः प्राक् ॥ ७९ ॥
अष्टनवतिभिर्नवति-
र्दलं च मनुभिस्त्रयोदशविहीनः ।
गुणरुद्रैः शून्यार्का
द्व्यूनेन शतेन शशिनवकम् ॥ ८० ॥

७४ °दितः प्राक्कृतुवेदाः ७५ °रुमस्तगात् ७६ शेषं यत्कदलितं ७७ °नकृताष्टाभिः ७८ षष्ठाष्टकेन सदृश निरंशतातो वि° ७८. °ग्रकालो भवति वास्तं ७९. सार्धार्के

अतिजग ‘‘ रर्का
रस्तमेत्यंतोनवतिभिर्विरंशं ।
षोडशसार्धात्सौर
श्चरतिरचेः सर्वदाहीनः ॥८१॥ शनैश्चरः।

पौलिशसिद्धांतेताराग्रहाः ॥

इत्याचार्यवराहमिहरकृता पंचसिद्धांतिकासमाप्ता। संवत् १६७३ वर्षशाके १५३८ प्रवर्तमाने द्वितीयाश्विनशुदि २ बुधे अद्येहस्तंभतीर्थे वास्तव्यं। पंडितश्रीपीतांवरतत्सूनुः श्रीश्रीरंगतत्पुत्रः पंडितनानातत्तनयो पंडितगोविंदः तस्यात्मजेन शंकरेणेयं पञ्चसिद्धांन्तिका लिखिता। आत्मपठनार्थं तथा [परो]पकृतये च ॥ शुभं भवतु ॥

अतिजगतिभिरर्द्वार्का-
नस्तमेत्यतोऽतिधृतिभिर्निरंशम् ।
षोडश सार्द्धान् सौर-
श्चरति रवेः सर्वदा हीनः ॥ ८१ ॥

इति पौलिशसिद्धान्ते तारा-ग्रहा नामाष्टादशोऽध्यायः ॥

इति श्रीवराहमिहराचार्यकृता पञ्चसिद्धान्तिका समाप्ता ॥

८१ अतिजगतिभिर्द्वारस्तमेत्यन्तो नवतिभिर्निरंशम् षोडशसार्धा सौ°.—शनैश्चरः पौलिशसिद्धान्ते तारायहाः एवम् इत्या°

॥ श्रीः ॥

अथ पञ्चसिद्धान्तिकाटीका पञ्चसिद्धान्तिका-प्रकाशिकाख्या सुधाकरकृताऽऽरभ्यते ।

श्रीरामचन्द्राय नमः ।

दिनकरकुलकमलेनं श्रीरामं सीतया च सहितमहम् ।
स्मारं स्मारं सततं विवृणोमि वराहजं करणम् ॥
यन्त्यालाभाद्बहुधा स्खलितानि पदानि यानि धीमन्तः ।
स्वधिया बहूनि तेषां लिखितानि च शोधयन्त्वार्याः ॥

१. अथ ग्रन्थनिर्विघ्नसमाप्त्यर्थं मङ्गलं वितनोति ग्रन्थकारः । दिनकरवसिष्ठपूर्वानिति ।

अत्र यैराचार्यैर्ज्योतिःशास्त्रं विस्तृतं यैश्चाचार्येण ज्योतिःशास्त्रस्य ज्ञानं लब्धं तेषां प्रणमनं युक्तमेवेति तान् प्रणम्य स्वचिकीर्षितमग्रिमश्लोकेन कथयति ।

२. पूर्वाचार्यमतेभ्य इति ।

बीजं दृग्गणितैक्यार्थं संस्कारविशेषः । तदेव पूर्वाचार्यमतेभ्यः श्रेष्ठं रहस्यं गुप्तं च अविकलं समीचीनं यथा स्यात्तथाऽहं वक्तुं उद्यत इत्यन्वयः । बीजं किं स्वकल्पितमिति निराकरणाय पूर्वाचार्यमतेभ्य इत्यस्य प्रयोगः कृतः । अर्थात् पूर्वाचार्यमतेभ्य एव यद्-द्बीजं गुप्तं सिध्यति तत्तदेव वक्तुं मे प्रयास इत्याचार्यस्याशय इत्यन्यत्स्पष्टार्थम् ।

३. इदानीं केषां सिद्धान्तानां मतमत्र प्रतिपादयामीत्याह । पौलिशरोमकेति ।

अत्र सिद्धान्ताः पञ्च सन्ति, पौलिशकृत एको द्वितीयो रोमककृतस्तृतीयो वसिष्ठ-प्रतिपादितश्चतुर्थः सूर्यप्रकाशितः पञ्चमो ब्रह्मणा कथित इति । सूर्यारुणसंवादानुसारेण गर्गादिमुनिषु यज्ज्ञानं पुलिशेन महर्षिणा प्रोक्तं स पौलिशो यद् ब्रह्मशापाद्रोमकनगरोद्भूतेन सूर्येण रोमकाय यवनजातिषु प्रोक्तं स रोमको यद् वसिष्ठेन स्वपुत्राय पराशराय दत्तं स वासिष्ठो यत् सूर्येण मयदैत्यायादिष्टं स सौरो यच्च ब्रह्मणा स्वात्मजाय वसिष्ठाय दत्तं स च वैतामहः सिद्धान्तो जातस्तथा चारुणं प्रति सूर्यवाक्यम् ।

सूर्य उवाच ।

पैतामहं च सौरं च वासिष्ठं पौलिशं तथा ।
रोमकं चेति गणितं पञ्चकं परमाद्भुतम् ॥
वेदैः सह समुद्भूतं वेदचक्षुः सनातनम् ।
रहस्यं वेदमध्यस्थं स्मृतवान् यत् पितामहः ॥
तेन पैतामहं ज्ञानमाद्यं तच्छ्रुतिसंमतम् ।
तेन दत्तं स्वपुत्राय वसिष्ठाय महात्मने ॥
हिताय परया बुद्ध्या परमं ज्ञानमुत्तमम् ।
अंशावतारणे विष्णुर्यदा ब्रह्माणमादिशत् ॥
स्वनाभिकमलोद्भूतं वेदैः सह चतुर्मुखम् ।
ब्रह्मज्ञानमयं वेदमस्मै संदिश्य स प्रभुः ॥
मामप्यादिष्टवान् सृष्टिनिमित्तं कालसिद्धये ।
चक्षुर्भूतं तदा मह्यं संददौ ज्ञानमुत्तमम् ॥
तत्सौरमिति विख्यातं गणितं परमाद्भुतम् ।
तन्मयापि मयायैतत्तपसा तोषितेन च ॥
आदिष्टं परमं ज्ञानं शिष्यभूताय साधवे ।
वासिष्ठं च वसिष्ठेन पुत्राय प्रतिपादितम् ॥
पराशराय तेनाथ मुनिभ्यः सूत विस्तृतम् ।
पौलिशं पुलिशेनोक्तं गर्गादिमुनिषु ध्रुवम् ॥
रोमकं रोमकायोक्तं मया यवनजातिषु ।
जातेन ब्रह्मणः शापात्तथा दुर्यवनस्य च ॥
रोमके नगरे तच्च रोमकेण च विस्तृतम् ।
इति पञ्चपुराणानि गणितानि प्रचक्षते ॥

एतैस्तथा " दिनकरवसिष्ठपूर्वान् इत्याद्याचार्यमङ्गलेनेदमवगम्यते यत् प्रथमा रचना ब्रह्मणा ततो वसिष्ठेन ततः सूर्येण ततः पुलिशेन ततो रोमकेण कृता । अथ " रहस्यं वेदमध्यस्थं स्मृतवान् यत् पितामहः " इत्यादिना ब्रह्मणा तदेव ज्ञानं लब्धं यच्च वेदमध्यस्थमर्थाद्वेदाङ्गरूपमासीत्ततो वेदाङ्गरचनासमानासन्नकाल एव ब्रह्मसिद्धान्तरचनेति सिध्यति तज्ज्ञानं ब्रह्मणा स्वपुत्राय वसिष्ठाय दत्तं वसिष्ठेन च स्वनाम्ना जगति प्रकाशितं तेन प्रतीयते वसिष्ठसिद्धान्तस्य रचना ब्रह्मसिद्धान्तरचनानन्तरमल्पेनैव कालेनेति ज्ञायते च तत्तत्प्रकारस्थूलसूक्ष्मपर्यालोचनया च । सूर्यसिद्धान्तरचनाकालस्तु नित्यानन्देन सिद्धान्तराजकृता कलेः षट्त्रिंशच्छतमिते ऽब्दगणे व्यतीते निगद्यते । स कालस्तु आर्यभटकृतसिद्धान्तस्य प्रसिद्ध एव । तेन सूर्यसिद्धान्त आर्यभटकृतसिद्धान्तसमकालिक एव सिध्यति विभाति च तथ्यं

नित्यानन्दप्रतिपादितमार्यभटीयसिद्धान्ते न कुत्रापि सूर्यसिद्धान्तमतप्रतिपादनात् । साम्प्रतं प्रचलितः सूर्यसिद्धान्तः कृतयुगान्तकालिकस्तु केनचिदन्येन प्रकल्पितो नवीन इति स्फुटमेव सूक्ष्मविचारप्रवृत्तानां गणकानाम् ।

भारतवर्षे ऋषिप्रणीतानां सिद्धान्तानामेव प्रमाणं नान्येषां तेन भारतवर्षीयाश्चिरन्तना आचार्याः कमपि मुनिप्रणीतं सिद्धान्तं स्वीकृत्य तत्र बीजादिकं दत्त्वा स्वं स्वं सिद्धान्तं चक्रुर्यथा ब्रह्मगुप्तेन ब्रह्मसिद्धान्तं स्वीकृत्यात्मसिद्धान्तो विरचितः ।

(ब्रह्मोक्तं ग्रहगणितं महता कालेन यत्खिलीभूतम् । अभिधीयते स्फुटं तज्जिष्णुसुतब्रह्मगुप्तेन)

भास्कराचार्येणापि स एव ब्रह्मसिद्धान्तः स्वीकृत एवमन्येऽपि सूर्यसिद्धान्तादीन् स्वीकुर्वन्ति । तेन तत्तदाचार्यरचितसिद्धान्तान् तत्तत्स्वीकृतमुनिसिद्धान्तनाम्ना व्यवहरन्ति तत्तदुत्तरकालीना विद्वांसोऽत एव वदति वराहमिहिराचार्यः "पञ्चभ्यो द्वावादौ व्याख्यातौ लाटदेवेन" अर्थात् लाटाचार्येण द्वौ पौलिशरोमकसिद्धान्तौ व्याख्यातौ तयोर्भगणादिषु बीजं दत्त्वा विस्तारितौ स्वकृतसिद्धान्ते । अत्रेदमुक्तं भवति लाटाचार्येण पौलिशरोमकसिद्धान्तौ स्वीकृत्य तत्र बीजादिविशेषं विधाय रचितोऽन्यः सिद्धान्तः । अत एव यथा मदीयं करणं सर्वजनस्वीकृतं भवेदिति बुद्ध्या पञ्चानां सिद्धान्तानां मतानि स्वीकृत्य रचिता चार्याभट्टेनेयं पञ्चसिद्धान्तिका । एवमेव विष्णुचन्द्रादयो वसिष्ठसिद्धान्तादीन् स्वीकृत्य स्वान् सिद्धान्तान् रचयामासुः न ते साक्षाद्वसिष्ठादिसिद्धान्तकर्तार इति मन्मतम् । यत्तु रोमकसिद्धान्तः श्रीषेणकृतः "श्रीषेणेन गृहीत्वा" इत्यादि ब्रह्मगुप्तवाक्यात्कथयन्ति तन्न तथा कल्पने रोमकसिद्धान्तस्य स्मृत्यन्तर्गतत्वाल्लाटाचार्यादपि नवीनत्वाच्चात एव तत्र "श्रीषेणेन गृहीत्वा रत्नोच्चयरोमकः कृतः कन्या" इति पाठो युक्त इति मन्मतम् ।

मन्मते सूर्यपुलिशरोमकसिद्धान्ताः प्रायः समकालीना एवेत्यस्य दार्ढ्यार्थं प्रपञ्चयिष्याम्यग्र इति ।

४ इदानीं पञ्चानां सिद्धान्तानां दृग्गणितैक्यत्वं निरूपयति । पौलिशकृत इति ।

स्पष्टार्थम् ।

५–७ इदानीं स्वकर्तव्यतामाह । यत्तत्परमित्यादि ।

स्पष्टार्थम् ।

८–१० इदानीमहर्गणानयनमाह । सप्ताश्विवेदसङ्ख्यमित्यादि ।

स्पष्टार्थम् ।

अत्रोपपत्तिः । रोमकयुगमर्केन्द्वोरित्यादिवक्ष्यमाणाचार्योक्तपद्येन रोमकमते २८५० एतेषु सौरवर्षेषु अधिमासाः = १०५० क्षयाहाः = १६५४० एभ्यः सौरमासाः = ३४२००, चान्द्रदिनानि = १०५०५०० सावनदिनानि = १०४०३५३, एकस्मिन् सौरमासेऽधिमासमानम् = $\frac{१०५०}{३४२००}$

$= \frac{७}{३३८}$ अस्मादनुपातेनाधिमासानयनमुपपन्नम् । तत एकस्मिन् चान्द्रदिने सूर्याहमानम् $= \frac{१६५४७}{५०५७५००} = \frac{११}{७०३}$ स्वल्पान्तरात्, ततोऽनुपातेनावमानयनमुपपन्नं भवति । मनुशरा ग्रन्थारम्भे गुणखसग्रहारयोग्यः चेप इत्युपपन्नं सर्वम् । अत्रेदमवधेयं यदाचार्येण स्वल्पान्तराद्ग्रन्थारम्भकालिकोऽधिमासक्षेपस्त्यक्त एव यतो न तत्र "रोमकसूर्यो द्युगणात्खतिथिघ्नादि"त्यादिनाऽधिमासक्षेपाभावः सिध्यति ॥ विशेषं तच्छ्लोकव्याख्याने कथयिष्य इति ।

११–१६ इदानीमन्येषां चतुर्णां सिद्धान्तानां मतानुसारेणाधिमासादिमानं तत्तन्मतीयाहर्गणसाधनोपयोग्याह । दिग्घासाष्टेत्यादि ।

भट्टोत्पलमतानुसारेण पौलिशसौरयोः सौरवर्षादिमानं समानमेव केवलं नाम्ना भेदः । अर्थात् पराशरादिमते यत् सौरमानं तस्य पुलिशाचार्येण सावनसंज्ञा कृता । एवं सावनस्य सौरसंज्ञा कृता । परन्तु यद्येवं स्वीकृत्य पौलिशमतेनाधिमासादयः साध्यन्ते तर्हि, आचार्योक्तप्रकारेण महान् भेदो ह्युत्पद्यते । अतः ११–१३ श्लोकानामद्यावधि यथातथ्येनाशयो मनसि नायातस्तथापि भट्टोत्पललिखितपौलिशमतानुसारेणैकस्मिनधिमासे सौरदिवसानामासन्नमानानि ११ – १३ श्लोकशोधनोपयोगीनि लिख्यन्ते ।

$$९७९\frac{४३३६}{६६३८६} = ९७९ + \cfrac{१}{१५ + \cfrac{१}{३ + \cfrac{१}{४ + \cfrac{१}{१ + \cfrac{१}{२ + \frac{१}{६६}}}}}}$$ अस्मादासन्न-

मानानि, ९७९, ९७९ $\frac{१}{१५}$, ९७९ $\frac{३}{४६}$, ९७९ $\frac{१३}{१६६}$, ९७९ $\frac{१६}{२४५}$, ९७९ $\frac{४५}{६८६}$,

एवमेकस्मिन्सौरवर्षेऽधिमासमानम् ।

$$\frac{६६३८६}{१८०००} + \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२ + \cfrac{१}{२ + \cfrac{१}{६ + \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{१ + \cfrac{१}{३ + \cfrac{१}{३ + \cfrac{१}{१ + \cfrac{१}{३ + \cfrac{१}{१ + \frac{१}{३}}}}}}}}}}}}}}$$

तत आसन्नमानानि

$\frac{१}{३}, \frac{१}{३}, \frac{३}{८}, \frac{७}{१९}, \frac{४५}{१२२}, \frac{९०}{२४३}, \frac{१४२}{३८५}, \frac{२३९}{६४८}, \frac{८५९}{२३२९}, \frac{२८१९}{७६३५}, \frac{३६७५}{९९६४}, \frac{१३८४१}{३७५२७}, \frac{१०५१९}{२८४८१}$,

एवमेकस्मिन्नवमदिने चान्द्रदिनानामासन्नमानानि

$$६३\frac{६३३०६}{६८६७३} = ६३ + \cfrac{१}{१ + \cfrac{१}{१० + \cfrac{१}{१४ + \cfrac{१}{२ + \cfrac{१}{१ + \cfrac{१}{२८ + \cfrac{१}{१ + \cfrac{१}{१ + \frac{१}{२}}}}}}}}}}$$

तत आसन्नमानानि

$६३, ६४, ६३\frac{१०}{११}, ६३\frac{१४१}{१५५}, ६३\frac{२८२}{३२१}, ६३\frac{४३३}{४७६}, ६३\frac{१२४१६}{१३६४८}, ६३\frac{१२८४८}{१४१३५}, ६३\frac{२५२६५}{२७७७४}$,

अथ सावित्रे सौरमते १८०००० सौरवर्षेषु ६६३८६ अधिमासाः १०४५०६५ क्षयाहाः । ततो युगवर्षमासपिण्डमित्यर्यिमश्लोकेन

सौरमासाः = २१६०००

अधिमासाः = ६६३८६

चान्द्रमासाः = २२२६३८६

चान्द्रदिनानि = ६६७६१६७०

क्षयाहाः = १०४५०६५

सावनदिनानि = ६५७४६५७५

सौराब्दाः = १८०००

नाक्षत्रदिनानि = ६५६२६५७५

एवं रोमकमते २८५० सौरवर्षेषु १०५० अधिमासाः १६५४७ क्षयाहाः ।

ततः सौरमासाः = ३४२००

अधिमासाः = १०५०

चान्द्रमासाः = ३५२५०

चान्द्रदिनानि = १०५७५००

क्षयाहाः = १६५४७

सावनदिनानि = १०४०६५३

सौराब्दाः = २८५०

नाक्षत्रदिनानि = १०४३८०३

आचार्येण वसिष्ठब्रह्ममतानुसारेण सौरादिमानानि न लिखितानि भ्रष्टत्वात्, परन्तु पौलिशमतेनापि युगवर्षमासादिमानानि न प्रदर्शितानि तेन पुलिशाचार्येण स्थिरसौरवर्षेषु स्थिराधिमासादिसङ्ख्या न पठितेत्यनुमीयते, ततो भट्टोत्पलेन पुलिशमतानुसारेण यानि सौरादिमानानि लिखितानि तान्यन्यान्येव विभान्ति, भट्टोत्पललिखितपुलिशाचार्यमतीयसावनदिवसेभ्यः "खार्केघ्नेऽग्निहुताशनमपास्ये"त्यादि पौलिशरव्यानयनमपि न घटते इति ।

१७–२२ इदानीं वर्षाधिपत्यादिसाधनमाह । मुनियमयमेत्यादि ।

प्रतिराशि शेषम्, प्रपन्नसहितानि वर्त्तमानसहितानि ।

अर्थात्, रूपाधिकानि । अन्यत् स्पष्टार्थम् ।

अत्रोपपत्तिः । षष्ट्यधिकशतत्रयसावनदिनैरेकं वर्षं परिकल्प्य तत्र यो वारः स एवाब्दप इति प्राचीनैः फलार्थं कल्पितम् । तत्राहर्गणस्य खण्डद्वयं, गणितारम्भाद्वन्यारम्भपर्यन्तमेकं वन्यारम्भाद्वर्त्तमानदिनपर्यन्तं द्वितीयम् । अत्र प्रथमखण्डं शून्यद्विपञ्चयमै२५२०र्विभज्य लब्धिहरघातसममेकं मुनियमयमद्रि २२२७ सममन्यत्खण्डं प्रकल्पितं ततो गणितारम्भादहर्गणस्वरूपम् = २५२० × ल + २२२७ + अह । अथात्र २२२७ + अह । इदमपिशून्यद्विपञ्चयमैर्विभज्य कल्प्यते लब्धिः = ल' शेषं = शे तदा पूर्वाहर्गणस्य रूपान्तरम् = २५२०ल + २५२०ल' + शे इदं खर्त्तुदहने ३६० र्विभज्य लब्धानि वर्षाणि = ७ ल + ७ ल' + $\frac{\text{शे}}{३६०}$ कल्प्यते शे अस्मिन् खर्त्तुदहनेर्हृते लब्धिः गव, शेषं = शे' अथ वर्त्तमानवर्षार्थं सा लब्धिः सैका कृता ततो गणितारम्भाद्वर्त्तमानवर्षपर्यन्तं वर्षगणः = ७ ल + ७ ल' + गव + १ । अथ षष्ट्यधिकशतत्रयसङ्ख्या सप्रहृतावशिष्टं वारचयं ततो वर्षगणस्त्रिगुणितो जातः = २१ ल + २१ ल' + ३ (गव + १) गणितारम्भे वर्षपतिर्बुधस्तेन रव्यादिगणनार्थं गणितारम्भकालिकं क्षेपकं चयं प्रक्षिप्य जातो वर्षपतीरव्यादिकः = २१ ल + २१ ल' + ३ (गव + १) + ३ सप्रतष्टे जातः = ३ (गव + १) + ३ – ७ = ३ (गव + १) – ४ यदीयं सङ्ख्या सप्ताधिका तदा पुनः सप्रतष्टा ततः १७–१८ श्लोकावुपपन्नौ । एवमहर्गणं त्रिंशता विभज्य लब्धान् मासान् वर्त्तमानमासार्थं सैकान् कृत्वा सप्रतष्टमाससङ्ख्यया द्विगुणितया सङ्गुण्य सप्तभिर्विभज्य शेषं मासाधिपतिमानीतवान्, अनेन १६ श्लोकोपपत्तिः स्फुटा भवति ।

अथ सप्रोद्धृते दिनेश इति प्रसिद्ध एव ।

"होराधिपश्च षष्ठो निरन्तरं दिवसनाथश्चेत्यादिना प्रतिहोरायां पञ्चपञ्चवृद्ध्या होराधिपा भवन्ति प्रथमा होरा तु दिनपतेरेव तेने (होरा – १) यं संख्या पञ्चगुणा दिनपतियुता जातो होरेशो गतः = दिनेश + ५ (होरा – १) अत्र यद्येवंगुणितसप्रयोजनेनापि स एव होरेश इति द्विगुणितदिनेशगुणितसप्रयोजनेन जातो होरेशो गतः = १४ दिनेश + दिनेश + ५ (होरा – १) = १५दिनेश – ५ + ५होरा = ५ (३दिनेश – १ + हो) तत इयं सङ्ख्या सप्रतष्टा होरेशा गता भवन्ति, वर्षाधिपश्चतुर्थ इत्यादि सुगममित्युपपन्नं सर्वम् ।

२३–२५, इदानीं फलादेशार्थं राश्यंशपत्यानयनं तन्नामानि च कथयति ।

द्युगणे रूपाभ्यधिक इत्यादि ।

अत्र प्रथममहर्गणं सौरवर्षसावनसंख्याभिर्विभज्य शेषं च त्रिंशता विभज्य शेषं मध्यममानेन राश्यंशाः कल्पिताः । वर्त्तमानराश्यंशार्थमहर्गणः सैकः कृतः । राश्यंशानां पतयस्त्विमे । कमलोद्भवः । प्रजेशः । स्वर्गी, इन्द्रः । चन्द्रः । मान्यः । वासः । कमला ।

अनलः । अन्तः । रविः । शशी । इन्द्रः । गौः । निर्ऋतिः । हरः । भवः । गुहः । पितृदेवः । वरुणः । बलदेवः । समीरणः । यमः । वाक् सरस्वती । श्रीः लक्ष्मीः । धनदः कुबेरः । गिरयः पर्वताः । धात्री भूमिः । वेधाः ब्रह्मा । परः पुरुषः विष्णुः । अत्र स्वर्गी तथा निर्ऋतयः इत्येतौ शब्दौ कल्पितावस्माभिस्त्रिंशत्सङ्ख्यापूरणार्थम् ।

करणावतारः ।

१. कृतगुणेत्यादि ।

अनेन श्लोकेन किं साधयतीति न ज्ञायते ऽत्यशुद्धत्वात् ।

२–६ इदानीं चन्द्रसाधनमाह । रसगुणनवेत्यादि ।

द्युगणोऽहर्गणे रसगुणनवेन्दु १६३६ युक्ते ततः शशिगुणखगुणो३०३१द्धृते या लब्धिस्तस्या घनसंज्ञा ज्ञेया शेषं नवभिः सङ्गुण्य अष्टजिने २४८ विभज्य लब्धेर्गतिसंज्ञा शेषस्य पदसंज्ञा ज्ञेया । घनसंज्ञं षोडशहृतं शेषं पृथक् एकत्र त्रिगुणितं चतुर्भक्तं फलं राश्यादि स्यात्तेन पृथक्स्थं शेषं भगणात्मकं रहितम् । इदं प्रथमखण्डं ज्ञेयम् । ततो घनसंज्ञं द्विगुणं शशिमुनिनवयम २६७१ हृतं फलं राश्यादि द्वितीयं खण्डम् । विषयधृतयः १८५ पञ्चाशीतिसहितशतैकसंख्या गतिसंज्ञेन गुणिता गतिकाष्ठांशेन गतिदशांशेन हीना कलात्मकं फलं तृतीयं खण्डं स्यात् । परन्तु यदि पादसङ्ख्या वेदार्का१२४धिका तदा तेषु गतिसंज्ञेषु गत्यर्द्धं धनं कृत्वा तृतीयं खण्डं पूर्वोक्तं साध्यम् । पदतः पदसंज्ञकाच्च वेदार्काः शोध्याः शेषं तदा पदसंज्ञं ज्ञेयम् । ततः खण्डत्रयसंस्कारे वेदार्काधिके पदसंज्ञे भगणार्धं राशिषट्कं कलाचतुष्टयाधिकं क्षेप्यं तत्रैव शेषपदसमा अंशाश्च क्षेप्याः । एतदुक्तं भवति यदा पादसंज्ञा वेदार्काधिका तदा वेदार्करहितपदसंज्ञस्य शेषपदसंज्ञां कृत्वा तत्समा अंशास्तत्र योज्या अन्यथा पूर्वागतपदसमा एवांशास्तृतीयखण्डे योज्यास्तदा मध्यमश्चन्द्रो भवति ततस्तैः पदैर्घनर्णात् वक्ष्यमाणं फलं देयम् । अर्थात् वेदार्काल्पपदेषु ऋणं अधिकेषु धनमिति बुद्धिमद्भिः स्वयमेवोह्यम् । एवं शेषपदमेकोनं पञ्चगुणं कृतनवदश१०६४युतं योगफलं मनुवेदयमेभ्यः २४१४ शोध्यं शेषं तच्छेषपदगुणितं त्रिषष्ट्योद्धृतं कलात्मकं फलं च पूर्वागतमध्यमचन्द्रे देयं तदा वास्तवो मध्यमचन्द्रो भवतीत्यर्थः ।

अत्रोपपत्तिः । आचार्येणाहर्गणस्य खण्डत्रयं कृतं ३०३१ आभिः सङ्ख्याभिर्घनसंज्ञं निहत्य प्रथमं खण्डम् । अष्टजिनैर्गतिसंज्ञं निहत्य नवभिर्विभज्य द्वितीयं खण्डम् । पदसंज्ञं च नवभिर्विभज्य तृतीयं खण्डं चेति तथा कृतेऽहर्गणस्य जातं रूपान्तरं $= \text{घन} \times ३०३१ + \frac{२४८ \times \text{गति}}{६} + \frac{\text{पद}}{६}$ इदं खण्डत्रयं पृथक् चन्द्रगत्या सङ्गुण्य मिथः संयोज्य चन्द्रानयनं सुगमम् । तद्यथा प्रथमखण्डे ३०३१ दिनसमूहभवश्चन्द्रः

$= \overset{\text{भग}}{१} - \frac{\overset{\text{राशि}}{३}}{४} + \frac{\overset{\text{राशि}}{२}}{२६७१}$ घनगुणो $\overset{\text{भग}}{\text{घन}} - \frac{\overset{\text{राशि}}{३\,\text{घन}}}{४} + \frac{\overset{\text{राशि}}{२\,\text{घ}}}{२६७१}$ जातः प्रथमखण्डभवश्चन्द्रः अत्र कल्प्यते

घनः $= १६ \overset{\text{भग}}{ल} + \overset{\text{राशि}}{शे}$ तदा प्रथमखण्डभवश्चन्द्रः $= (१६ ल + शे) - \left(\frac{४८ ल + ३ शे}{४}\right) + \frac{२ घ}{२६७१}$

$= (१६ ल + शे) - १२ ल - \frac{३ शे}{४} + \frac{२ घ}{२६७१} = (१६ ल - ल) + शे - \frac{३ शे}{४} + \frac{२ घ}{२६७१}$ ।

अत्र भगणानां प्रयोजनाभावात् $(१६ ल - ल)$ इदं त्यक्तं तदा प्रथमखण्डभवश्चन्द्रः $= शे - \frac{३ शे}{४} + \frac{२ घ}{२६७१}$ अनेन, २२ – २३ श्लोकावुपपन्नौ । एवं द्वितीयखण्डे ऽ $\frac{२४८ गति}{६}$ स्मिन् $\frac{२४८}{६}$ दिनसमूहभवश्चन्द्रः $= १ + \left(१८½ - \frac{१}{१०}\right)$ गतिगुणितः गति $+ \left(१८½ गति - \frac{गति}{१०}\right)$ जातो द्वितीयखण्डोत्थचन्द्रो भगणविरहितः $= \left(१८½ गति - \frac{गति}{१०}\right)$ एवं तृतीयखण्डेऽपि $\frac{१}{६}$ दिनभवश्चन्द्रः $= \frac{७६०।३५ कलाः}{६} = ८८ कलाः$ स्वल्पान्तरात् $= १ अंश + २८ कलाः$ पदगुणः पद $अंश + २८ प कलाः$ तृतीयखण्डभवश्चन्द्रस्तचाचार्येण प्रथमखण्डमेव गृहीतं पदसमांशसमं द्वितीयखण्डोत्थफलसंस्कृतमेव कदाचिन्मन्दफलं साधितम् । गत्यर्धे कलाचतुष्टयसंस्कारस्य तथा ६श्लोकस्येदानीं पर्यन्तं न बुद्धेरुपपत्तिरिति ।

७. इदानीं तिथिनक्षत्रानयनमाह । शश्यर्द्धदलमिति ।

शश्यर्द्धदलं शशिचतुर्थांशस्त्रिकृत्या नवभिर्गुणितस्तदा राशिस्थाने क्षत्रमानं भवेतच्च येऽंशा अवशिष्टास्ते मुहूर्ताः स्युः । एवं व्यर्कैन्दुदलं पञ्चभिराहत्य तिथिर्भवति तच्च येऽंशा अवशिष्टास्ते मुहूर्ता ज्ञेया इत्यर्थः ।

अत्रोपपत्तिः । कल्प्यते शश्यर्द्धदलं $= \overset{\text{रा}}{द} + अं$ तदा शशिनो मानं $= ४ द + ४ अं$

$= ३० \times ६० \times ४ द + ६० \times ४ \overset{\text{कलाः}}{अं}$ ततो भभोगोष्टशतीलिप्ता इत्यादिना

गतनक्षत्रमानं $= \frac{३० \times ६० \times ४ द}{८००} + \frac{६० \times ४ अं}{८००} = \frac{३ \times ६ \times ४ द}{८} + \frac{३ अं}{१०} = ६ द + \frac{३ अं}{१०}$ अत्र प्रथमं खण्डं निरवयवं गतनक्षत्रमानं द्वितीयखण्ड $\frac{३ अं}{१०}$ मिदं वर्त्तमाननक्षत्रावयवं त्रिंशद्गुणितं वर्त्तमाननक्षत्रस्य गतमुहूर्त्तमानं $= ६ अं$ यत एकस्मिन्नक्षत्रे मध्यममानेन त्रिंशन्मुहूर्ता भवन्ति । अतः शश्यर्द्धदलं नवगुणितं तच्च राशिस्थाने गतनक्षत्रमानमंशस्थाने वर्त्तमाननक्षत्रस्य गता मुहूर्ता भवन्तीत्युपपन्नं नक्षत्रानयनम् । एवं कल्प्यते व्यर्कैन्दुदलं $= \overset{\text{रा}}{द} + अं$ अतो व्यर्कैन्दुः

रा
$= २ द + २ अं = ३० \times २ द + २ अं =$ अंशाः । ततो द्वादशभिर्भागैरेका तिथिरिति गततथिमानं $= \frac{३० \times २ द}{१२} + \frac{२ अं}{१२} = ५ द + \frac{२ अं}{१२}$ अत्रापि द्वितीयखण्डं मुहूर्तसाधनार्थं त्रिंशद्गुणितं जातं वर्त्तमानतिथेर्गतमुहूर्तमानं $= ५ अं$। अत उपपन्नं तिथ्यानयनम् । तिथिशब्दः पुंल्लिङ्गोऽपि "सकलानपि पूर्णिमातीथीनुपतस्थे तिथिरेकिकातिथिरिति" श्रीहर्षोक्तेस्तेन "तिथिस्तद्वदेवोक्त"-इति साधुः ।

८. इदानीं दिनमानमाह । मकरादाविति ।

मकरादौ दिने दिने भूस्वर्गतितिथिमित एकनवपञ्चैकमितः १५९१ त्रिभिस्त्रिभिः पलैर्युतस्तदा दिनमानं भवेदेवं कर्कटकादौ तदेव शर्वरीमानं रात्रिमानं भवति ।

अत्रोपपत्तिः । अवन्तिकायां मकरादौ परमाल्पदिनमानं पलात्मकं भूनवपञ्चैकमितं प्रकल्प्य ततः प्रतिदिनं पलचयस्य वृद्धिः कल्पिता दिनमाने । अथ मकरादौ यद्दिनमानं तदेव कर्कटकादौ रात्रिमानं भवतीति तदेव कर्कटकादौ शर्वरीमानमुदितमाचार्येणेति सर्वं निरवद्यम् ।

९–१०, इदानीं मध्याह्नच्छायां मध्याह्नच्छायातो रव्यानयनं चाह । कर्कटकादिष्विति ।

कर्कटकादिषु रवेर्यद्भुक्तं राशिमानं तद्द्विगुणं तदा मध्याह्ने छाया भवेदेवमनयैव युक्त्या मकरादिषु यत्फलमागच्छेत्तन्मण्डलाद् द्वादशभ्यः शोध्यं तदाऽस्मिन् स्थाने रविर्भवति ॥ एवमिष्टदिने या मध्याह्नच्छाया तस्या अर्द्धं राश्यात्मकं राशिचययुतं तदा याम्येऽयने रविर्भवति । उदगयने तु पूर्वागतं छायादलं पञ्चदशभ्यः शोध्यं तदा रविर्भवति ।

अत्रोपपत्तिः । अवन्तिकायां प्राचीनमते परमक्रान्तिसमा अर्थात् जिनांश४शसमा अक्षांशास्तेन रवौ कर्कटकादिगते मध्याह्ने छायाया अभावस्ततो राशौ राशौ मध्याह्नेऽङ्गुलद्वयवृद्ध्या छाया कल्पिताऽतः कर्कटकादिषु भुक्तं द्विगुणं माध्यन्दिनी भवेच्छायेत्युक्तम् । अथानयैव युक्त्या यदा मकरादिगो रविस्तदा कर्कटकादेराशिषट्कं भुक्तं जातं तद्द्विगुणं द्वादशाङ्गुलसमा द्वादशाङ्गुलशङ्कोश्छाया भवति ततोऽनन्तरं सा चापचीयते तेन हेतुना मकरादिषु मण्डलाच्छोध्यमित्युक्तम् । अथ कर्कटकादेर्याम्यमयनं भवति याम्यायनारम्भे रविमानं राशिचयं तत इष्टदिने कर्कटकादेर्यद्भुक्तं राशिमानं तदेव द्विगुणं मध्याह्नच्छायाऽतो मध्याह्नच्छायादलमेव भुक्तराशिमानं भविष्यति तच्च राशिचययुतमर्कौ भवत्येव पूर्वप्रकारविलोमेन । एवमुदगयने मकरादौ रविमानं राशिनवकं तदा मध्याह्नच्छाया च द्विगुणितमकरादिभुक्तराशिरहितद्वादशसमा तेन

मछा $= १२ - २$ (मकरादिभुक्तराशि)

अतः २ (मकरादिभुक्तराशि) $= १२ -$ मछा

२

तथा, मकरादिभुक्तराशि $= ६ - \frac{\text{मक्षा}}{२}$ तत इदं भुक्तराशिमानं राशिनवकेन मकरादिरविमानेन युतं जातमुदगयने रविमानं $= १५ - \frac{\text{मक्षा}}{२}$ अनेन "उदगयने संशोध्यं पञ्चदशभ्यो रविर्भवतीत्युपपन्नं भवति ।

११–१३ इदानीं छायातो लग्नानयनं लग्नाच्छायानयनमाह । द्वादशभिः सच्छायैरित्यादि ।

रसहुताशाः षट्त्रिंशत् भाज्यः कल्प्यस्तथा येष्टच्छाया सा द्वादशयुता मध्याह्नच्छायोना हारः कल्प्यस्ततो हारेण भाज्ये विहृते यल्लब्धं तदर्केण रविराशिमानेन सहितं तदा लग्नं भवति पश्चिमकपाले तु प्रथमं यल्लब्धं तच्चक्रार्द्धाद्राशिषट्काद्विशोध्य शेषं रविराशिमानेन सहितं तदा लग्नं भवति । अथ लग्नाच्छायानयने तु लग्नादर्कं विशोध्य शेषस्य लिप्ता एव प्राक्कपाले छेदो हरो भवति पश्चिमकपाले तु ता लिप्ताश्चक्रार्द्धाच्चक्रकलादलाद्विशोध्यास्तदा हरो भवति। केषाम्। शून्याम्बराष्टलवणोदषट्कानां शून्यशून्याष्टाब्धिषट्कानां ६४८०० ततो भागे हृते यल्लब्धं तस्माद् द्वादश शोध्याः शेषे मध्याह्नच्छाया योज्या तदा लघुवसिष्ठसिद्धान्तानुसारेणेष्टकाले छाया भवतीत्यर्थः ।

अथोपपत्तिः । इष्टकाले क्रान्तिवृत्तस्य यः प्रदेशः प्राक् क्षितिजे लगति तदेव लग्नमिति प्राचीनानां सम्प्रदायस्तेन रव्युदये रविरेव लग्नं मध्याह्ने स्वल्पान्तराद्राशित्रययुतार्कसमं कल्पितं तदा मध्याह्नेष्टभयोरन्तरं शून्यं तथेष्टमध्याह्नच्छाययोरन्तरं $=$ इछा $-$ मछा भविष्यति । उभयत्र तारतम्येन द्वादश संयोज्यानुपातो यदि द्वादशभी रविलग्नयोरन्तरं राशित्रयं लभ्यते तदा द्वादशयुतेष्टमध्याह्नभान्तरेण किमिति लब्धमिष्टकालिकलग्नार्कान्तरं राश्यात्मकं व्यस्तानुपातेनेच्छाफलस्य ह्रासात् ।

एवमन्तरं $= \frac{१२ \times ३}{१२ + \text{इछा} - \text{मछा}}$ इदं रवियुतं प्राक्कपालस्थे रवौ लग्नं भवति पश्चिमकपाले तु इदमन्तरं पश्चिमक्षितिजे क्रान्तिवृत्तस्य यः प्रदेशो लग्नस्तस्मादर्थात्सप्तमलग्नार्कावधि तेनेदं चक्रार्द्धाद्राशिषट्काच्छोध्यं तदा लग्नार्कयोरन्तरं भविष्यति तदन्तरे रविं संयोज्य लग्नं ज्ञेयमिति ॥ एवं लग्नाच्छायानयने प्राक्कपाले लग्नार्कयोरन्तरमेव पूर्वानुपातजन्यं फलं पश्चिमकपाले तु तदन्तरं चक्रार्द्धाच्छोध्यं तदा पूर्वानुपातागतं फलं सिध्यति परन्तु आचार्येणात्र कलात्मकमन्तरं गृहीतं तेन पूर्वानुपातागतमन्तरं राश्यात्मकमष्टादशशतगुणितमनेनाधुनानीतेनान्तरेण समम्। तथाकृते जातम्। अं $= \frac{३६ \times १८००}{१२ + \text{इछा} - \text{मछा}} = \frac{६४८००}{१२ + \text{इछा} - \text{मछा}}$

$\therefore १२ + \text{इछा} - \text{मछा} = \frac{६४८००}{\text{अं}} = \text{ल}$ ततः समशोधनादिना इछा $=$ ल $- १२ +$ मछा । इत्युपपन्नं सर्वम् ।

इति नक्षत्रादिच्छेदः ।

१–६ इदानीं पुलिशमतेनार्कचन्द्रानयनमाह । खार्कघ्न इत्यादि ।

अहर्गणे खार्कैर्विंशत्यधिकशतेन गुणिते गुणितफलादग्निहुताशनं चयस्त्रिंशद्विशोध्य शेषं रूपाग्निवसुहुताशकृतैः ४३८३१ भक्तं क्रमात् क्रमपूर्वोऽर्थात् भगणात्मको रविर्भवति मध्यमस्ततो यत्केन्द्रं भवेत् तत् सविंशांशं विंशत्यंशसहितं कृत्वा केन्द्रं कल्प्यम् । ततः केन्द्रराशिसमा वक्ष्यमाणाः कला मध्यमे रवौ चय उपचयो धनं च कर्त्तव्या अर्थात् प्रथमराशिषट्के खगडद्वयोत्थाः कलाः चयो द्वितीयषट्के क्षयं भवन्ति तदा स्फुटो रविर्भवति । ताः कलाश्च, एकादश, ११ अष्टषट्कमष्टचत्वारिंशत् ४८ रूपोना सप्ततिरेकोनसप्ततिः ६९ सैव खयुक्ता चार्थतः पुनः सैव ६९, नवषट्कं चतुःपञ्चाशत् ५४, अब्धकृतिश्च पञ्चविंशतिः २५ । तथा दश १० षट्काष्टकमष्टचत्वारिंशत् ४८ सप्ततिः ७० एकाधिका च सप्ततिः ७१ नवषट्कं चतुःपञ्चाशत् ५४ पञ्चकृतिश्च २५ ।

तद्यथा, प्रथमखगडानि = ११ । ४८ । ६९ । ६९ । ५४ । २५

द्वितीयखगडानि = १० । ४८ । ७० । ७१ । ५४ । २५

अस्य प्रकारस्य व्याप्तिदर्शनाय कल्प्यते सविंशांशकेन्द्रप्रमाणं राश्येकं तदा एकराशिजन्यं प्रथमखगडोत्थं फलं एकादश, द्वितीयखगडोत्थं च दश द्वयोर्योगे जातं मन्दफलमेकविंशतिः । एवं सविंशांशकेन्द्रप्रमाणे राशिषट्के प्रथमखगडोत्थफलं पञ्चविंशतिः । द्वितीयखगडोत्थं च पञ्चविंशतिर्द्वयोर्योगे जातं मन्दफलं पञ्चाशत् कलाः ।

एवं सप्तराशिसमे सविंशांशकेन्द्रे पुनः खगडद्वयोत्थाङ्कानां मध्ये प्रथमः प्रथमोऽङ्क एव ग्राह्योऽर्थात् यदा सविंशांशकेन्द्रं राशिषट्काधिकं भवेत्तदा तस्माद्राशिषट्कं विशोध्य शेषराशिवशात्पुनः खगडद्वयादितः स्वस्वफलं गृहीत्वा तद्योगः कर्त्तव्यस्तदा तदेव मन्दफलं धनात्मकं भवति इत्यर्थः । अत्र पुलिशमतेन कथं केन्द्रं साध्यमित्यस्यानयनमाचार्येण न लिखितमाचार्यसमये पुलिशमतीयकेन्द्रस्यातिप्रसिद्धत्वादित्यनुमीयते ।

अत्रोपपत्तिः । कल्प्यन्ते केन्द्रांशाः १०° । ४०° । ७०° । १००° । १३०° । १६०°

ततः १४०′ परमे मन्दफले सूर्यसिद्धान्तरीत्या क्रमेण मन्दफलानि

के = १०° । ४०° । ७०° । १००° । १३०° । १६०°

ज्याके = २१ । ७७ । ११३ । ११८ । ६२ । ४१

फलकलाः = २४′ । ६०′ । १३२′ । १३८′ । १००′ । ४७′

अथ पूर्वोक्तकेन्द्रांशेषु १०° । ४०° । ७०° । १००° । १३०° । १६०° एषु विंशत्यंशान् प्रक्षिप्य जाताः क्रमेण राशयः

रा = १ । २ । ३ । ४ । ५ । ६ एतद्राशिसबन्धिपुलिशोक्तखगडानि

प्रखं = ११ । ४८ । ६९ । ६९ । ५४ । २५

द्विखं = १० । ४८ । ७० । ७१ । ५४ । २५

} अनयोर्योगे कृते जाता मन्दफलकलाः

मन्दफ = २१ । ६६ । १३६ । १४० । १०८ । ५० एताः कलाः स्वल्पान्तरात्पूर्वागतमन्दफलकलासमा एवातो मद्व्याख्यानं समीचीनम् ।

अन्येषां व्याख्यामग्रे वक्ष्ये ।

१०–१२ इदानीं चरादिसाधनमाह । विंशतिरष्टिरित्यादि ।

विंशतिः २० अष्टिः सार्द्धा सार्द्धषोडश १६ । ३० पादोनाः सप्त ६ । ४५ च एतेऽङ्काः पलभया गुण्यास्तथा क्रमादुत्क्रमाच्च स्थाप्यास्तदा मेषादीनां चरखण्डानि पलात्मकानि भवन्ति मेषादिषु त्रिराशिषु तदुपचितैरर्द्धैः खण्डैस्तथा कर्कटकादिषु त्रिराशिषु तदपचयमितैरर्द्धैः खण्डैर्विषुवताद्विषुवद्विनाद्वृद्धिः स्यात् । एवं तुलादिषु षड्राशिषु तैः खण्डदिनक्षयः स्यात् । यथोज्जयिन्यां पलभा ५ अनया क्रमाद्विंशतिः सार्द्धाष्टिः पादोनाः सप्त च गुणिता जाताः १०० । ४२ । ३४ एतानि खण्डानि मेषादिचयानाम् । उत्क्रमात् ३४ । ४२ । १०० कर्क्यादिचयानां पुनः क्रमात् १०० । ४२ । ३४ तुलादिचयानां पुनरप्युत्क्रमात् ३४ । ४२ । १०० मकरादिचयानाम् । एवं मेषादिषण्णां चरखण्डानि

मे॰	वृ॰	मि॰	क॰	सिं॰	कन्या॰		तु॰	वृ॰	ध॰	म॰
१०० ।	४२ ।	३४ ।	३४ ।	४२ ।	१०० ।	तुलादिषण्णां	१०० ।	४२ ।	३४ ।	३४ ।
कु॰	मी॰						मे॰	वृ॰	मि॰	
४२ ।	१००	एवं खण्डानां योगे कृते मेषादीनां चयानां चरपलानि					१०० ।	१४२ ।	१७६	कर्क्या-
		क॰	सिं॰	कन्या॰			तु॰	वृ॰	ध॰	म॰
दीनां चयाणां		१७६ ।	१४२ ।	१०० ।	एवमेतानि	तुलादीनां षण्णां	१०० ।	१४२ ।	१७६ ।	१७६ ।
कु॰	मी॰									
१४२ ।	१०० ।									


अत्रोपपत्तिः । एकाङ्गुलपलभां प्रकल्प्य मेषादिचयानां चरपलान्यानीय यदि तानि पृथक्पृथग्विशोध्यन्ते तर्हि दिङ्नागसप्तांशगुणा उत्पद्यन्ते दिनमानसाधनार्थमाचार्येण तानि द्विगुणानि कृत्वा विंशतिरित्यादि पठितानि तेभ्योऽनुपातो यदैकाङ्गुलया पलभया एतानि द्विगुणचरखण्डानि तर्हीष्टपलभया किमेवं स्वदेशे द्विगुणचरखण्डानि सिध्यन्ति तैर्विषुवतात् विषुवद्विनात् । मेषादिराशिचयेषु दिनवृद्धिरुपचयिनी स्यात् कर्कटादिराशिचयेषु दिनवृद्धिरपचयिनी स्यात् । एवं तुलादिराशिचयेषु दिनह्रास उपचयेन मकरादिराशिचयेषु चापचयेन स्यादिति । इदं चरविनाडिकाकर्म सागरहिमाद्रिपरिधौ सागरहिमालयाभ्यन्तरे स्पष्टं स्यात् । एतदुक्तं भवति सागराद्धिमाद्रिपर्यन्तं चरखण्डैरेव स्वल्पान्तरात्स्फुटं चरमागच्छत्यग्रे पलभाधिक्यात्खण्डकैरन्तरं पतति तदर्थं "अन्यचापि यथैतत्स्पष्टं तच्छेदके वक्ष्ये" इति कथयति इति ।

१३–१५ इदानीं देशान्तरमाह । यवनान्तरजा नाड्य इत्यादि ।

अवन्त्यां यवनपुरात् सप्तनाड्यस्त्रिभागाधिका ७ । २० देशान्तरघटिकाः सन्ति वाराणस्यां तु विकृतिर्नवनाड्यः सन्ति । अन्यच्च देशान्तरघटीज्ञानार्थं प्रकारं कथयत्याचार्यः । योजनपिण्डात् पुरयोर्योजनात्मकान्तरात् त्रिकृतिघ्नात् नवगुणितात् खवसु ८० हृताद्यल्लब्धं तस्मात् स्वताडिताद्वर्गीकृतात् अक्षद्वयविवरकृतिं रेखास्वदेशाक्षांशान्तरकृतिं

जह्यात् त्यजेत् शेषस्य मूलं षट्कोद्धृतं तदा देशान्तरघटिका भवन्ति देशान्तरनाडीभ्यः पूर्वागतचरनाड्यर्द्धं चक्रस्य पूर्वार्द्धे उत्तरगोले ऋणं कर्त्तव्यम् । चक्रस्य चान्त्ये दक्षिणगोले च वृद्धिः कर्त्तव्या तदा स्फुटा नाड्यो भवन्ति तद्योगमपि जह्यादर्थाच्छिष्टं चरं त्यजेत् ।

अत्रोपपत्तिः । कल्प्यते रे रेखादेशस्थानं तद्याम्योत्तरवृत्तं च ध्रुवे स्वदेशस्थानं तु दे तद्याम्योत्तरवृत्तं च ध्रुदे दे स्थानगतः स्पष्टपरिधिः देल, रेदे रेखास्वदेशयोरन्तरमंशात्मकं तज्ज्ञानं तु योजनात्मकान्तरतोऽनुपातेन यदि भूपरिधिना चक्रांशास्तदा योजनात्मकान्तरेण किं जातं रेदे $=\frac{\text{चक्रां}\cdot\text{ योज}}{\text{भूप}}$ आचार्येण भूपरिधिमानं ३२०० कल्पितं तदा रेदे $=\frac{३६०\times\text{योज}}{३२००}$ $=\frac{९\text{ योज}}{८०}$ । रेल तु अक्षांशान्तरसमं ततः स्वल्पान्तरात् रेदेल चिभुजं जात्यं प्रकल्प्य



रेदे, रेल वर्गान्तरमूलं देलसमं कल्पितं ततोंशात्मकं मानं देल इत्यस्य यदागतं तन्नाड्यर्थं षड्भिर्विभक्तम् । पूर्वं यच्चरमागतं तद्द्विगुणं तदर्थमर्द्धं कृतं शेषं चाच सुगमम् ॥

१६. इदानीं तिथिनक्षत्रसाधनमाह । ऋक्षं लिप्राप्तृशतीति ।

अप्तृशतीलिप्रा एकमृक्षं भवति ततोऽनुपाताद्यहकलाभिर्नक्षत्रं साध्यम् । एतदुक्तं भवति यहकला अप्तृशतहृता लब्धं गतनक्षत्रं भवति शेषकला अग्रिमनक्षत्रस्य गतकलास्ता हरात् अप्तृशत्याः प्रोह्य भोगकलाः साध्या इत्यर्थः । एवं व्यर्कान्चन्द्राद्विषट्कांशैर्हृतात्तिथिर्भवति ततो नक्षत्रस्य वेलासाधने भुक्त्यनुपातः कार्यः । यदि गतिकलाभिः षष्टिघटिकास्तदा गतेष्यकलाभिः किम् । लब्धाः क्रमेण गता एष्याश्च नाड्यो भवन्ति । एवं तिथिवेलासाधने रविचन्द्रयोर्गत्यन्तरमनुपाते ग्राह्यमित्यर्थः ।

१७. मासेमासे रविगतिमानमाह । गुणशिखीत्यादि ।

षष्टिः ६० क्रमाद्गुण ३ शिखि ३ गुणा ३ ग्नि ३ यम २ शशि १ वियुता तदा मासषट्के ५७ । ५७ । ५७ । ५७ । ५८ । ५९ गताः कलास्ततः सैव षष्टिः सैका सरूपरूपैका अर्थात् षष्टिः स्थानचतुष्टये स्थाप्या सर्वत्रैकाधिका कर्त्तव्या तथा सैव षष्टिः खैकवियुता एकत्र खेन शून्येनोनिताऽन्यत्रैकेन हीना तदा ६१ । ६१ । ६१ । ६१ । ६० । ५९ गताः कला अन्यस्मिन् मासषट्के भानोः सूर्यस्य क्रमात् भुक्तिर्भवति—इत्यर्थः ।

अत्रोपपत्तिः । एकैकं राशिं केन्द्रं प्रकल्प्य स्थूलं गतिफलं संसाध्य तत्संस्कारेण द्वादशमासेषु गतिकलाः साधिताः इति ।

१८–१९ इदानीं करणसाधनमाह । सितबहुलयोरित्यादि ।

विरविभोगात् रविरहिताच्छीतगोश्चन्द्रात् कलाः खर्त्तुहुताशे–३६० हृता लब्धं तत्करणं भवति परन्त्वत्र सितबहुलयोः शुक्लकृष्णपक्षयोः क्रमेण षड्भागाः क्षयधनं कर्त्तव्याः । एतदुक्तं भवति शुक्लपक्षीयरविचन्द्रविवरभागेभ्यः षड्भागान् विशोध्य शेषस्य लिप्राः कार्याः । कृष्णपक्षीयान्तरांशे च षड्भागान् संयोज्य लिप्राः साध्यास्ततः खर्त्तुहुताशैः शून्यषट्करामै-

३६० हृतादवाप्यं तत्करणं अन्यत् गतगम्यघट्यादि तिथिवत् अर्थात् गत्यन्तराद्गतैष्यकलातोऽनुपातादथा तिथिवेला साधिता तथैव करणवेला च साध्या । बहुलचतुर्दश्यर्द्धात् कृष्णपक्षचतुर्दश्युत्तरार्द्धात् शकुनिः, चतुष्पदं, नागः, किंस्तुघ्नमिति चत्वारि ध्रुवाणि स्थिराणि करणानि अन्यानि चराणि एवं सर्वाणि करणानि अर्द्धे तिथ्यर्द्धे प्रवर्तन्ते तिष्ठन्तीत्यर्थः । चरकरणानां नामानि तु ववं, बालवं, कौलवं, तैतिलं, गरं, वाणिज्यं, विष्टिरिति ।

अत्रोपपत्तिः । रविचन्द्रयोः षड्भिःषड्भिर्विवरभागैरेकैकं करणं भवति शुक्लपक्षप्रतिपदः पूर्वभागे किंस्तुघ्नं नाम स्थिरकरणं सदा तिष्ठति । अतः शुक्लपक्षादितो ये विवरभागास्ते षड्भिर्विरहितास्तदा चरकरणप्रवृत्तिकालादन्तरांशा भविष्यन्ति ततस्तेंऽशाः षड्भिर्हृता वा कलाः खर्तुदहनै ३६०हृता ववादितः करणान्यागच्छन्ति । एवं शुक्लपक्षान्ते पूर्णान्तकाले रविचन्द्रयोर्विवरांशाः १८०° षड्भिर्विरहिताः शेषं १७४ षड्विहृतं लब्धानि चरकरणानि २९ सप्ततष्ठानि शेषं रूपसमं तेन कृष्णपक्षीयविवरभागेभ्यो यानि करणानि उत्पद्यन्ते तच्चैकयोजनेन ववादितः करणानि भविष्यन्ति तच्च चाचार्येण प्रथममेव कृष्णपक्षीयविवरभागेषु षड्भागान् संयोज्य करणानि साधितानि तानि स्वत एकाधिकानि लब्धानि भविष्यन्तीत्युपपन्नम् ।

२०–२२ इदानीं पातसाधनमाह । अर्केन्दुयोगषट्क इत्यादि ।

दशर्क्षसहितेषु यदि रविशशियोगो राशिषट्कं भवति तदा वैधृतमुक्तमेवं स एव योगो दशर्क्षसहितेषु यदि चक्रं द्वादशसमस्तदा व्यतिपातो भवति । ततो गतेर्भागे वेला समयो मृग्या विचार्यः । परन्तु यदा उष्णकिरणस्य रवेरुत्तरादाश्लेषार्द्धादेव निवृत्तिरासीत्तदैवायनं युक्तं पूर्वोक्तं पातलक्षणं च प्राचीनैः समीचीनमुक्तं साम्प्रतं वर्त्तमानकाले तु पुनर्वसुतउत्तरमयनं निवृत्तं भवति यद्यप्यच पुनर्वसुरितिपदेन तच्चरणज्ञानं न भवति तथापि आचार्यप्रतिपादितसंहितावचनेन पुनर्वसुपदेन पुनर्वसोः पादचयमेव ग्राह्यम् । एवं तस्मात् कालाद्यदा विपरीतायनभागो विपरीतायनांशो भवति, शशिरव्योर्मध्ये क्षेपश्च अ*र्कैकाष्ठांशसमः परमक्रान्तिसमस्तदा दिनकृच्छशियोगचक्रार्द्धं व्यतिपातो भवति ।

अत्रोपपत्तिः । यदा सायनरविशशियोगो भार्द्धं भवति तदा व्यतिपातो यदा स एव योगश्चक्रं तदा वैधृतिरिति प्राचीनानां सम्प्रदायः । यदाश्लेषार्द्धादुत्तरायणप्रवृत्तिरासीत्तदायनांशाः = २३° । २०′ ततो रविशशियोगार्थं न्यासः

र – २३°, २०′ = सायनरविः
च – २३, २०′ = सायनचन्द्रः
} अनयोर्योगः = र + च – ४६°, ४०′ अयं द्वादशसमो वैधृतियोगे व्यतिपाते तु राशिषट्कसमस्ततः समीकरणेन द्वयोः पातयोर्योगमानं क्रमेण वैधृते,

रा
यो = १२ + ४६°, ४०′ व्यतिपाते, रा यो = ६ + ४६°, ४०′ आभ्यां योगाभ्यां नक्षत्रसाधने कृते वैधृते नक्ष = ३ १/२, व्यतिपाते, नक्ष = १७ प्रथमस्थाने दशयोजनेन नक्षत्रसंख्या = १३ १/२ = चक्रा-

* अर्ककाष्ठांशाः = २४° = परक्रान्तिरित्याचार्योक्तक्रान्तिप्रश्नाधिकारतो ज्ञायते ।

द्धेसमा द्वितीयस्थाने तु नवचसंख्या = २० = चक्रसमात उपपन्नम् ॥ एवं यदा २३° । २०′ । एतेऽयनांशा ऋणात्मकास्तदा तस्मात्कालात्परमर्णायनांशमितिराचार्योक्त्या चतुर्विंशतिः पुनस्तस्मात्स्थानाद्विपरीतायनभागस्य परमस्य मितिश्चतुर्विंशतिः । तेन यदा तस्मात्स्थानात्पुनर्विपरीतायनभागश्चतुर्विंशतिर्भवति तदा निरयणमेषादावेव नाडीवृत्तक्रान्तिवृत्तयोः सम्पातोऽतोऽयनांशाभावस्ततो रविशशियोगे चक्रार्द्धसमे व्यतिपातो भविष्यत्येवाच वासना सुगमेव ॥

२३–२४· इदानीं सङ्क्रान्तीनां संज्ञामाह । मेषतुलादाबित्यादि ।

मेषतुलादौ विषुवद् भवति । मेषतुलासङ्क्रान्त्योर्विषुवत्संज्ञेत्यर्थः । एवं कन्याचतुर्दशेऽंशे मिथुनस्याष्टादशेऽंशे मीनस्य द्वाविंशेऽंशे कार्मुकस्य धनुषः षड्विंशेऽंशे च षडशीतिमुखं भवति । तुला आदिर्यस्याः सा तुलादिः कन्या तस्याः षडशीतिमुखेषु ये दिवसाः षोडशावशेषाः सन्ति ते पितृदिवसास्तच पितृणां दत्तमक्षयं स्यादित्यच प्राचीनवचनान्येव प्रमाणानीति ।

२५–इदानीमयनर्तुमानान्याह । उदगयनमिति ।

स्पष्टार्थम् ।

२६–इदानीं सङ्क्रान्तीनां पुण्यकालमाह । षष्टिघ्ना भुक्तिहृता इत्यादि ।

यदा रविकेन्द्रं राश्यन्तरं गच्छति सा सङ्क्रान्तिस्तस्मात्कालात्पूर्वं बिम्बार्द्धकलोत्पन्नकालेन बिम्बाग्रिमप्रदेशस्तचासीदनन्तरं बिम्बार्द्धकलोत्पन्नकालेन बिम्बान्तिमप्रदेशश्च तच यास्यति तेन हेतुना बिम्बकलोत्पन्नकालः सङ्क्रान्तीनां पुण्यकालः । तदानयनं त्रैराशिकेन गत्या यदि षष्टिघटिकास्तदा बिम्बकलाभिः किं लब्धः पुण्यकालस्तदर्द्धेन आद्यन्तात् पुण्यकालः अर्द्धेन कालः प्रथमं अर्द्धेन च परतः पुण्यकाल इत्यर्थः ।

२७–इदानीं योगविशेषमाह । तिथ्यन्तं यदीत्यादि

यदि सूर्यस्तिथ्यन्तं अन्यवासरं च स्पृशन्नुदितस्तदा त्र्यहस्पृक् योगः स्यात् । यत एकस्यां तिथ्यामेव दिनत्रयस्य सूर्येण स्पर्शः कृतः । एवं अह्नो दिवसस्य तिथित्रयस्पर्शनाद्योग इति बुद्ध्येव विध्यतीत्यर्थः ।

२८–इदानीं राहुसाधनमाह । अष्टगुण इत्यादि ।

दिनराशावहर्गणे अष्टघ्नगुणे रूपेन्द्रियशीतरश्मिभि १५१ भक्ते लब्धा राहोरंशा भवन्ति तच त्रिंशता विहृत्य राशयो ज्ञेया राशींश्च द्वादशभिर्विभज्य भगणा ज्ञेयास्ततो ये भगणा लब्धास्तत्समकलाः पूर्वलब्धांशेषु क्षेप्यास्तदा राहुमानं स्यात् ।

अत्रोपपत्तिः । १५१ दिनैः ८ अंशा राहुगतिस्ततोऽनुपातादहर्गणे राहुसाधनं सुगमम् । परन्तु १५१ दिनैः ८ अंशाः गतिर्न वास्तवा भवति एकस्मिन् भगणे एककलान्तरं पतति तेन कलासंस्कारो युक्त एवेत्युपपन्नम् ।

२६—इदानीं राहोरङ्गविशेषानयनमाह । वृश्चिकभागा इत्यादि ।

षड्विंशतिरेकलिप्तिकालुप्ता एककलाहीना अर्थात् पञ्चविंशतिकला आदिः प्रथममेव राहोर्वृश्चिकभागाः वृश्चिककीटाकाराङ्गावयवाः सन्ति तानवयवान् अतोऽस्माद्गणितागताद्राहोः प्रोह्य हित्वा मुखं साध्यम् । एतदुक्तं भवति । पूर्वाहर्गणोत्पन्नं यद्राहुमानं तस्मात्पञ्चविंशतिकला यदि विशोध्यन्ते तदा मुखमानं भवति तन्मुखमानं षड्राशियुतं पुच्छाख्यं भवतीत्यर्थः । पञ्चविंशतिकलासमा राहोर्वृश्चिकाकारावयवाः सन्तीत्यत्र प्राचीनवचनमेव प्रमाणं नान्यत्कारणं वक्तुं शक्यते ।

३०—३१ इदानीं राहुवशतश्चन्द्रस्थितिमाह । वक्रादधिकश्चन्द्र इत्यादि ।

वक्राद्राहुमुखाद्यदा चन्द्रोऽधिकः पुच्छाच्चाल्पस्तदा भगणादुदग्यति अर्थात् तदा उत्तरः शरो भवति । एवं यदा वदनात् मुखाच्चन्द्रोऽल्पो भवति पुच्छाच्चाधिकस्तदाऽसुरात् राहोर्दक्षिणतो याति । अर्थात् दक्षिणः शरो भवति । एवं अतिमहति विक्षेपे शरे राहोः सकाशात् भागनवत्या चन्द्रोऽन्तरितो भवति तदा सश्च परमः शरो लिप्ताशतद्वयाधिकसप्ततिः २७० अन्यचेष्टकालेऽनुपातनः शरः साध्य इत्यर्थः ।

अचोपपत्तिरति सुगमा ।

३२—३७ इदनीमस्मिन्नध्याये विशेषमाह । तिथिनक्षत्रेत्यादि ।


अचाशुद्ध्याधिक्यादानुपूर्व्या सर्वेषामाशयो न विदितो भवति ।

इति पौलिशसिद्धान्तः ।

१—१ इदानीं ज्यासाधनमाह । षष्टिशतचयपरिधेरित्यादि ।

षष्ट्यधिकं शतचयमिति षष्टिशतचयं षष्टिशतचयमेव परिधिरिति षष्टिशतचयपरिधिः । तस्य वर्गस्य यो दशांशस्तस्मात्पदं विष्कम्भो व्यासो भवति । इहाच तदंशचतुष्कं ग्रसिद्धं वृत्तचतुर्थांशं संप्रकल्प्य राश्यष्टभागज्या पञ्चविंशत्यधिकशतद्वयकलाज्या साध्या कथं साध्येत्यत आह । व्यासार्द्धकृतिरिति व्यासार्द्धस्य चिज्यायाः कृतिर्ध्रुवसंज्ञा ज्ञेया ततस्तस्या ध्रुवायाश्च यः कृतांशश्चतुर्थांशः सा मेषस्य करणी ज्ञेया । अच करणीपदमध्याहार्य्यम् । ततो ध्रुवकरणी ध्रुवा चासौ करणी च ध्रुवकरणी मेषोना मेषस्य करण्योना तदा द्वयोराश्योः करणी भवति ततः पदं ज्याः स्युः । प्रथमपदं मेषस्य ज्या द्वितीयं द्वयोराश्योः षष्टिभागानामित्यर्थः । शेषेष्विष्टेषु भागेषु यस्य धनुषो ज्यापेक्षिता तद्द्विगुणस्य, पदस्य राशिचयस्य चायोज्ये अन्तरे यच्छेषं तस्य गुणो ज्या तेन गुणेन हीना चिज्या कार्या । तदर्द्धवर्गस्तस्यार्द्धस्य वर्गो द्विगुणस्य धनुषो ज्यायाः अर्द्धस्य च यो वर्गस्तेन संयोज्यो द्वयोर्वर्गयोर्योगः कार्य इत्यर्थः । तस्य पदो मूलं अभिमतज्या अभीष्टज्या भवति । एवं तेन योगेनोना ध्रुवा ऽवशेषपिण्डस्य तद्भुजः कोटेर्वर्गो भवति तस्य पदं कोटिज्या भवतीत्यर्थः । ध्रुवकरणीदलं अध्यर्द्धसंज्ञको वर्गो भवति । अध्यर्द्धं सार्द्धंकराशिः पञ्चचत्वारिंशद्भागाः । अचैतदुक्तं भवति ध्रुवकरणी चिज्याकृतिस्तद्दलाद्यत्पदं सा पञ्चचत्वारिंशद्भागानां ज्या भवति । अथाच ज्यासाधनेऽन्यो विधिरुक्तोऽस्ति को ऽसौ विधिस्तदर्थं कथयति इच्छांशद्विगुणोनेति । येषामंशानां ज्यापेक्षिता त एवेच्छांशास्तद्द्विगुणेन चिभं राशिचयं हीनं कार्यं तस्य ज्यया चयस्य राशिचयस्य चापज्या चिज्या हीना कार्या सा षष्टिगुणा तदाऽभीष्टांशज्याकरणी भवति तया करण्या रहिता ध्रुवाऽवशेषस्याभीष्टांशकोटेः करणी भवतीत्यर्थः ॥

अचोपपत्तिः । व्यासवर्गाद्दशगुणात्पदं परिधिरिति प्राचीनानां संप्रदायः । ततो विलोमेन परिधेर्व्यासानयनमुपपन्नम् । कल्प्यते अघगवृत्तं अघ चापे च षष्टिभागास्तदा अघरेखा षष्टिभागपूर्णज्या तदर्धं तु त्रिंशद्भागानां ज्या अचमिता । अथ अघचापे षष्टिभागाः सन्ति तेन अकेघ कोणः षष्ट्यंशसमस्तथा केअ = केघ । अतः केअघसमद्विबाहौ आधारोत्पन्नं कोणद्वयं च षष्टिभागमितं मिथः समानं जातं ततो जातं केअघचिभुजं समचिभुजम् । अतः अघरेखा वृत्तव्यासार्द्धेन केअरेखासमेन समा जाता तदर्द्धमुपपन्नं मेषज्यानयनं तद्वर्गोनस्त्रिज्यावर्गस्तत्कोटिषष्टिभागज्यावर्गो भवत्येव । अजचापस्य ज्या अचरेखाऽपेक्षिताऽस्ति तद्द्विगुणं अघचापं तद्भुनं चिभं गघचापं तज्ज्या घनरेखा वा केतरेखा तद्भुना केअरेखा अतरेखा तद्भुलं अदरेखा तद्द्विगुणस्य अघचापस्य जीवा घतरेखा तद्भुलं चदरेखा (यतः अघतजात्यचिभुजे अघरेखार्द्धविन्दोः च—संज्ञकात् चदरेखा घतरेखासमानान्तरा कृतास्ति) तद्वर्गयोगपदं अचरेखा अजचापज्यासमा भवति तद्वर्गोनस्त्रिज्यावर्गस्तत्कोटिज्यावर्गो भवत्येवेत्युपपन्नम् । एवं अकेगकोणो नवत्यंशसमः । तेन अके-



वर्गो द्विगुणो भवति अगवर्गो नवत्यंशपूर्णज्यावर्गः । तच्चतुर्थांशस्य $\frac{२\,\text{अके}^२}{४} = \frac{\text{अके}^२}{२}$ अस्य पदं अगदलमिता पञ्चचत्वारिंशद्भागज्या भवत्येवेत्युपपन्नं ध्रुवकरणोदलमित्यादि

केअचिज्या = १२० तथा इच्छांशद्विगुणोनचिभज्ययोना चयस्य चापज्या = अत

$\text{अद} = \frac{\text{अत}}{२}$ तथा $\text{चद}^२ = \frac{\text{घत}^२}{४} = \frac{\text{केघ}^२ - \text{केत}^२}{४} = \frac{\text{केघ}^२ - (\text{केअ} - \text{अत})^२}{४}$

$= \frac{२\,\text{केअ}\cdot\text{अत} - \text{अत}^२}{४}$ ∴ $\text{अच}^२ = \text{अद}^२ + \text{चद}^२ = \frac{\text{अत}^२}{४} + \frac{२\,\text{केअ}\cdot\text{अत} - \text{अत}^२}{४}$

$= \frac{\text{केअ}\cdot\text{अत}}{२} = \frac{१२० \times \text{अत}}{२} = ६०\text{अत}$ । अत उपपन्नं सर्वम् ।

६–११, इदानीं ज्यामानान्याह । मेषज्याः स्वरतिथय इत्यादि ।

स्वराः सप्त । तिथयः पञ्चदश । विंशतिः गुणैस्त्रिभिः शिवैरेकादशभिः धृतिभिरष्टादशभिः सहिता । पञ्चनरकं पञ्चचत्वारिंशत् । शतार्धं त्रिसमेतं त्रिपञ्चाशत् । षष्टिः । एताकलाः मेषज्याः सन्ति तथाऽजे मेषे एता विकलाः सैका पञ्चाशत् एकपञ्चाशत् । पञ्चाष्टकं चत्वारिंशत् । पञ्चवर्गः पञ्चविंशतिः । वेदाश्चत्वारः । चतुर्भिरधिका त्रिंशत् चतुस्त्रिंशत् । षट्पञ्चाशत् । शराः पञ्च । शून्यम् ।

एवं मेषे चापानि = २२५	४५०	६७५	९००	११२५	१३५०	१५७५	१८००
ज्याः = ७।५१	१५।४०	२३।७५	३१।४	३८।३४	४५।५६	५३।५	६०।०

एवं वृषे षट्कं । चयोदश । एकोनविंशतिः । त्र्यष्टकं चतुर्विंशतिः । त्रिंशत् अम्बरेण शून्येन पञ्चभिः नवभिः अग्निहिमगुभिस्त्रयोदशभिर्युक्ता । एताः कलाः सन्ति । तथा विकलाश्च चत्वारिंशत् । रामास्त्रयः । मुनयः सप्त । सैकं अर्द्धशतं एकपञ्चाशत् । द्विरतिद्वादश वारद्वयं चयोदश । षष्टिः मनुभिश्चतुर्दशभिः सागरैश्चतुर्भिर्हीना

एवं वृषे चापानि = २०२५	२२५०	२४७५	२७००	२९२५	३१५०	३३७५	३६००
ज्याः = ६।४०	१३।३	१९।७	२४।५१	३०।१३	३५।१३	३९।४६	४३।५६

अत्र वृषज्याः सर्वा मेषान्तज्यया ६० अनया हीनाः पठिता लाघवार्थमिति ज्ञेयम् ।

एवं द्वितीयराश्यन्ततो मिथुने एताः पिण्डाद्याः कलाः । गुणास्त्रयः । रसाः षट्कम् । नवकम् । द्वादश । विश्वे चयोदश । द्विस्त्रिभूताः वारद्वयं पञ्चदश । भूपाः षोडश । तथा विकलाश्च । षष्टिः धृतिभिरष्टादशभिः । गुणैस्त्रिभिः । धृतिभिरष्टादशभिर्हीना कार्या । शून्यम् । अनलोनं शतार्द्धं सप्तचत्वारिंशत् । वेदाश्चत्वारः । व्येकार्द्धशतमेकोनपञ्चाशत् । पञ्च चेति ।

एवं मिथुने चापानि = ३८२५	४०५०	४२७५	४५००	४७२५	४९५०	५१७५	५४००
ज्याः = ३।४२	६।५०	९।४२	१२।०	१३।४०	१५।४	१५।४९	१६।५

अत्र मिथुनज्याः सर्वा वृषान्तज्यया १०३ । ५६ अनया हीनाः पठिता लाघवार्थम् ॥
एवं मेषे ज्याः = ७ । ५१ ॥ १५ । ४० ॥ २३ । २५ ॥ ३१ । ४ ॥ ३८ । ३४ ॥ ४५ । ५६ ॥ ५३ । ५ ॥ ६० । ० ॥
वृषे ज्याः = ६६ । ४० ॥ ७३ । ३ ॥ ७६ । ७ ॥ ८४ । ५१ ॥ ६० । १३ ॥ ६५ । १३ ॥ ६६ । ४६ ॥ १०३ । ५६ ॥
मिथुने ज्याः = १०७ । ३८ ॥ ११० । ५३ ॥ ११३ । ३८ । ११५ । ५६ ॥ ११७ । ४३ ॥ ११६ । ० ॥ ११६ । ४५ ॥ १२० । १ ॥

अत्रोपपत्तिः । सिद्धान्तग्रन्थे यानि वसुगुणाग्न्यिपावकमिते व्यासार्द्धे चतुर्विंशतिर्ज्या-र्द्धानि पठितानि तानि खार्कमिते व्यासार्द्धे पठितानि—इति सुगमा ॥

१२–१५. इदानीं ज्याखण्डान्याह । मुनयोऽजे व्येकान्त इत्यादि ।

अजे मेषे मुनयः सप्त सप्तस्थाने अन्ते व्येकाः अर्थात् षट्कलाः सन्ति । गवि वृषे स्थानत्रये रसाः षट् स्थानत्रये पञ्च तथा कृताश्चत्वारः । अग्निश्चत्वारश्च । मिथुने शिखी अग्निः एको द्वौ चन्द्र एकः शून्यं च एतेऽङ्का द्विर्द्विर्वारद्वयं ग्राह्याः । अर्थात् स्थानद्वये त्रयः स्थानद्वये द्वौ स्थानद्वये एकः स्थानद्वये च शून्यम् । ज्यार्द्धे ज्याखण्डे एताः कलाः सन्ति । एवं विकलाश्च मेषे प्रथमस्थाने विकलार्द्धशतं सैकं एकपञ्चाशत् द्वितीयादौ क्रमेण पञ्चाशत् । एकेन । इन्द्रियैः पञ्चभिः । ईश्वरैरेकादशभिर्हीना । ततोऽयं त्रिंशत् । द्वात्रिंशतिः । त्रिवर्गो नव । ३१ श्लोकस्यान्तिमश्चरणः १४ श्लोकस्यादिचरणद्वयं च भ्रष्टम् । १४ श्लोक-स्योत्तरार्द्धं चार्तीवासंलग्नं पूर्वार्धस्खलितेन । एवं मिथुने मनवश्चतुर्दश । विषयाः पञ्च । तिथयः पञ्चदश । रसाः षट् । एते त्रिगुणाः । तथा पञ्चाष्टकं स्वरोपेतं सप्तचत्वारिंशत् । सप्तदश । नवपञ्चकं पञ्चचत्वारिंशत् । षोडश चेति विकला ज्ञेयाः ।

एवं मेषे ज्यान्तराणि = ७ । ५१ ॥ ७ । ४६ ॥ ७ । ४५ ॥ ७ । ३६ ॥ ७ । ३० ॥ ७ । २२ । ७ । ६ । ६ । ५५ ॥
वृषे ज्यान्तराणि = ६ । ४० ॥ ६ । २३ ॥ ६ । ४ ॥ ५ । ४४ ॥ ५ । २२ ॥ ५ । ०० ॥ ४ । ३३ ॥ ४ । १० ॥
मिथुने ज्यान्तराणि = ३ । ४२ ॥ ३ । १५ ॥ २ । ४५ ॥ २ । १८ ॥ १ । ४७ ॥ १ । १७ ॥ ० । ४५ ॥ ० । १६ ॥

एतानि ज्यान्तराणि मया पूर्वसाधितज्याभ्यः साधितानि तत्र मेषे स्थानसप्तके आचार्य-लिखितसंख्यका आगच्छन्ति तथा वृषस्य कलाश्च सर्वा आचार्यलिखितकलासमाः । एवं मिथुनस्यापि सर्वाः संख्यास्ता एव या आचार्येण लिखिताः । ततोऽनुमीयते मेषस्याष्टमस्थानीया विकलास्तथा वृषस्य सर्वाः विकला एव १३ श्लोकस्य चतुर्थचरणेन १४ श्लोकेन च व्यक्ता भविष्यन्तीत्यर्थः ॥


१६–१८ इदानीं चन्द्रशरादिकमाह । जीवाब्ध्यर्द्धशतांशा इत्यादि ।

एतेषामाशयः साम्प्रतं मनसि न स्फुरति ।

१९. इदानीं दिग्ज्ञानमाह । शङ्कङ्गुलेति ।

शङ्कङ्गुलविस्तारे द्वादशाङ्गुलविस्तारे वृत्ते केन्द्रे द्वादशाङ्गुलः शङ्कुः स्थाप्यः । तस्योदयकाले छाया पश्चिमदिशि वृत्ताद्बहिर्दूरं याति ततो यथा यथा रविरुन्नतो भवति तथा तथा छायाऽपचयिनी भवति एवं यदा छाया वृत्ते प्रविशति तत्र प्रवेशचिन्हं कार्यं ततो मध्याह्नं यावच्छायाऽपचयिनी भवति ततः पश्चिमकपाले रविर्याति छाया चोपचयिनी पूर्वतो

यति एवं यदा छाया बहिर्निर्गच्छति तच्च निर्गमनचिह्नं कार्यम् । एवं प्रवेशनिर्गमनचिह्नाभ्यां क्रमेण अपरैन्द्रीदिक्सिद्धिः पश्चिमपूर्वदिक्सिद्धिस्ततो यवैर्यवाकारैर्वृत्तद्वयक्षेत्रे योग्योत्तरे कार्ये सामान्तं मत्स्यपदेन यत्क्षेत्रं व्यवह्रियते तदेव यवपदेन व्यवहृतं वराहमिहरेण । यथा पूर्वयुक्त्या कल्प्यते "प" पश्चिमचिह्नं "पू" पूर्वचिह्नं तदा प केन्द्रात् द पू उ वृत्तं पूकेन्द्राच्च द प उ वृत्तं कार्यं तदा वृत्तद्वययोगेन यत् द प उ पू द क्षेत्रं तदेव नवीनैर्मत्स्याकारं वराहमिहरेण यवाकारं चोच्यते । अत्र द उ रेखा दक्षिणोत्तरा रेखा भवति । यदि रविक्रान्तिरेकस्मिन् दिने स्थिरा कल्प्यते तदा छायाप्रवेशनिर्गमनाभ्यां अपरैन्द्रीदिक्सिद्धिर्भवति अत एव भास्कराचार्येण वृत्तेऽभ्रःसुसमीकृतक्षितिगते केन्द्रस्थशङ्कोः क्रमादित्यादिनिजप्रकारेणात्र संस्कारो दत्त इत्यलं पल्लवितेन ॥



२०–२१ इदानीमक्षांशानयनमाह । विषुवद्दिनमध्याह्नेत्यादि ।

विषुवद्दिने मध्याह्ने द्वादशाङ्गुलशङ्कोर्या छाया तद्वर्गात् वेदकृतरूप १४४ युतादान्मूलं तेन मूलेन विषुवच्छायाहतं शतं विंशं पलभागुणितविंशाधिकशतं छिन्द्यं हृतं यल्लब्धं सा विषुवज्जीवाऽक्षज्या स्यात् । अतो यच्चापं सोऽक्षो भवति । अथवा यथेष्टदिने यस्मिन् कस्मिंश्चिद्दिने पूर्ववरीत्या अर्थात् मध्यच्छायाद्वादशवर्गयोगपदेन हृतात् मध्यभाज्यावधात् यच्चापं तन्मेषादिषट्के क्रान्त्या युतं तुलादिषट्के क्रान्त्या रहितं स्वाक्षः स्वीयः पलो भवतीत्यर्थः ।

अत्रोपपत्तिः । विषुवद्दिवसे या माध्याह्निकी छाया सा पलभा भुजो द्वादश कोटिः तद्वर्गयोगपदं पलकर्णोऽस्ततोऽनुपातो यदि पलकर्णे पलभाभुजस्तदा चिज्या १२० कर्णे को भुजो लब्धाऽक्षज्या तच्चापमक्षो भवति इष्टदिने तु मध्यच्छायाद्वादशवर्गयोगात्पदं स मध्यकर्णोऽस्ततोऽनुपातो यदि मध्यकर्णेन मध्यच्छाया भुजो लभ्यते तदा चिज्यया किं जाता मध्यनतांशज्या तच्चापं मध्यनतांशाः ते तूत्तरगोले क्रान्त्यक्षांशान्तरसमा अतो विलोमेन नतांशाः क्रान्त्यंशयुता अक्षांशाः स्युः । दक्षिण गोले च क्रान्त्यक्षांशयोगतुल्या मध्यनतांशा भवन्ति । अतो नतांशाः क्रान्त्यंशरहिता अक्षांशा भवन्ति—इत्युपपन्नम् । परन्तु यदा मध्याह्ने उत्तरगोले उत्तरा नतांशा भवन्ति तदा तु नतांशोनाः क्रान्त्यंशाः पलांशा भवन्तीति ज्ञेयमिति ।

२२. इदानीं मध्याह्नच्छायामाह । अपमोनयुतेत्यादि ।

उत्तरगोले अपमेन क्रान्त्या ऊनो दक्षिणगोले च क्रान्त्या युतोऽक्षः कार्यः । तज्ज्या तत्त्रिज्याकृतिविशेषमूलेन तज्ज्यायाः चिज्यायाश्च यद्वर्गान्तरपदं तेन छिन्द्या हृता द्वादशगुणिता या लब्धिः स्यात्सा माध्याह्निकी छाया मध्याह्नकाले छाया भवतीत्यर्थः ।

अत्रोपपत्तिः । गोलक्रमेण क्रान्त्या हीनयुतोऽक्षो मध्याह्ननतांशा भवन्ति तज्ज्या च नतांशज्या भुजः । तत्त्रिज्यावर्गान्तरात्पदं मध्यशङ्कुः कोटिः । ततोऽनुपातो यदानयाकोट्या नतांशज्या भुजस्तदा द्वादशकोट्या किं लब्धा मध्याह्नकाले छायेत्युपपन्नम् ।

२३. इदानीं लम्बज्यां दिनव्यासं चाह । विषुवज्ज्येति ।

विषुवज्ज्याऽक्षज्या । आयामो विस्तारस्तदर्धं चिज्या तद्वर्गान्तरपदं लम्बो लम्बज्या भवति । एवं क्रान्तिज्याचिज्यावर्गान्तराद्यत्पदं तद् द्विगुणितं तदा दिनव्यासः इत्यर्थः ।

अत्रोपपत्तिः । अक्षज्यावर्गोनस्त्रिज्यावर्गोऽक्षकोटिज्यावर्गस्तन्मूलमक्षकोटिज्या तस्या एव लम्बज्या संज्ञा प्राचीनैः कृता । एवं क्रान्तिज्यावर्गोनात्त्रिज्यावर्गाद्यन्मूलं तदहोरात्रवृत्तस्य व्यासार्द्धं दृज्या तद्द्विगुणमहोरात्रवृत्तव्यासो भवति स एव दिनव्यासपदेन कथ्यत इहाचार्य्येण ।

२४–२५ इदानीं मेषादिक्रान्तिज्यास्तद्दिनव्यासांश्चाह । अजवृषमिथुनेत्यादि ।

वेदाश्चत्वारः । मुनयः सप्त । वसवोऽष्टौ । एते षड्घ्नाः षड्भिर्गुणितास्तदा क्रमेण अजस्य मेषस्य । वृषस्य । मिथुनस्य च अपक्रमजीवाः क्रान्तिज्याः परिज्ञेयाः कदा क्रमेण चतुष्कं चतुर्विंशतिः । तिथिः पञ्चदश । षट्काष्टकमष्टचत्वारिंशत् । एताभिर्विकलाभिरभ्यधिकास्तदा । एवं क्रान्तिज्या = २४ । २४ ॥ ४२ । १५ ॥ ४८ । ४८ ।
मे वृ मि

एवं द्विशती क्रमेण पञ्चविंशता । चतुष्केन चतुर्विंशत्या । सरूपधृत्या एकोनविंशत्या सहिता तदा दिनव्यासो मेषवृषमिथुनानां परन्तु वृषान्त्यो वृषमिथुनसम्बन्धिनौ व्यासौ पञ्चाष्टकतिथिविकलाधिकौ कर्तव्यौ । अर्थात् वृषस्य चत्वारिंशद्विकलाधिकः । मिथुनस्य पञ्चदशविकलाधिकः कर्तव्यः । एवं दिनव्यासः = २३५ ॥ २२४ । ४० ॥ २१६ । १५ ।
मे वृ मि

अत्रोपपत्तिः । चिज्यया १२० यदि जिनज्यासमा परमक्रान्तिज्या लभ्यते तदा मेषज्यया वृषज्यया मिथुनज्यया किमिति । फलं पृथक् पृथक् क्रान्तिज्या तेषां मेषादीनां ताः पाठपठितसमा एवागच्छन्ति । ततस्तद्वर्गोनस्त्रिज्यावर्गो दृज्यावर्गस्तन्मूलं द्विगुणमहोरात्रवृत्तव्यासमानं पाठपठितसममेवेत्युपपन्नम् ।

२६. इदानीं चरानयनमाह । व्यासक्रान्तिज्याघ्नीति ।

विषुवज्ज्या अक्षज्या व्यासक्रान्तिज्याघ्नी व्यासो द्विगुणचिज्या तत्क्रान्तिज्याभ्यां हन्यते या सा व्यासक्रान्तिज्याघ्नी । अर्थात् । द्विगुणचिज्यया क्रान्तिज्यया च साक्षज्या गुणिता ततो लम्बकदृदैर्घ्यहृता लम्बकेन लम्बज्यया दृदैर्घ्येण । अहोरात्रव्यासेन च हृता लब्धा चरज्या स्यात् । तच्चापकलास्त्रिभिर्हृता विघटिका भवन्ति ।

अत्रोपपत्तिः । लम्बज्यया अक्षज्या भुजस्तदा क्रान्तिज्यया किं लब्धा कुज्या ततो दृज्यानुपातेन चरज्या कृता तच्चापकला एवासवो भवन्ति नाडीवृते षड्भिरसुभिरेकं पलं । अतः षड्भिर्विभज्य दिनमानसाधनार्थं द्विगुणितमित्युपपन्नम् ।

२७–२८, इदानीं प्रकारान्तरेणाक्षज्यालम्बज्ये आह । चरखण्डकेत्यादि ।

चरखण्डस्य यः पञ्चांशो द्वितीयांशस्तस्य ज्यया हन्यते योऽसौ चरखण्डपञ्चांशज्याघ्नः । एतादृशो योऽहर्व्यासः । अहोरात्रव्यासस्तं खखिने २४० रुद्धरेल्लब्धा भूजीवा कुज्या भवेत् ।

तत्कुज्याक्रान्तिज्यावर्गयोगाद्यन्मूलं तेन व्यासार्द्धगुणां क्षितिज्यां विभजेत् । अवाप्तं लब्धाक्षज्या भवेत् । ततोऽक्षांशोना या नवतिस्तस्याः क्रमशो ज्या क्रमज्या लम्बको लम्बज्या भवति । अत्रोपपत्तिः । पूर्वं चरखण्डकं द्विगुणं कृतमतस्तदर्द्धस्य ज्या चरज्या जाता ततः कुज्याज्ञानार्थमनुपातः । यदि चिज्यया चरज्या तदा द्युज्यया किं जाता कुज्या $= \frac{\text{ज्याच} \times \text{ज्याद्यु}}{\text{ज्यात्रि}}$ $= \frac{\text{ज्याच} \times २ \text{ज्याद्यु}}{२ \times १२०}$ अत उपपन्नं कुज्यानयनम् । अथ कुज्या भुजः क्रान्तिज्याकोटिस्तद्वर्गयोगपदमग्रा कर्णः । इदमक्षवेचमतोऽनुपातः । यद्यग्राकर्णेन कुज्या भुजो लभ्यते तदा चिज्याकर्णेन किं जाताऽक्षज्या ततो लम्बज्यानयनमतिसुगममित्युपपन्नं सर्वम् ।

२९–३० इदानीं लङ्कोदयानाह । मेषाद्यपक्रमज्येत्यादि ।

मेषादीनां मेषवृषमिथुनानां ज्यावर्गस्तदीयापक्रमज्यावर्गश्च यस्तद्वर्गविश्लेषाद्यन्मूलं तेन गुणो विस्तारो व्यासस्तस्माद्द्युज्यासङ्गुणाद्यच्चापं तद्दिग्१०घ्नं तदा राश्युद्गमविनाड्यः राश्युदयपलानि स्युः । अत्र चापमंशाद्यं ग्राह्यम् । एवमत्र क्रमेण मेषस्योदयमानं वसुमुनिपक्षाः २०८ वृषस्य व्येकं शतत्रयं २९९ मिथुनस्य त्रिद्व्येकाग्नयः ३२३ इत्यजान्मेषात्त्रयाणां त एव वामा विपरीताः कर्किसिंहकन्यानां अर्थात् कर्किणः = ३२३ सिंहस्य = २९९ कन्यायाः = २०८ एवमेते षट् उत्क्रमात् स्याप्यास्तदा तुलाद्यर्द्धे तुलादिषट्के राश्युदयमानानि स्युः । एवं तुलायाः = २०८ । वृश्चिकस्य = २९९ । धनुषः = ३२३ । मकरस्य = ३२३ । कुम्भस्य = २९९ मीनस्य = २०८ एते निरक्षोदयाः सन्ति ।

अत्रोपपत्तिः । क्रान्तिवृत्ते संपातान्मेषादिज्या कर्णस्तत्क्रान्तिज्या लङ्काक्षितिजे भुजस्तद्वर्गान्तरपदं तदहोरात्रवृत्ते कोटिरेवोदयज्या तच्चापार्थं चिज्यावृत्ते परिणाम्यते द्युज्यया यदि पूर्वोक्ता कोटिस्तदा चिज्यया किं अत्र गुणकस्थाने द्विगुणचिज्या गृहीताऽतो द्युज्या च द्विगुणिता भाजकस्थाने ततस्तच्चापमंशाद्यं षड्भिर्हृतं घट्यादयं जातं पलार्थं षष्टिगुणितं पूर्वं चापस्य षट् भागहारः । इदानीं षष्टिर्गुणकारः । अतः षड्भिरपवर्त्य जातो दशमितो गुणः । एवमेतानि पलानि सम्पातत आगच्छन्ति । अधोऽधो विशोधनेन वसुमुनिपक्षा इत्यादय उत्पद्यन्त इत्युपपन्नं सर्वम् ।

३१. इदानीं स्वदेशोदयानाह । चरकालेति ।

ते निरक्षोदयास्त्रयो मेषादिचयचरकालदलेन क्षीणा हीनाः कार्याः । तथाऽन्ये त्रयः कर्क्यादिचयस्तैर्विपरीतैश्चरकालदलैः संयुतास्तदा मेषादिषण्णां स्वदेशोदया भवन्ति । त एव विपरीतास्तुलादिषण्णाम् ।

यथा काश्यां मेषादिचरकालदलपलानि ५७ । ४६ । १९

	मे	वृ	मि	क	सिं	कन्या
ततो निरक्षोदयाः =	२०८ ।	२९९ ।	३२३ ।	३२३ ।	२९९ ।	२०८ ।
चरकालद =	५७ ।	४६ ।	१९ ।	१९ ।	४६ ।	५७
काश्यामुदयाः =	२२१ ।	२५३ ।	३०४ ।	३४२ ।	३४५ ।	३३५ ।

एत एव विपरीतास्तुलादिषण्णाम् । एवं येन कालेन यो राशिरुदेति तत्सप्तमस्तेन कालेनास्तं याति ।

अत्रोपपत्तिः । गोलयन्त्रविलोकनेनैव स्फुटा यतो निरक्षस्वदेशोदययोरन्तरे चरकालदलमेव भवति तेनैव चरसंस्कारेण स्वदेशोदयाः सिध्यन्ति । एवं क्रान्तिवृत्तस्य यः प्रदेशः पूर्वक्षितिजे भवति तत्सप्तमस्त्वस्तक्षितिजे तेन यस्य राशेर्यदुदयमानं तत्सप्तमस्य तदेवास्तमानमित्युपपन्नम् ।

३२–३३. इदानीं समशङ्कुमाह । इष्टोत्तरगोलेत्यादि ।

इष्टा उत्तरगोलीयाऽपक्रमांशज्या या सा खभास्करै१२०स्त्रिज्ययाऽभ्यस्ता गुणिता सामक्षजीवया हृत्वा यल्लब्धं तल्लम्बापादुदयेन यः कालः । एतदुक्तं भवति । लब्धस्य चापसमा उदयानन्तरं यदा रवेरुन्नतांशास्तदा यः कालस्तस्मिन् समये दिनकृद्रविः सममण्डलसंस्थं सममण्डलप्रवेशं करोते । दिनार्द्धे तावच्छेषे अर्थात् दिनदलं तावता कालेन हीनं यच्छेषं तावति परतः पश्चिमकपाले नते पुनः सममण्डलं प्रविशति रविरेतत्सर्वं तुलादिषट्के न भवति यतस्तुलादिषट्कस्थे रवौ दिने सममण्डलप्रवेशाभाव इत्यर्थः ।

अत्रोपपत्तिः । क्रान्तिज्या भुजः कुज्योना तद्धृतिः कोटिः समशङ्कुः कर्णः । इदमक्षचेक्षमतोऽनुपातो यद्यक्षज्यया चिज्या १२० समः कर्णस्तदा क्रान्तिज्यया किं लब्धः समशङ्कुस्तल्लम्बं च सममण्डलीयोन्नतांशास्ते यस्मिन् काले भवन्ति तस्मिन् काले रविः समण्डलं यात्येव । यद्येकस्मिन् दिने रविक्रान्तिः स्थिरा कल्प्यते तदा तावति शेषे दिनदले परतः पश्चिमकपाले पुनः सममण्डलं प्रविशति दिनमणिरित्युपपन्नम् । तुलादिषट्के दक्षिणगोले क्षितिजादुपरि अहोरात्रसममण्डलयोर्न योगः । अत एतत्सर्वं तुलादिषट्के न भवतीति ।

३४. इदानीं चरमाह । खजिनघ्नेति ।

क्रान्तिज्या खजिनै २४० द्विगुणत्रिज्यया निघ्नी ध्रुवेण अक्षज्यया च गुणा लम्बज्यया हृता ततो द्युदैर्घ्येण द्विगुणद्युज्यया च हृता फलचापस्य सकलः सम्पूर्णः षष्ठांशः स एव दिनवृद्धुर्द्धः दिनवृद्धुर्यं खण्डः । अर्थात् चरं स्यादिति ।

अत्रोपपत्तिः । क्रान्तिज्या कोटिः कुज्याहोरात्रवृत्ते भुजः क्षितिजे ऽयाकर्णं इदमक्षचेक्षमतोऽनुपातो यदि लम्बज्यया कोट्या अक्षज्याभुजस्तदा क्रान्तिज्यया किं जाता कुज्या त्रिज्यावृत्तपरिणामार्थं द्युज्यानुपातः कृतस्तच्च द्युज्या त्रिज्या च द्विगुणिता फलाविशेषादित्युपपन्नम् ।

३५. इदानीं समशङ्कुमाह । उत्तरगोल इति ।

उत्तरगोलेऽर्कज्या रवेर्भुजज्या काष्ठान्तेन जिनज्यया गुणा ततो ध्रुवज्यया अक्षज्यया भक्ता तदा शङ्कुलिप्तिका भवन्ति । ताभिः शङ्कुलिप्तिकाभिः सममण्डलच्छाया साध्या । अर्थात् त्रिज्या द्वादशगुणा शङ्कुभक्ता छायाकर्णः स्यात्तद्द्वादशवर्गान्तरपदं छाया स्यादिति ।

अत्रोपपत्तिः । यदि त्रिज्यातुल्यदोर्ज्यया जिनज्यासमा क्रान्तिज्या तदाऽर्कदोर्ज्यया किं जाता क्रान्तिज्या $= \frac{\text{जिज्या} \cdot \text{दोर्ज्या}}{\text{त्रि}}$ पुनर्यदि अक्षज्याभुजेन चिज्याकर्णस्तदा क्रान्तिज्याभुजेन किं जातः समशङ्कुः । यतः क्रान्तिज्याभुजः कुज्योना तद्धृतिः कोटिः समशङ्कुः कर्णः । इदमक्षक्षेत्रं वर्तते । एवं समशङ्कुः $= \frac{\text{क्रान्तिज्या} \times \text{त्रि}}{\text{अज्या}} = \frac{\text{जिज्या} \cdot \text{दोर्ज्या} \times \text{त्रि}}{\text{त्रि} \times \text{अज्या}} = \frac{\text{जिज्या} \cdot \text{दोर्ज्या}}{\text{अज्या}}$ अत उपपन्नम् ।

३६–३७ इदानीमस्य प्रकारस्योत्कर्षतामाह । सममण्डललेखेत्यादि ।

यो गणकः । अर्कस्य सममण्डललेखासंप्रवेशवेलां करोति । सममण्डले पूर्वापरवृत्ते या लेखा गणना तस्यां यः प्रवेशकालः । तं कालं करोति साधयति । अस्मिन् समये रविः सममण्डलं यास्यति—इति यः कथयति तथा तस्य कालस्य प्रत्ययं विश्वासं च जनयति स एव सम्यक् भास्करं सूर्यं जानाति ॥ अन्यथा यदि एकेन वर्षेण रविरेकं भगणं भुङ्क्ते तदा यथेष्टदिनैः किमित्यनुपातेन लोष्ट्रेन खटिकादिखण्डेन कृता या रेखास्ताभिरज्ञोऽपि मूर्खोऽपि किं रविं न गणयति—इत्यत्र काकुः । अर्थात् तेनानुपातेन मूर्खोऽपि गणयति रविमतः सममण्डलप्रवेशवेलादिविश्वासोत्पादनेनैव पाण्डित्यमुत्पद्यत इति ग्रन्थकृतोऽभिप्राय इति ।

३८. इदानीं सममण्डलप्रवेशपरीक्षामाह । कृतदिग्ग्रहण इति ।

कृतदिग्ग्रहणे रचितपूर्वापरादिदिक्चिन्हे वृत्ते शङ्कोश्छाया यदा पूर्वापरां रेखां प्रविशति तदा सूर्यः सममण्डलगतः स्यादिति ज्ञेयम् । यतो यदा रविः सममण्डलं प्रविशति तदा सममण्डलमेव दृङ्मण्डलं छाया च सदा दृङ्मण्डलधरातले पतति । अतो दृङ्मण्डलधरातलगतायां पूर्वापररेखायां तदा छाया निपततीति ।

३९. इदानीमयानयनमाह । इष्टक्रान्तिज्याघ्नेति ।

इष्टक्रान्तिज्यया हन्यते यद्व्यासशकलं चिज्या तदिष्टक्रान्तिज्याघ्नव्यासशकलं ततो लम्बकेन लम्बज्यया हृते योंऽशो लब्धिः सा या तावतान्तरेण पूर्वापररेखामतीत्यापहाय रविरस्तं वोदयं याति क्षितिजे इत्याध्याहार्यम् ।

अत्रोपपत्तिः । क्षितिजे पूर्वापरचिह्नतो यावतान्तरेण दक्षिणमुत्तरं वाभीष्टदिने रविरुदेति प्रतितिष्ठति वा तज्ज्याऽयेति प्राचीनानां संज्ञा । सा या कर्णः । कुज्या भुजः । क्रान्तिज्या कोटिरित्यक्षक्षेत्रमतोऽनुपातो यदि लम्बज्याकोट्या चिज्याकर्णस्तदा क्रान्तिज्याकोट्या किं लब्ध्याऽया तावतान्तरेण रविः पूर्वापररेखामतीत्योदेति प्रतितिष्ठति वेत्ययापरिभाषयैव सिध्यतीत्युपपन्नम् ।

४०. इदानीं प्रकारान्तरेणाक्षानयनमाह । तेन हृतेति ।

खार्कघ्नी विंशत्यधिकशतेन गुणा क्रान्तिज्या तेन पूर्वाऽऽगतेनाऽयाप्रमाणेन हृता लब्धिर्लम्बको लम्बज्या स्यात्ततोऽस्य लम्बकस्य यच्चापं तेन नवतिर्हीना यच्छेषं तेऽक्षभागाः पलांशाः स्युरित्यर्थः ।

अत्रोपपत्तिः । पूर्वप्रकारवैपरीत्येन अयाकर्णेन क्रान्तिज्याकोटिस्तदा चिज्याकर्णेन का कोटिर्जाता लम्बज्या तच्चापमक्षांशकोटिस्ततस्तेन हीना नवतिरक्षांशाः स्युरित्युपपन्नम् ।

४१–४४. इदानीमिष्टच्छायानयनमाह । तत्कालचरेत्यादि ।

इष्टकाले चरस्य या विनाड्यो विपलास्तासां यो द्विदशांशो विंशत्यंशः । तं द्विष्ठं स्थानद्वये संस्थाप्य अजतुलाद्येषु उत्तरदक्षिणगोलयोः क्रमेण षड्गुणिताभ्य इष्टनाडीभ्यो जह्यात् वियोजयेत् संयोजयेत् च । एवं कृते यच्छेषं तज्ज्या स्थितज्यया पूर्वस्थापितचर-विनाडीविंशत्यंशज्यया गोलक्रमेणैवाजतुलाद्येषु युता वियुता च कार्या । यदा तु घटिकानां जीवाऽपेक्षिता तदा अविशोधनेन चरसंस्कारं विनैव षड्गुणितानां तासां घटीनां जीवा कर्त्तव्या । अथ पूर्वसिद्धा या चरज्यासंस्कृततच्छेषज्या तां कृत्वा संसाध्य द्युव्यासेन अहो-रात्रवृत्तव्यासेन किं विशिष्टेन अवलम्बकघ्नेन लम्बज्यागुणितेन हन्यात्ततः खखाष्टवस्वश्विभिः २८८०० छिन्द्याद्विभजेत्फलं शङ्कुलिप्राख्यं स्यात् । ततः खखवेदसमुद्रशीतरश्मीनां १४४०० तत्कृतिविनाकृतानां तच्छङ्कुलिप्रावर्गरहितानां यत्पदं तदर्कघ्नं द्वादशगुणं पूर्वागतशङ्कुलिप्रो-द्धृतं फलं छाया स्यादित्यर्थः ।

अत्रोपपत्तिः । पूर्वं यच्चरमाचार्येण विनाड्यात्मकं साधितं तद्विनमानसाधनार्थं द्विगुणितमतो विनाड्यात्मकं चरं द्विभक्तं वास्तवं चरं घटीकरणार्थं षष्टिहृतं तदा चघ $= \frac{\text{चविना}}{२ \times ६०}$ इदं घट्यात्मकं चरमंशसाधनार्थं षड्गुणितं यत एकस्यां घटिकायामंशषट्कं भवति । एवं चरांशाः $= \frac{\text{चविना} \times ६}{२ \times ६०} = \frac{\text{चविना}}{२०}$ ।

अथ षड्गुणितेष्टनाड्यस्तदंशास्तेभ्यश्चरांशा उत्तरगोले शोध्या दक्षिणगोले तु युताः शेषांशा अहोरात्रवृत्ते उन्मण्डलाद्भूहावधि भवन्ति तज्ज्यायाः सूचसंज्ञा भास्करादिभिर्विहिता तत्सूचमुत्तरगोले चरज्यया युतं दक्षिणे हीनमिष्टान्त्या स्यात् । तत इष्टकृतिकरणायानु-पातः । यदि त्रिज्यया इष्टान्त्या तदा द्युज्यया किं जाता इष्टकृतिः $= \frac{\text{इष्टान्त्या} \times \text{द्युज्या}}{१२०}$ $= \frac{\text{इष्टान्त्या} \times २\,\text{द्युज्या}}{२४०}$ । अथेष्टकृतिः कर्णः । शङ्कुः कोटिः । शङ्कुतलं भुज इत्यत्रत्वेचम् । ततो-ऽनुपातः । यदि त्रिज्याकर्णेन लम्बज्याकोटिस्तद्वेष्टकृत्या किं जात इष्टशङ्कुः $= \frac{\text{इष्टान्त्या} \times २\,\text{द्युज्या} \times \text{लंज्या}}{२४० \times १२०} = \frac{\text{इष्टान्त्या} \times २\,\text{द्युज्या} \times \text{लंज्या}}{२८८००}$ अतः शङ्कुनयनमुपपन्नम् । अथ शङ्कु-वर्गोनस्त्रिज्यावर्गो दृग्ज्यावर्गस्तन्मूलं दृग्ज्या $= \sqrt{\text{त्रि}^२ - \text{शं}^२} = \sqrt{१४४०० - \text{शं}^२}$ । पुनर-नुपातो यदि शङ्कुकोट्या दृग्ज्याभुजस्तदा द्वादशाङ्गुलकोट्या किं जाता छायेति सर्वं निरवद्यम् ।

४५–४७. इदानीं छायात इष्टकालमाह । छायाद्वादशेत्यादि ।

छायाया द्वादशानां च वर्गयोगात्पदं यत्तेन किं विशिष्टेन लम्बकघ्नेन लम्बज्यागुणितेन खखवस्वश्विमुनीन्दोः १०२८०० सकाशाद्विभज्य या लब्धिः स्यात्सा प्रथमजीवासंज्ञा ज्ञेया । तस्मिन् दिने या क्रान्तिज्या तया विषुवज्या । अत्रज्या निघ्नी लम्बज्ययोद्धृता च । अत्र या लब्धिः सा पृथक् स्थाप्या । मेषादिषट्के रवौ सा प्रथमज्या, अधुनानीतया लब्ध्या

विश्लेष्या । अन्यच तुलादिषट्के तु संयुता । ततः सा संस्कृतप्रथमज्या पूर्वस्थापितज्या च एते द्वे खजिनैर्२४०र्द्विगुणचिज्यया गुणिते द्युज्यासेन द्विगुणद्युज्यया भाजिते च ततो ये द्वे चापे ते अजतुलादिषु उत्तरदक्षिणगोलयोर्युतवियुते च । अर्थात् उत्तरगोले तयोर्योगो दक्षिणोऽन्तरं च यत्तदंशाः षड्धृता लब्धा नाडिका भवन्तीत्यर्थः ।

अत्रोपपत्तिः । छायाद्वादशवर्गयोगान्मूलं छायाकर्णस्ततोऽनुपातः । छायाकर्णेन द्वादशकोटिस्तदा चिज्याकर्णेन किं जात इष्टशङ्कुः । ततो यदि लम्बज्यया कोट्या चिज्याकर्णस्तदा इष्टशङ्ककोट्या किं जातेष्टकृतिस्तस्या एव संज्ञा प्रथमज्या आचार्यैः कृता । एवं प्रथमज्या $= \frac{१२ \times त्रि^२}{छाक \times लंज्या} = \frac{१२ \times (१२०)^२}{छाक \times लंज्या} = \frac{१७२८००}{छाक \times लंज्या}$ अत उपपन्नं प्रथमज्यानयनम् । अथ कुज्यात्रानार्थमनुपातो यदि लम्बज्याकोट्या अत्रज्याभुजस्तदा क्रान्तिज्यया किं जाता कुज्या सा च पृथक् स्थापिता । उत्तरगोले इष्टकृतिः कुज्यया हीना दक्षिणे युता उन्मण्डलाद्व्यवधि—अहोरात्रवृत्ते ज्या सैव च साम्प्रतं भास्कराचार्यादिमते कला संज्ञा । अथैते कलाकुज्ये चिज्यावृत्तपरिगते सूत्रचरज्ये आचार्येण कृते तत उत्तरगोले तत्रापयोगांशा दक्षिणे वियोगांशाः क्षितिजादिष्टघटीनामंशास्ते षड्विहृता लब्धा नाड्यो भवन्तीत्युपपन्नम् ।

४८ इदानीं प्रकारान्तरेणेष्टकालमाह । षड्घ्न इति ।

अथवा प्रकारान्तरेणेष्टकालज्ञानं । द्युमाने दिनप्रमाणे षड्घ्ने षड्गुणिते छायाङ्गुलैः किं भूतैर्विमाध्याह्नैर्मध्यच्छायारहितैः पुनः किं भूतैः सद्वादशैर्द्वादशयुक्तैश्छिन्ने हृते लब्धाः प्राक्कपाले गताः पश्चिमे शेषा गम्या नाड्यो भवन्ति—इति ।

अत्रोपपत्तिः । अत्राचार्येणायमनुपातः कृतो यदि मध्यच्छायारहितद्वादशेष्टच्छायायोगो द्वादशसमस्तदा दिनार्द्धसमा इष्टनाड्यो भवन्ति । अथ मध्यच्छायारहितद्वादशेष्टच्छायायोगो यदा केन चिदिष्टाङ्केन समस्तदा का नाड्यः । इत्यत्र व्यस्तानुपातेन इष्टनाड्यः $= \frac{१२ \times \frac{दि}{२}}{१२ + इछा - मछा} = \frac{६ दि}{१२ + इछा - मछा}$ अत उपपन्नम् । एतद्व्यस्तानुपातेन या नाड्यः समायान्ति ताः स्थूला यतोऽयमनुपातो नहि समीचीनः । आचार्येण च वसिष्ठोक्तिवच्चकटिति कालज्ञानार्थं स्थूलमपि सुखार्थं प्रकारान्तरं निर्मितं सूक्ष्मार्थं तु प्रथमविधिरेव विधेय इति । गतगम्यवासना चातिसुगमेति सर्वं निरवद्यम् । साम्प्रतकालेऽपि भारतवर्षे गाणितिका द्राक् कालज्ञानार्थम् ।

छाया निजेष्टा दिनमध्यभागच्छायोनिता दिक् १० सहिता तयाप्ते ।
दिने शरघ्ने गतगम्यनाडीः श्रीमान् वराहो वदति स्वयुक्त्या ॥

इत्यस्य श्लोकस्य विधिं स्वीकुर्वन्ति परन्त्वत्र द्वादशस्थाने दशसंख्यां गृहीत्वा विधिः प्रदर्शितोऽस्ति । एतद्विधिश्च कुत्र वराहेण लिखित इति न ज्ञायते केवलं परम्परातः श्रूयते श्लोके च वराह इति नामाऽवलोक्यत इति ।

४९. इदानीं कालाच्छायानयनमाह । छायार्कीति ।

षड्गुणितं दिनमानं नाडीभिरिष्टघटीभिरुद्धरेत् तच्च यल्लब्धं भवेत्तद्द्वादशहीनं ततो मध्याह्नच्छायया सहितं कार्य्यं तदा आर्की रविसम्बन्धिनी छाया स्यादिति ।

अत्रोपपत्तिः पूर्वप्रकारवैपरीत्येन । तद्यथा पूर्वप्रकारेण इनाडी $= \frac{६ \text{ दि}}{१२ + \text{इछा} - \text{मछा}}$

$\therefore$ इना $(१२ + \text{इछा} - \text{मछा}) = ६$ दि ततः $१२ + \text{इछा} - \text{मछा} = \frac{६ \text{ दि}}{\text{इना}} = \text{ल}$

अस्मात् इछा $=$ ल $+$ मछा $- १२$ अत उपपन्नं सर्वम् ।

५०–इदानीं चन्द्रच्छायानयनमाह । दृष्टा नाड्य इति ।

इष्टसमये ये इष्टघटिका दृष्टाः स्युस्ताश्चन्द्रोदयनाडिकाभिर्युता यदि दिने इष्टघटिकाः स्युः । रात्रौ चेत्तदा विहीनास्तत आभिरिष्टघटिकाभिस्तत्कालेन्दोः सकाशात्तथैव छाया साध्या यथा पूर्वं भानोः सूर्यस्य साधिताऽस्ति ।

अत्रोपपत्तिः । कल्प्यते सूर्योदयात्प्रागेव चन्द्रोदयः सूर्योदयसमये च घटिकाचतुष्टयं चन्द्रस्योन्नतकालः एता घटिका एव चन्द्रोदयनाडिकाः । ततः सूर्योदयानन्तरं या इष्टघटिकास्ता दृष्टा घटिकाश्चन्द्रोदयनाडिकायुताः । चन्द्रोदयादिष्टघटिका भवन्ति ता एव चन्द्रोन्नतघटिकास्ततः पूर्ववद्भानोरिव छाया साध्या । एवं सूर्यानन्तरं यदि चन्द्रोदयकालस्तदान्तरेण चन्द्रोन्नतकालो भवतीत्युपपन्नम् ।

५१ इदानीं चन्द्रस्य क्रान्त्यादिसाधनमाह । चरनाडीति ।

पूर्वं चरनाड्यादीनां क्रमेण यो विधिः सूर्यस्य दिनमानादिके प्रतिपादितस्तेनैव विधिनाऽत्रापि दृग्ज्यासाधक्रमादि ज्ञेयम् । एवं यथा सूर्योदयाच्चन्द्रोन्नतघटिकादिज्ञानं कृतं तथैवास्तमयेऽपि ऊर्ध्वलिखितविधिर्ज्ञेयः । एवं शेषाणां ग्रहाणामपि युक्तितः सर्वं छायादिकं चिन्त्यं यतो भौमादिकानां छाया नोपलभ्यते । अत आचार्येण युक्त्या चिन्त्यमित्युक्तम् ।

अत्रोपपत्तिः सुगमा । यतो यथा रवेश्चरज्ञानात्पूर्वं सर्वं वस्तु साधितं तथा चन्द्रचरज्ञानात्तत्सर्वं चन्द्रस्य भवतीति प्रसिद्धम् ।

५२–५४ इदानीं कोटिसाधनमाह । छायार्कवर्गयोगादित्यादि ।

अर्कसङ्गुणा द्वादशगुणा चिज्या छायार्कवर्गयोगपदेन कर्णाख्येन विभाज्या लब्धिर्विषुवज्जीवयाऽत्रज्यया गुणिता लम्बकेन लम्बज्यया भक्ता पृथक् स्थाप्या । पुनः काष्ठा परमक्रान्तिज्या । अर्कभोर्व्या रविभुजज्यया कथं भूतया लम्बकहृतया लम्बज्याहृतया हृता तदा सूर्यायाः स्यात् । अथ पूर्वागतया लब्ध्या मेषतुलादिषट्कयोः क्रमेण सूर्यायाः विहीनयुक्ता शेषसंख्या कर्णेन छायाकर्णेन गुणिता चिज्यया हृता लब्धाङ्गुलानि कोटिः । तस्याश्छायायाश्च वर्गान्तराद् यन्मूलं स बाहुः स्यात् । दिग्ग्रहणे स एव भुजः समं पूर्वापरं तत् कोट्या ऋजु सरलं देयमिति ।

अत्रोपपत्तिः । छायार्कवर्गयोगः कर्णः प्रसिद्धस्ततोऽनुपातो यदि छायाकर्णेन द्वादशकोटिस्तदा चिज्याकर्णेन किं लब्धोन्नतज्या स एव शङ्कुस्ततः शङ्कुतलज्ञानार्थमनुपातो यदि लम्बज्याकोट्याऽत्रज्या भुजस्तदा शङ्कुना किं लब्धिः शङ्कुतलं पृथक् स्थाप्यम् । अथ चिज्यया परक्रान्तिज्या तदा रविदोर्ज्यया किं जातेष्टक्रान्तिज्या पुनर्यदि लम्बज्याकोट्या चिज्याकर्णस्तदा क्रान्तिज्यया किं जाताऽग्रा $= \frac{\text{रज्या} \times \text{जिज्या}}{\text{त्रिज्या}} \times \frac{\text{त्रिज्या}}{\text{लंज्या}} = \frac{\text{रज्या} \times \text{जिज्या}}{\text{लंज्या}}$ । तत उत्तरगोले अग्राशङ्कुतलयोर्वियोगे दक्षिणगोले योगे भुजः । भुजो नाम शङ्कुमूलपूर्वापररेखयोरन्तरमग्रेदमन्तरं महाशङ्कुसम्बन्धि लघुशङ्कुसम्बन्धिकरणायानुपातः । चिज्ययेदमन्तरं तदा छायाकर्णेन किं जातं लघु द्वादशाङ्गुलशङ्कुमूलप्राच्यपरयोरन्तरं नवीनानां साम्प्रतं मते भुजसंज्ञम् । आचार्यमते च कोटिसंज्ञम् । अथ द्वादशाङ्गुलशङ्कुस्तथा स्थाप्यो यथा छायायं दिङ्मध्ये पतति तदा शङ्कुमूलप्राच्यपरयोरन्तरं अधुनानीतं कोटिरूपं भवति । अथ तदैव यदि शङ्कुर्दिङ्मध्ये स्थाप्यते तदा पूर्वानीतान्तरसममेव दिग्वैपरीत्येन छायाग्रप्राच्यपरयोरन्तरं कोटिरूपं स्यात् ततः कोटिच्छाययोर्वर्गान्तरं पूर्वापररेखायां भुजरूपं स्यात् । दिग्ग्रहणे भुज एव समं पूर्वापरसूत्रं तच्च कोट्या ऋजु तिर्यग्रूपं देयं भवत्येवेति सर्वमुपपन्नम् ।

५५–५६. इदानीं बेधेन रविज्ञानमाह । छायासमरेखेत्यादि ।

छायापूर्वापररेखयोरन्तरं कोटिरूपं यत् तेन चिज्या गुणिता स्वच्छायाकर्णेन भक्ता । अस्या लब्धेः पूर्वागतशङ्कुतललब्धेश्च एकत्वे । एकदिशि विश्लेषः । अन्तरं कर्तव्यम् । अन्यत्वे भिन्नदिशि च योगस्तदा सूर्याग्रा स्यात् । अथ सूर्याग्रा लम्बकेन लम्बज्यया गुणिता काष्ठामौर्व्या परक्रान्तिज्यया भाज्या अतश्चापं कर्तव्यमित्यध्याहार्यं तदा रविः स्यात् । अनेन सूर्योद्भवेन सूर्योत्पन्नकारिणा विधिना । अन्येऽपि ग्रहाः कर्तव्या इत्यर्थः ।


अत्रोपपत्तिः । पूर्वकथितप्रकारवैपरीत्येन यतश्छायासमरेखान्तरं चिज्यागुणं छायाकर्णहृतं तदा महाशङ्कुसंबन्धी भुजस्ततो भुजशङ्कुतलयोः संस्कारे सूर्याग्रा भवति ततोऽत्रत्वचत्वादनुपातः । चिज्यया लम्बज्या कोटिस्तदा सूर्याग्रया किं जाता क्रान्तिज्या $= \frac{\text{अग्रा} \times \text{लंज्या}}{\text{त्रिज्या}}$, पुनः परक्रान्तिज्यया यदि चिज्यातुल्या रविदोर्ज्या तदेष्टक्रान्तिज्यया किं जाता रविभुजज्या $= \frac{\text{क्रांज्या} \times \text{त्रिज्या}}{\text{जिज्या}} = \frac{\text{अग्रा} \times \text{लंज्या}}{\text{त्रिज्या}} \times \frac{\text{त्रिज्या}}{\text{जिज्या}} = \frac{\text{अग्रा} \times \text{लंज्या}}{\text{जिज्या}}$ अस्या धनूरविभुजांशा भवन्ति । अनयैव युक्त्या ग्रहाणामपमान् संसाध्य ग्रहज्ञानं भवतीति सर्वमुपपन्नम् ।

इति करणे चतुर्थोऽध्यायः समाप्तः ।

१-३ इदानीं प्रतिपदान्ते चन्द्रदर्शनज्ञानमाह । अपमान्तरेत्यादि ।

शशाङ्करविबिवरं चन्द्रसूर्ययोरन्तरमेकच अपमान्तरेण रविचन्द्रयोः क्रान्त्यन्तरेण संयुक्तमन्यच हीनं ततस्तयोर्घाताद्यन्मूलं तेन क्रान्त्यन्तरं छिन्नं भक्तं विक्षेपेण चन्द्रस्य शरेण गुणितं च फलं यदि क्रान्त्यन्तरदिक्कः शरस्तदा इन्दुर्कविशेषाच्चन्द्रसूर्यान्तराच्छोध्यमन्यथा देयमर्थाद्योज्यम् । इदं सायं सन्ध्यायां कर्त्तव्यं पूर्वसन्ध्यायां प्रातः सन्ध्यायां तु विपरीतं कर्त्तव्यं यच फलं शोध्यं तच देयं यच देयं तच च शोध्यमित्यर्थः । अथेदं संस्कृतं रविचन्द्रयोरन्तरं चापात्मकं दिनकृतः सूर्यस्य सप्तमभवनवशेन सप्तमराश्युदयमानेन यदि नाडिकाद्वयेनोदयं याति तदा विमले निर्मले वियति आकाशे इन्दोश्चन्द्रस्य आलोकं दर्शनं लोकस्य प्राणिन आयातीत्यर्थः ।

अत्रोपपत्तिः । कल्प्यते स्थार क्रान्तिवृत्ते रविचन्द्रस्थानयोश्चापात्मकमन्तरं स्था चन्द्रस्थानं च चन्द्रबिम्बं स्थाच चन्द्रस्योत्तरः शरः । स्थाअ नाडीवृत्तसमानान्तरं स्थानीयाहोरात्रवृत्तम् । अर ध्रुवप्रोते रविचन्द्रयोः क्रान्त्यन्तरं चस चन्द्रबिम्बोपरि ध्रुवप्रोतवृत्तम् । अथ सर्वाणि चापानि सरलरेखारूपाणि प्रकल्प्य स्थाअर जात्यत्रिभुजं सस्थाच जात्यत्रिभुजं कल्पितम् ।



ततः स्थाअ $= \sqrt{\text{स्थार}^2 - \text{अर}^2} = \sqrt{(\text{स्थार} + \text{अर})(\text{स्थार} - \text{अर})}$

अथ अर, चस ध्रुवप्रोते यदा सरलरेखाकारे तदा मिथः समानान्तरे जाते तेन $<$स्थारअ $=<$चसस्था । अतो जात्यद्वयं मिथः सजातीयं जातं ततोऽनुपातेन सस्था $= \frac{\text{अर} \times \text{स्थाच}}{\text{स्थाअ}}$ । अत्र रविस्थानादुत्तरे विधुरुत्तरः शरश्च तेन रवीन्दुन्तरे स्थारसंज्ञके पूर्वागतफलस्य वियोजने जातं सर समं संस्कृतमन्तरं भिन्नदिशि शरे स्थाचसंज्ञके तु योजने सरसमं संस्कृतमन्तरं भवति । अथोदये येन शरेण यावानुन्नतो ग्रहो भवति तावानेवास्तक्षितिजे नतो भवतीति पूर्वसन्ध्यायां विपरीतं कथितम् । यदा रविरस्तमेति तदा तत्सप्तमराशिः पूर्वक्षितिजे ह्युदेति तदा तत्संस्कृतान्तरावयवस्तत्सप्तमराशेर्यावता कालेनोदेति तावतैव कालेन चन्द्रोऽस्तं गच्छति । एवं यदा स कालो घटिकाद्वयसमानस्तदा रविचन्द्रयोः कालांशान्तरितत्वाच्चन्द्रदर्शनं भवतीति सर्वं निरवद्यम् ।


४. इदानीमुदक्क्रियोन्नते फलं शुक्लसाधनं चाह । द्विगुणोच्चेति ।

यदा उडुगणाधिपतेश्चन्द्रस्य शङ्कुमुदगुन्नतं स्यात्तदा इच्छा मनोरथो द्विगुणः । अतिथीनामंशो भागश्च स्यात् । अथ कर्णोद्यो द्विषट्कांशो द्वादशांशस्तच्छुक्लं शुक्लाङ्गुलं भवेदिदं भुजाद्वयमित्यर्थः ।

अत्रोपपत्तिः । चन्द्रबिम्बं पञ्चदशाङ्गुलसममाचार्येण प्रकल्पितं ततोऽनुपातो यदि चक्रार्द्ध १८० समे कर्णे १५ अङ्गुलानि शुक्लं तदाभीष्टकर्णे किं जातमिष्टशुक्लमङ्गुलात्मकं $= \frac{१५ \times \text{कर्ण}}{१८०} = \frac{\text{कर्ण}}{१२}$ (कर्णस्तु रविचन्द्रान्तरसमः पूर्वप्रतिपादित एव) अत उपपन्नम् ।

५–७ इदानीं परिलेखमाह । अपमान्तरविक्षेपावित्यादि ।

एकदिशि अपमान्तरविक्षेपौ यौ तयोर्योगेन अन्यत्वे भिन्नदिशि अन्तरेण परिलेखे कोटिः स्यात् । रवीन्द्वोरन्तरं पूर्वसाधितं कर्णः । तयोर्वर्गान्तराद्यत्पदं स बाहुः स्यात् । शशाङ्कात्चन्द्राद्यतो यद्दिशि सविता सूर्यः कोट्या परिकल्पितः स्यात् । ततस्तद्दिशि पूर्वागतांशसमाङ्गुलमिता कोटिर्देया । ततोऽङ्गुलैरेव भुजकर्णौ देयौ । शशिमध्यात् शशिकेन्द्रात् पूर्वं साधितः कर्णो भवति ततस्तस्मात् कर्णात् कोटिरस्ति । अतोऽस्मात्कोट्ययाद्भुजः शशाङ्कगतः स्यात् । स एव भुजः परिधौ चन्द्रबिम्बपरिधौ अत्रो नाम भवति । अत्रसंज्ञस्तस्मादत्रादेव नमनोन्नमनज्ञानम् । ततो मध्यात्चन्द्रकेन्द्रात्कर्णो यो रचितस्तत्र शीघ्रं देयं तत्र धनुर्यत् तेनाऽऽकृतिर्ज्ञेयेति विशेषः । अत्र पूर्वोक्तत्वेदर्शनेनैव प्रकटा वासना । स्याच मानमत्यल्पं तेन स्थूलत्वात् कोटिकर्णौ समानौ कल्पितौ । अर्थात् स्याच = कच, तथा




स्यार = रच । ततः कच = स्याच = अअ' ।

ततः अ'र = अर – अअ' = क्रान्त्यन्तरं – स्याच अत उपपन्नं कोटिमानम् । ततो भुजमानं = अ'च $= \sqrt{\text{चर}^२ - \text{अ'र}^२}$ $= \sqrt{\text{स्यार}^२ - \text{अ'र}^२}$ अथास्माद्भुजमानाद्यथा यथा चर कर्णसूचं विप्रकृष्टं भवति तथातथा अ'रदिशि शङ्कोन्नमनं भविष्यति । रविश्च चर कर्णमार्गेणैव शुक्लं ददाति तेन कर्णसूच एव परमशुक्लं तत उभयदिशि शुक्लस्यापचय एवेति । अत्राऽऽकृत्यैव शङ्कोन्नमनदिग् ज्ञेया गणकेन ।


८–१० इदानीं चन्द्रोदयादिसाधनमाह । याम्योदग्विक्षेपादित्यादि ।

याम्यो वा उत्तरः शरो विषुवत्या पलभया गुण्यो रविभिर्द्वादशभिर्हृतः फलं अंशाः स्युः । तेऽंशा उदयकाले याम्यशरे शशिनो मध्ये वृद्धिर्धनं । उत्तरशरे तु क्षयः । एवमत्रजदृक्कर्म्मसंस्कृतो विधुर्जातः । अस्ते तु विपरीतसंस्कारेणात्रजदृक्कर्म्मसंस्कृतश्चन्द्रः कर्तव्यः । ततो विधोः सूर्यमपास्य तस्माद्राशयो विषुवास्ते राशयो यदि षड्राशितोऽल्पास्तदा तदुदयकालेन दिवा चन्द्रोदयो यदि षडधिकास्तदा तु निशि रात्रौ तदुदयकालेन चन्द्रोदयो वाच्यः । एवं पूर्ववत् क्षयवृद्धी कृत्वा । अर्थात् अत्रजदृक्कर्म्मसंस्कृतं चन्द्रं कृत्वा ततो व्यर्कचन्द्रं षड्राशिभ्यो विशोध्य शेषराशिर्यावता कालेनोदेति स काल एव चन्द्रास्तमयः । तस्मिन् समये शशी सूर्योदयानन्तरमस्तं गच्छतीत्यर्थः । अत्र यदा दिने चन्द्रास्तस्तदा व्यर्कश्चन्द्रश्चक्रार्द्धाच्छोध्यो रात्रौ तु चन्द्र एव चक्रार्द्धाच्छोध्य इति क्रमोऽवगम्यः ।

अत्रोपपत्तिः । आचार्येण कदम्बप्रोतीयध्रुवप्रोतीयशरौ तुल्यौ प्रकल्प्यायनं दृक्कर्म्म हित्वा केवलमद्यजं दृक्कर्म्मैव साधितं तद्यथा कल्प्यते मेल क्रान्तिवृत्तखण्डं मे मेषादिः स्था



चन्द्रस्थानं स्थाच ध्रुवस्था ध्रुवप्रोते चन्द्रशरः । च चन्द्रविम्बम् । सचल क्षितिजं । ल चन्द्रोदयकाले क्षितिजलग्नः क्रान्तिवृत्तप्रदेशः तदेवाद्यजदृक्कर्म्मसंस्कृतचन्द्रस्थानं तज्ज्ञानार्थं आचार्येण स्वल्पान्तरात्, स्थालच जात्यक्षिभुजं कल्पितं लचस्थाकोणमानं चाक्षांशसमं तत्कोटिसमं स्थालचकोणमानं च कल्पितं ततो लस्थामानं $= \frac{\text{स्थाच} \times \text{अक्षज्या}}{\text{लम्बज्या}} = \frac{\text{शर} \times \text{विषुवती}}{१२}$ अत्र स्थाचसम उत्तरशरः । तेन मेल $=$ मेस्था$-$स्थाल । दक्षिणशरे तु तत्सर्वं स्था', च', चि'ल चिन्हैः कल्पितं तेन तदा मेल $=$ मेस्था' $+$ स्था'ल । अथोदये येन शरेण यावान्नतोन्नतो ग्रहो भवति तेनैव शरेणास्तमये तावानुन्नतनतो भवतीति विपरीतमुक्तमस्तमये । एवं संस्कृतचन्द्रो जातस्ततश्चन्द्रादर्कं विशोध्य शेषराशयो विज्ञातास्ते यदा षड्राश्यल्पास्तदा सूर्योदयानन्तरं सूर्यास्तात् प्रागेव चन्द्रोदयः । यदा च षड्राश्यधिकास्तदा सूर्यास्तानन्तरं प्राक्क्षितिजे तदद्यजदृक्कर्म्मसंस्कृतचन्द्रस्थानमागच्छति तेन निशि चन्द्रोदयो भविष्यति । तचार्कमर्कं प्रकल्प्याद्यजदृक्कर्म्मसंस्कृतस्थानं लग्नं प्रकल्प्य तयोरन्तरे या घटिकास्तासु सूर्योदयानन्तरं चन्द्रोदयो भवति । अस्तविचारे तु यदा रव्युदयस्तदा क्षितिजादुपरि यच्च कुचस्थश्चन्द्रो दिवसे । अतस्तदान्तरं षड्राश्यधिकं पूर्वाभिमुखक्रमेण रवेश्चन्द्रावधि तच्च षड्राशिशोधनेन पश्चिमक्षितिजाच्चन्द्रावधि चापात्मकमन्तरं क्रान्तिवृत्ते । क्रान्तिवृत्तस्य पश्चिमाभिमुखं तत्तुल्यभ्रमणेन चन्द्रोऽस्तक्षितिजं यास्यति रविश्च क्रान्तिवृत्ते तावानुन्नतो भवति । अतो रव्युदयानन्तरं शेषस्योदयकालेन दिने चन्द्रोऽस्तं यास्यति । एवं यदा रविचन्द्रा-



न्तरं षड्राश्यल्पं तदा रात्रौ चन्द्रास्तः । सूर्योदयानन्तरं च चन्द्रोदयः । यथा कल्प्यते अस्तक्षितिजे च चन्द्रस्तदधो र रविः मे मेषादिः । ल तदा प्राक्क्षितिजे क्रान्तिवृत्तप्रदेशः । तज्ज्ञानं चन्द्रे षड्राशियोजनेन वा वियोजनेन । अतो रव्युदयाद्यावता कालेन तल्लग्नमुदेति तेन कालेन निशि चन्द्रोऽस्तं यास्यतीति बुद्धिमद्भिश्चिन्त्यम् ।

इति शशिदर्शनम् ।

अथ चन्द्रग्रहणाधिकारः ।

१ तत्र तावच्चन्द्रे चालनमाह । यातैष्या इति ।


अर्कोदयतस्तिथेः पूर्णिमाया या गता एष्या वा नाड्यः । तदुत्पन्नाः कला गते चन्द्राच्छोध्या एष्ये युक्तास्तदा तत्काले पूर्णान्तकाले शशी भवति । तत्कलानयनं प्रसिद्धत्वादाचार्येण नोक्तं तत्कलाश्च घटीषष्ट्या चन्द्रगतिकलास्तदा यातैष्यघटिकाभिः किमित्यनुपातनः समायान्ति ।

अत्रोपपत्तिस्तु प्रकटैव । गते पूर्वमेव शशी । अतस्तत्र शोधनमुक्तम् । एष्ये ऽग्रे शशी ततस्तत्र धनमुक्तं चालनफलमिति ।

२–४ इदानीं ग्रहणे स्थितिसाधनमाह । राहोः सषट्कृतिकलामित्यादि ।

राहोः सकाशात् सषट्कृतिकलां षड्विंशतिकलां अंशं पूर्वप्रतिपादितवृश्चिकभागं हित्वा त्यक्त्वा ततः शेषस्य शशाङ्कस्य च ये विवरांशा अन्तरांशास्तैस्त्रयोदशान्तः । अर्थात् तेऽंशा यदि त्रयोदशाल्पास्तदा ग्रहणं भवति यदि ते चांशाः पञ्चदश तदा तस्य ग्रहणस्य तम एव । अर्थात् ग्रहणस्य छायामात्रं न दर्शनम् । पञ्चोनषष्टिवर्गस्य पञ्चपञ्चाशत्कलावर्गस्य कर्यं भूतस्य विक्षेपकलावर्गरहितस्य यन्मूलं तद्द्विगुणं तस्मात् तिथिवद्विभज्य कालः साध्यः स स्थितेर्ग्रहणस्य स्थितेः कालो भवति । त्रयोदश शशितिमिरविवरभागैश्चन्द्रराहुन्तरांशैर्हीनाः शराहताः पञ्चभिर्गुणिता एताः पलाश्चन्द्राद्राहावधिके स्थितिमध्ये क्षेप्याः । अन्यथा अल्पे ह्रानिरूनाः कर्तव्यास्तदा स्पष्टः स्थितिकालो भवतीत्यर्थः ।

अत्रोपपत्तिः । गणितागतो राहुः षड्विंशतिकलासमवृश्चिकाख्यभागमिलितः समायाति पौलिशसिद्धान्तस्य २६ श्लोकेन अतस्तच्छोधनेन वास्तवो राहुः स्यात्तच्चन्द्रान्तरे येऽंशास्ते



यदा त्रयोदश तदा तैर्मानैक्यखण्डसमः शर उत्पद्यते । अतस्तदा ग्रहणसंभवः । पञ्चदशांशा यदा तेऽन्तरांशास्तदा तैर्मानैक्यखण्डात् किञ्चिदधिकः शरः स्यादतस्तदा ग्रहणं न किञ्चित्चन्द्रकान्तिम्लानिरेव । अथ मध्यममानेन भूभाविम्बार्धं = ३८′ चन्द्रविम्बार्धं = १०′ आचार्येण कल्पितं ततः स्पर्शकाले भूभाचन्द्रकेन्द्रयोरन्तरं = चभू = चस्प + स्पभू = १७′ + ३८′ = ५५′ । भूश = क्रान्तिवृत्तखण्डं स्थितिदलं । चश = चन्द्रशरकलास्ततो जात्यत्रिभुजकल्पनया भूश = $\sqrt{\text{चभू}^2 - \text{चश}^2}$ = $\sqrt{(५५)^2 - \text{शर}^2}$ । अयमेव भास्करादेः साम्प्रतं ग्राहकमार्गे भुज उच्यते । गत्यन्तरेण

यावता कालेन चन्द्र एता भुजकलाः क्रामति स्पर्शकालात्तावता कालेन ग्रहणमध्यकालः । चन्द्रस्यैकरूपां गतिं प्रकल्प्य पुनस्तावता कालेन मध्यान्मोक्ष इति ज्ञेयम् । भुजो द्विगुणितस्ततो द्विगुणभुजकलाभ्यः कालज्ञानार्थं तिथिकालसाधनवदनुपातो गत्यन्तरकलाभिः षष्टिघटिकास्तदा द्विगुणभुजकलाभिः किं जातः स्पर्शान्मोक्षावधिकालः स एव ग्रहणस्थितिकालः । परन्तु चन्द्रस्य गतिः प्रतिक्षणं विलक्षणा तेन नायं कालः समीचीनः । समीचीनकालानयनार्थमाचार्येण तारतम्याच्छशितिमिरविवरभागैरित्यादिना संस्कारः समानीत इत्युपपन्नं सर्वम् ।

५. इदानीं सर्वग्रहणे संमीलनोन्मीलनकालज्ञानार्थं मर्दसाधनमाह । किन्त्वन्तरांशेति ।

पूर्वं ये राहुचन्द्रयोरन्तरांशा आगतास्तैर्हीनाः पञ्च कर्तव्यास्ततो यच्छेषं तेन हीनगुणिताश्च दश ततः कृतघ्नाश्चतुर्गुणितास्ततो यन्मूलं तद्वेकाश्विभिरेकविंशत्या गुणितम् । अस्माद्गुणितफलाद्यः पञ्चमांशस्ता विमर्दकला भवन्ति—इति ।

अत्रोपपत्तिः । कल्प्यते संमीलनसमये च' = चन्द्रकेन्द्रं । च' श' = तात्कालिकः शरः । तस्यानयनार्थं राहुचन्द्रयोरन्तरांशानां ज्या = $\frac{२१\ अं}{१०}$ यतोऽन्तरांशाः सर्वग्रहणे दशांशेभ्यो न्यूना एव ततः शरसाधनार्थं परमशरः २४०' कलासमः कल्पितः । ततोऽनुपातो यदि त्रिज्यया १२० परमशरस्तदान्तरज्यया किं जातः शरः = च' श' = $\frac{२४० \times २१\ अं}{१२० \times १०} = \frac{२१\ अं}{५}$ । ततो मर्दार्द्धकलाः = $\sqrt{भूच'^२ - च'श'^२} = भूश' = \sqrt{(भूस्प - स्पच')^२ - \frac{(२१)^२}{२५} \cdot अं^२}$

$= \sqrt{(३८ - १७)^२ - \frac{(२१)^२}{२५} \cdot अं^२} = \sqrt{(२१)^२ - \frac{(२१)^२}{२५} \cdot अं^२}$

$= \frac{२१}{५}\sqrt{२५ - अं^२} = \frac{२१}{५}\sqrt{(५ - अं)\ (५ + अं)}$

$= \frac{२१}{५}\sqrt{\{५ - अं\}\{१० - (५ - अं)\}}$

अथाच स्थितिवन्मर्दार्द्धं द्विगुणितं जाता मर्दकलाः

$= \frac{२१}{५} \times २\sqrt{\{५ - अं\}\{१० - (५ - अं)\}} = \frac{२१}{५}\sqrt{४\{५ - अं\}\{१० - (५ - अं)\}}$

अत उपपन्नं मर्दानयनम् ।

६-१० इदानीं निमज्जनकालं बलनादीनां च साधनान्याह । स्थितिदलविमर्ददलयोरित्यादि ।

स्थितिदलविमर्ददलयोर्विशेषके । अन्तरे काले तमः राहुः सकलमिन्दुं अति भवति । अर्थात् स्पर्शानन्तरं तावति काले संमीलनं भवति । शशिराहुविवरभागैरन्तरांशैर्विक्षेपविपर्यस्ता शरदिग्विपरीता ग्रहमोक्षे स्पर्शमोक्षयोर्दिग् वाच्या । परिधौ चन्द्रबिम्बपरिधौ तुरीय-


भागे चतुर्थांशे चयोदशधाविभागे कृते प्राक्प्रभृति प्राग्दिक्क्रमेण इन्दोर्ग्रहणस्य याशा या दिक् तस्या अंशे पर्व वदेत् । अत्रैतदुक्तं भवति चन्द्रविम्बपरिधिं विलिख्य तत्र दिगङ्कितं च कृत्वा एकस्मिन् चतुर्थांशे चयोदशविभागांश्च कृत्वा वक्ष्यमाणविधिना बलनमानीय तदयादिक्कं प्राग्भागाद्वृत्वा तत्स्थे भागे चन्द्रस्य पर्वारम्भं वदेतस्मिन्नंशे स्पर्शो भवतीति ज्ञेयम् । अत्र पलांशे शशिपरिधिदलार्द्धघ्ने शशिपरिधिचतुर्थांशगुणिते पुनः किं भूते खेन्द्वन्तरभागसङ्गुणिते खस्वस्तिकचन्द्रयोरन्तरे ये भागा अर्थाच्चन्द्रनतांशास्तैश्च गुणिते खखरूपाप्ते ८१०० हृते च बलनं भवति तत्प्राङ्नते याम्यं परे तु सौम्यं ज्ञेयं तदेव सव्यमिति । निशानाथे सर्वग्रासे वर्णविशेषं पीतं उदयास्तग्रासे धूम्रं खण्डग्रहणेऽर्द्धग्रासे सलिलाभं जलसमं वर्णं वदेत् । चक्रं राशिद्वादशकं राहुमुखेनानं शेषं चियमद्रि २२३ गुणं फलं शशाङ्केनैकेन युक्तं कार्यं (इदं यदि तुलादिमीनान्तगं तदोच्चस्यः) क्रियादिकत्र्यन्तगस्तदा नीचः ॥ अनेन श्लोकेन फलादेशार्थं ग्रहणसमये राहोरुच्चदशा नीचदशा चाचार्येण साधितेत्यनुमीयते ।

अत्रोपपत्तिः । स्थित्यर्द्धविमर्दार्द्धयोरन्तरकालः स्पर्शसमीलनकालान्तरसमोऽतस्स्पर्शानन्तरं तावति काले तमो राहुः सकलमिन्दुं भवति—इति युक्तमेव । चन्द्रग्रहणे क्रान्तिवृत्ते भूभा ततः शरदिशि शरार्धे चन्द्रः । चन्द्राच्च शरविपरीतदिशि भूभातो विधुकेन्द्राद्भूभकेन्द्रज्ञानार्थं शरो विपरीतः कृतः । आचार्येण परिलेखेऽत्रजबलनमेव साधितं नायनबलनं तेन परिलेखे स्थूलता । बलनानयनेऽपि अंशानुपात एव कृतो यदि नवत्यंशनतांशैरत्रांशसमं बलनं तदाभीष्टनतांशैः किं जातमंशात्मकं बलनम् । चन्द्रपरिधौ तच्चापार्थमन्योऽनुपातो यदि नवत्यंशैश्चन्द्रपरिधिचतुर्थांशसमं चापं लभ्यते तदा बलनांशैः किं जातं चन्द्रविम्बपरिधौ बलनचापं $= \frac{\text{बल} \times \text{चप}\frac{9}{4}}{९०} = \frac{\text{नतांश} \times \text{अक्षां} \times \text{चप}\frac{9}{4}}{९० \times ९०}$ अत उपपन्नं बलनानयनम् । अत्रजबलनं नाम तत्काले नाडीवृत्तप्राचीतो यतो यैरंशैः सममण्डलप्राची चलिता तदंशमानमेवेत्युपपन्नम् ।

११–१४. इदानीं परिलेखमाह । सप्तदशाष्टेत्यादि ।

सप्तदशकलाप्रमाणेनैकं चन्द्रवृत्तं अष्टत्रिंशत्कलाप्रमाणेन भूभावृत्तं तद्द्वययोगप्रमाणेन च मानैक्यखण्डवृत्तं वा स्थितिवृत्तं विलिखेत् । एतानि शशिराहुस्थितिवृत्तानि चैकस्थानानि एककेन्द्रकानि आलिख्य दिगङ्कितानि कृत्वा तत्र पूर्वागतबलनाशांशकवशात् लङ्कापूर्वापरयोर्ज्ञानम् । अनयोः पूर्वापरयोर्द्वयोः पार्श्वे आयामिन्यो दीर्घास्त्रयोदश रेखाश्चन्द्रविम्बपरिधौ समान्तराः कर्तव्याः तदेदं चन्द्रच्छेद्यकं भवति । एतच्चन्द्रच्छेद्यकं मया समासतः संक्षेपरूपेणाभिहितं कथितं व्याख्ययाऽवगम्यं भवति । अत्रास्मिन् छेद्यके संस्थानेन स्थानवशेन शशिविमर्दस्थितयो दृश्यन्ते । इन्दुर्भूछायां पश्चाद्भागे स्पृशति । तथा अर्कं च पश्चाद्भागे स्पृशतीति दृश्यते । अत इन्दोः प्राग्भागे ग्रहणं स्पर्शो भवति रवेर्न किन्तु रवेः पश्चिमभागे स्पर्शो भवतीत्यर्थः ।

अत्रोपपत्तिः । केच प्रमाणेन चन्द्रं केभूप्रमाणेन राहुं केपूप्रमाणेन च स्थितिवृत्तं विलिख्य दिगङ्कितं कृतं तच्च पूर्वान्हात्पूर्वागतचलनवशेन लङ्कापूर्वापरं अर्थात्राडीवृत्तखण्डं निकेनि सदृशं ज्ञातम् । ततो निकेसमानान्तरा उभयपार्श्वे बिन्दुविशिष्टा रेखाः कृताः । एतावन्मात्रं संक्षेपरूपेण परिलेखरूपं चन्द्रच्छेद्यकमाचार्येण कथितं वस्तुतोऽनेन स्पर्शादिज्ञानं न भवति । अत्र तात्कालिकनाडीवृत्तपूर्वापरा ज्ञाता तत आयनबलनवशेन तत्काले क्रान्तिवृत्तरूपपूर्वापरज्ञानं भवति ततः शरवशेन स्पर्शादिकाले भूभाकेन्द्रज्ञानं ततो भूभाव्यासार्द्धेन कृतेर्वृत्तेः स्पर्शादिज्ञानं भवतीत्यवशिष्टं व्याख्यागम्यमित्याचार्येण कथितमित्यवशिष्टं सुगममित्युपपन्नं सर्वम् ।



इति पौलिशसिद्धान्ते चन्द्रग्रहणाधिकारः ।

अथ सूर्यग्रहणाधिकारः ।

१. तत्रादौ लम्बनमाह । दिनमध्यमेति ।

इष्टकाले यावतीभिर्घटिकाभिर्दिनमध्यप्राप्तिर्वा मध्याह्नाद्यावत्यो घटिका व्यतीताः अर्थात् प्राक्कपाले या नतघटिकाः पश्चिमकपाले च या नतघटिकास्ताः षड्गुणिता अंशा भवन्ति तेषां या ज्या तस्या यस्तिंशांशः स एव तिथेर्नाम तिथिनमनं भवति—इत्यर्थः ।

अत्रोपपत्तिः । नतघटिकाः षड्गुणिता अंशा भवन्ति तज्ज्या नतज्या ततः स्थूलानुपातेन लम्बनघटिका यदि त्रिज्यया १२० घटिकाचतुष्टयं लम्बनं तदेष्टनतज्यया किं जातं लम्बनं $= \frac{४ \times \text{नज्या}}{१२०} = \frac{\text{नज्या}}{३०}$ इत्युपपन्नम् ।

२–६ इदानीं राहोः संस्कारविशेषं स्थितिसाधनं चाह । पञ्चघ्न इत्यादि ।

२–४ श्लोकैः संस्कारत्रयं राहोः दत्तमाचार्येणेत्यनुमीयते यतः सूर्यग्रहणे नत्या संस्कृतः शरः स्फुटो भवति । नतिवशेन येऽन्तरांशा आयान्ति ते राहावेव संस्कृतास्ततस्तद्राहुवशेन स्वयं स्फुटशरसम एव शरः समायाति ।

अस्य श्लोकस्य व्याख्या पौलिशसिद्धान्तचन्द्रग्रहणस्य द्वितीयश्लोकरूपा । सूर्यग्रहणे अन्तरांशे अष्टभिः समे मानैक्यार्द्धसमः शरो भवतीत्युक्तम् । अथान्तरांशवर्गमिन्दोश्चन्द्रस्य ग्रहणे नवर्तुरूपादपास्य तन्मूलं ग्राह्यं रवेः सूर्यस्य ग्रहणे तु तन्मूलं श्रुतिरसात् ६४ अपास्य ग्राह्यं ततस्तन्मूलं पादोनं स्वचतुर्थांशोनं कार्यं तदा क्रमेण चन्द्रभान्वोः स्थितिकालो भवतीत्यर्थः ।

अत्रोपपत्तिः । अत्राचार्येण चन्द्रग्रहणे मानैक्यार्द्धं ५८′ कलाः सूर्यग्रहणे तु ३५′ कला गृहीतास्तथा ग्रहणकाले चन्द्रराह्वन्तरांशेभ्यः शरः $= \frac{२७० \times २ अं}{१२०} = \frac{९ अं}{२}$ । ततः स्थित्यर्द्धप्रमाणं पूर्ववत् चन्द्रग्रहणे $= \sqrt{(५८)^२ - श^२} = \sqrt{५८^२ - \frac{८१ अं^२}{४}} = \frac{९}{२}\sqrt{\left(\frac{५८ \times २}{९}\right)^२ - अं^२}$ $= \frac{९}{२}\sqrt{(१३)^२ - अं^२}$ इदं स्थित्यर्द्धं द्विगुणं षष्टिगुणं रविचन्द्रगत्यन्तरभक्तं स्थितिकालः $= \frac{२ \times ९ \times ६०}{७३० \times २}\sqrt{१६९ - अं^२} = \frac{९ \times ९}{७३}\sqrt{१६९ - अं^२} = \frac{९}{८}\sqrt{१६९ - अं^२} = \frac{३}{४}\sqrt{१६९ - अं^२}$ अत उपपन्नं चन्द्रस्थितिकालानयनम् । रवेश्च स्थित्यर्द्धं

$= \sqrt{(३५)^२ - \frac{८१ अं^२}{४}} = \frac{९}{२}\sqrt{\left(\frac{३५ \times २}{९}\right)^२ - अं^२} = \frac{९}{२}\sqrt{६४ - अं^२}$ ततः पूर्ववदस्य द्विगुणस्य कालः $= \frac{२ \times ९ \times ६०}{७३० \times २}\sqrt{६४ - अं^२} = \frac{९ \times ९}{७३}\sqrt{६४ - अं^२} = \frac{३}{४}\sqrt{६४ - अं^२}$ इत्युपपन्नम् ।

इति पौलिशसिद्धान्ते रविग्रहणम् ।

अथ रोमकमतेन रविचन्द्रग्रहणसाधनम् ।

१. तत्रादौ रविचन्द्रस्फुटीकरणमाह । रोमकसूर्य इति ।

युगणादहर्गणात् खतिथि १५० गुणितात् ततः पञ्चकर्तु ६५ रहितात् अवशिष्टात् सप्ताष्टकसप्रकृतेन्द्रियो ५४७८९ द्धृतात् यत्फलं तत्क्रमशः भगणादिको मध्यमो रोमकमतेन सूर्यो भवति – इत्यर्थः ।

अत्रोपपत्तिः । यदि रोमकयुगसावनदिवसैः १०४०९५३ रोमकसूर्यभगणा २८५० लभ्यन्ते तदाऽहर्गणेन किं ज्ञातो भगणादो मध्यमो रविः $= \frac{२८५० \times अह}{१०४०९५३} = \frac{१५० \times अह}{५४७८९}$, ६५गत्याद्यारम्भकालिकः क्षेप इत्युपपन्नम् ।

२. इदानीं स्फुटीकरणार्थं केन्द्रमाह । रविशशिनोरिति ।

रविशशिनोः स्वकेन्द्रराशिदलसंमितैः खण्डैर्वक्ष्यमाणैः क्रमशस्तत्स्फुटकरणं स्फुटसाधनं भवति पुनस्तैः खण्डैरुत्क्रमतश्च अर्थात् वक्ष्यमाणानि षट्खण्डानि सन्ति तानि क्रमशस्तथोत्क्रमतश्च स्थाप्यानि एवं द्वादशखण्डानि पञ्चदशकेन्द्रभागलभ्यानि भवन्ति तैः फलसाधनं कर्तव्यं यदि रवेः केन्द्रसाधनमिष्टं तदा तु पूर्वागतो मध्यमो रविर्मिथुनदलात्सार्द्धराशिद्वयाच्छोध्यः शेषं केन्द्रं भवतीत्यर्थः ।

३. इदानीं पञ्चदशपञ्चदशकेन्द्रभागलभ्यानि रवेर्मन्दफलखण्डान्याह । तिथिमनुदृशेति ।

विंशतिः क्रमेण तिथिभिः १५, मनुभिः १४, दशभिः १० कृतेः ४ सहिता तथा रसैः ६ मनुभिः १४ हीना तदा षट् खण्डानि भवन्ति । तच्च प्रथमखण्डात् धृति १८ विकला हीना द्वितीयखण्डात् पञ्चविकला हीना शेषैः खण्डैः क्रमेण द्वि २ दश १० ष्टि १६ धृति १८ षु विकलासु वृद्धिः कर्तव्या तदा क्रमेण कलाविकलारूपाणि खण्डानि भवन्ति राशित्रयमध्ये षट् उत्क्रमतश्च पुनस्तानि एवं राशिषट्के द्वादश भवन्ति ।

अत्रोपपत्तिः । तत्र सपादमंशद्वयं रविपरममन्दफलं प्रकल्प्य पञ्चदशपञ्चदशकेन्द्रभागलभ्यानि मन्दफलानि चिज्यया परमं कलात्मकं मन्दफलं लभ्यते तदा इष्टकेन्द्रज्यया किमित्यनुपातजन्यानि प्रदर्श्यन्ते ।

केन्द्राणि = १५° ॥ ३०° ॥ ४५° ॥ ६०° ॥ ७५° ॥ ९०° ॥

ज्याः = ३१ ॥ ६० ॥ ८४$\frac{१}{२}$ ॥ १०४ ॥ ११५$\frac{१}{२}$ ॥ १२० ॥

मन्दफलानि = ३४′ । ५२″ ॥ ६७′ । ३०″ ॥ ९५′ । ४″ ॥ ११७′ । ०″ ॥ १२९′ । ५६″ ॥ १३५′ । ०″ ॥

अन्तराणि = ३४′ । ५२″ ॥ ३२′ । ३८″ ॥ २७′ । ३४″ ॥ २१′ ५६″ ॥ १२′ । ५६″ । ५′ । ४″ = खण्डानि

रोमकमतेनान्तराणि वा खण्डानि

२० ॥ २० ॥ २० ॥ २० ॥ २० ॥ २० ॥

१५ ॥ १४ ॥ १० ॥ ४ ॥ ६ ॥ १४ ॥

कलाः = ३५ ॥ ३४ ॥ ३० ॥ २४ ॥ १४ ॥ ६

विकलाः = −१८ ॥ −५ ॥ +२ ॥ +१० ॥ +१६ ॥ +१८

खण्डानि = ३४′ । ४२″ ॥ ३३′ । ५५″ ॥ ३०′ । २″ ॥ २४′ । १०″ ॥ १४′ । १६″ ॥ ६′ । १८″ आयान्ति तत्र प्रथमं खण्डं हित्वा अन्यानि सर्वाणि खण्डानि पूर्वसाधितखण्डेभ्योऽधिकानीति दृश्यते स्फुटं सर्वैरतो धृतिविषयेाना इत्यत्र कृतविषयेाना पाठः साधुर्मन्यते । तादृशे पाठे तु रोमकमतीयं प्रथमखण्डं ३४′ । ५६″ इदं पूर्वसाधितप्रथमखण्डादधिकं भवति तदुक्ततरमेव । एवं रोमकमतीयानि सर्वाणि खण्डानि यान्यधिकानि समायान्ति तानि सपादांशद्वयपरममन्दफलात्किञ्चिदधिके षोडशकलाधिकैकषष्ट्ये मन्दफले प्रायः समीचीनान्येवेत्युपपन्नं सर्वम् ॥

४. इदानीं मध्यमचन्द्रानयनमाह । खखरूपाष्टगुणघ्नेति ।

दुगणात् अहर्गणात्, खखरूपाष्टगुणे ३८१०० गुणितात् ततः कृताष्टनवकैक १९८४ वर्जितात् यच्छेषं तस्मात् त्रिविषयनवखकृताशाभिः १०४०९५३ हृतात्फलं भगणादो मध्यमचन्द्रः स्यात् ।

अत्रोपपत्तिः । यदि रोमकयुगसावनदिवसैश्चन्द्रयुगभगणा लभ्यन्ते तदाहर्गणेन किं जातो भगणादो मध्यचन्द्रः = $\frac{३८१००}{१०४०९५३}$ × अह इत्युपपन्नम् ।

५. इदानीं चन्द्रकेन्द्रसाधनमाह । शून्यैकैकेति ।

दिनसमूहात् अहर्गणात् शून्यैकैकै ११० गुणितात् ततो नवशून्यरसैः ६०९ सहितात् रूपचिखगुणै ३०२१ भक्तादयत्फलं तदवन्त्यामुज्जयिन्यां शशिनश्चन्द्रस्य भगणाद्यं केन्द्रं स्यात् ।

अत्रोपपत्तिः । अत्राचार्येण ३०२१ दिनैः ११० केन्द्रस्य भगणा उपलब्धास्ततोऽनुपातेनेष्टाहर्गणे केन्द्रं साधितम् । अत्र सर्वत्र क्षेपकाणामुपपत्तीरत्रे सूर्यसिद्धान्तीयक्षेपोपपत्तिकथने कथयिष्ये ।

६. इदानीं चन्द्रमन्दफलखण्डान्याह । मनुभवयमेति ।

अंश एकोऽंशो मनु १४ भव ११ यम २ कलाभिस्त्रिधा सहितस्तदा त्रीणि खण्डानि स्युः । धृतिकृतो धृतिवारः कृतश्चत्वारो द्विसप्तिर्वसुहोचा अष्टगुणितत्रिभिर्वर्जिता तदा चतुर्थं खण्डम् । विषयऋतुः पञ्चगुणिताः षट् त्रिंशत् पञ्चमं खण्डं तथा षष्टिः ६० अष्टषट्कोनाष्टचत्वारिंशद्विरूना षष्ठं खण्डं भवति । पञ्चमषष्ठखण्डे तु चन्द्रेण एकेन हीने कर्तव्ये तदा वास्तवे क्षेये । एवमत्र क्रमेण खण्डानि ।

$$\overbrace{१^\circ । १४'} \parallel \overbrace{१^\circ । ११'} \parallel \overbrace{१^\circ । २'} \parallel \overbrace{०^\circ । ४८'} \parallel \overbrace{०^\circ । ३०'} \parallel \overbrace{०^\circ । १२'} \parallel$$

अत्रोपपत्तिः । रविमन्दफलखण्डवदत्रापि पञ्चदशकेन्द्रभागलब्धानि खण्डानि आचार्येण साधितानि । मन्दफलसाधने त्वनुपातः । यदि त्रिज्यया १२० परमं मन्दफलं ५° । लभ्यते तदेष्टकेन्द्रज्यया किं जातं मन्दफलं $= \frac{५^\circ \times \text{ज्याके}}{१२०}$ तथा साधितानि मन्दफलानि

$= १५^\circ \parallel ३०^\circ \parallel ४५^\circ \parallel ६०^\circ \parallel ७५^\circ \parallel ९०^\circ$

ज्याके $= ३१ \parallel ६० \parallel ८४\frac{१}{२} \parallel १०४ \parallel ११५\frac{१}{२} \parallel १२०$

फलानि $= १^\circ । १७' \parallel २^\circ । ३०' \parallel ३^\circ । ३१' \parallel ४^\circ । २०' \parallel ४^\circ । ४९' \parallel ५^\circ । ०'$

अन्तराणि वा $= १^\circ । १७' \parallel १^\circ । १३' \parallel १^\circ । १' \parallel ०^\circ । ४९' \parallel ०^\circ । २९' \parallel ०^\circ । ११' =$ खण्डानि

एतैः खण्डैः प्रायः समानान्येव पूर्वलिखितरोमकखण्डानीत्युपपन्नम् ॥

७. इदानीं गतिसाधनमाह । खनवनगा इति ।

शशिभुक्तिः खनवनगकलाः ७९०′ शशाङ्केन्द्रस्य च गतिः कृतवसुमुनयः कलाः ७८४′ तथा स्फुटयोर्द्वयोरन्तरे याता गता दिवसभुक्तिर्दिनेगतिः स्यात् । वा आगामिकी नैशी राशिसंबन्धिनी गतिः स्यादित्यर्थः ।

८. इदानीं राहुसाधनमाह । चाष्टकगुणित इति ।

अहर्गणे चाष्टकेन २४ गुणिते तस्मिन् रसर्त्तुयमषट्कपञ्चकान् ५६२६६ दद्यात् योजयेत् ततः भवरूपाग्न्यद्रिभि १६३११९ र्हृते फलं झषान्तोत्क्रमात् मीनान्ताद्विपरीतं क्रमात् भगणाद्यं राहोर्वक्रं मुखं स्यादिति । अर्थात् द्वादशगुद्धं तदा मेषादेर्वक्रं स्यात् ।

अत्रोपपत्तिः । अत्राचार्येण १६३१११ दिनेषु २४ भगणाः उपलब्धास्ततोऽनुपातेनेष्टदिने त्वपसंस्कृताः साधिता इति ।

९–१०. इदानीं रविग्रहणसाधनार्थं लम्बनं विचिभं चाह । दिनमध्यमसंप्राप्तेत्यादि ।

इष्टकाले यावतीभिर्नाडीभिर्दिनमध्यमं दिनार्द्धं भवति ता दिनमध्यमसंप्राप्ता नता नडिकाः पूर्वाः । दिनार्द्धाद्यावत्यो व्यतीताश्च ताः पश्चिमा नताः । षड्गुणिताभ्यस्ताभ्यो नाडीभ्यो ज्या साध्या तस्या यस्त्रिंशांशस्तदेव तिथ्यैनाम तिथिनमनं साम्प्रतं लम्बननाम्ना उच्यते । इष्टकाले सूर्योदयात् सकाशात् यावत्यो नाड्यः स्युस्ताभिर्नाडीभिः प्राग्लग्नं प्राक्क्षितिजे क्रान्तिवृत्तस्य यः प्रदेशस्तमानयेत् । तस्माल्लग्नान्नवराशियुताद् गणकेन अपमांशाः क्रान्त्यंशा विनिश्चिन्त्या विज्ञेया इत्यर्थः ।

अत्रोपपत्तिः । नतघटिकाः षड्गुणिता अंशा भवन्ति तज्ज्ययानुपातः । यदि त्रिज्यया १२० परमं लम्बनं घटिकाचतुष्टयं लभ्यते तदा नतज्यया किं जातं लम्बनं $= \frac{४ \times \text{ज्या नत}}{१२०} = \frac{\text{ज्या नत}}{३०}$ अत उपपन्नं लम्बनानयनम् । ततो लम्बनसंस्कृतदर्शान्तात्प्राग्लग्नं साधितं तत्प्राग्लग्नं चिभोनं जातं विचिभं = ल − ३ = ल − ३ + १२ = ल + ९ ततो विचिभनतांशसाधनार्थं क्रान्त्यंशाः साधिताः । क्रान्त्यंशसाधनं सायनात्प्राग्लग्नाद्भवति परन्तु आचार्येण सायनार्थं किमपि नोक्तम् । अत आचार्यसमये अयनांशाभावः प्रतीयत इति ।

११–१२. इदानीं विचिभस्य स्फुटनतांशसाधनमाह । लग्नच्यग्वित्यादि ।

लग्नचिराहूणां विवरज्या कर्तव्या । अर्थात् प्रथमं लग्नात्त्रिभं शोधयेत् तद्विचिभं जातं तस्माद्राहुं विशोधयेत् ततस्तज्ज्या द्विगुणा षष्टिहृता अंशात्मिका लब्धिः विचिभशरः स्यात् । तामंशसंमितां संख्यां पूर्वानीतापमात् दिग्व्यत्यासे शरक्रान्त्योर्दिग्वैपरीत्ये जह्यात् त्यजेत् । विक्षेपैक्ये क्रान्तिशरयोरैक्ये तयोर्योगः कर्तव्यः । एवं विचिभस्य स्फुटा क्रान्तिर्जाता । उत्तरं स्फुटापमं अत्रादत्रांशेभ्यः शुद्धं विचिभस्य दक्षिणं नतं विन्द्यात् । याम्यं स्फुटापमं च अत्रांशयुतं तदापि दक्षिणं नतं विन्द्यात् जानीयात् । अथ यदुत्तरं स्फुटापमं अत्रादधिकमर्थात् शोधने कृते यदत्र एव स्फुटापमाच्छुध्येत् तर्हि उत्तरं नतं गणको विजानीयात् ।

अत्रोपपत्तिः । यदि त्रिज्यया १२० सपातद्वोर्ज्यया परमाः शरकलाः २४०′ लभ्यन्ते तदा सपातविचिभज्यया किं जातो विचिभस्य शरः $= \frac{२४० \times \text{स॰ विज्या}}{१२०} = २ \text{सपातविचिभज्या}$, अंशकरणार्थं षष्टिभक्तम् । एवमयं शरः कदम्बप्रोतीयः स्वल्पान्तराद् ध्रुवप्रोतीयः कल्पितस्तत्संस्कारेण विचिभस्य स्फुटापमः साधितः स च विमण्डलावधिर्जातः । अथ स्वल्पान्तराद्विचिभं याम्योत्तरवलय एव कल्पितं ततः क्रान्त्यक्षयोः संस्कारे विचिभनतांशा

विमण्डलावधिका जाता एवमेव विचिभस्य विमण्डलावधिकान्नतांशान् सूर्यग्रहणाधिकारे ब्रह्मगुप्तमतेन भास्कराचार्येणापि प्रथमं संसाध्य पुनस्तदधिकारस्योपसंहारे ते नतांशाः खण्डिताः । संस्कारे योगवियोगवासना चातिसरला । इति

१३-१४. इदानीं चन्द्रनतिसाधनमाह । तज्ज्याघ्नीमित्यादि ।

शशिभुक्तिं तज्ज्याघ्नीं विचिभनतांशज्याघ्नीं धृतिभिः शतैरष्टादशशतैर्हृत्वा अवनतिः स्मृता । भानोर्बिम्बं मध्यममानेन त्रिंशत्कला शशिनश्चन्द्रस्य च बिम्बं मध्यममानेन चतुस्त्रिंशत्कलाः । ग्रहणसमये रविचन्द्रयोः लिप्राः समा भवन्ति तेन समलिप्रश्चन्द्रो रविश्चोच्यते । ततः समलिप्रस्य चन्द्रस्य राहोश्च या विवरज्या अन्तरज्या तया मूर्छिता एकविंशतिरभ्यस्ता गुणिता नवभिर्हृता च एवं कृतोऽच चन्द्रस्य मध्यमः शरो भवति । अथ पूर्वागता लम्ब्ययो दिक् साम्ये शरावनत्योर्दिक्साम्ये अवनत्या युता वैलोम्ये भिन्नदिक्के विश्लेषिता अन्तरितास्तदा स्फुटावनतिर्ज्ञेयेति ।

अत्रोपपत्तिः । यदि त्रिज्यया १२० परमावनतिः चन्द्रगतिपञ्चदशांशसमा लभ्यते तदेष्टविचिभनतज्यया किं जाता नतिः $= \frac{\text{चग} \times \text{विनज्या}}{१५ \times १२०} = \frac{\text{चग} \times \text{विनज्या}}{१८००}$ एवं नत्यानयनमुपपन्नम् । अथ शरानयनोपपत्तिः । यदि त्रिज्यातुल्यया सपातचन्द्रदोर्ज्यया १२० परमशरो २७' लभ्यते तदेष्टसपातचन्द्रदोर्ज्यया किं जातः शरः $= \frac{२७० \times \text{सपाज्या}}{१२०} = \frac{२७ \times \text{सपाज्या}}{३ \times ४} = \frac{२१ \text{ सपाज्या}}{३ \times \frac{४ \times २१}{२७}}$

$= \frac{२१ \text{ सपाज्या}}{३ \times ३}$ अत्र चक्रशुद्धं राहुमुखं राहुशब्देन कथ्यते तेन विपातः सपाततुल्यो भवति तेन समलिप्रराहुविवरज्यैव सपातचन्द्रदोर्ज्या भवतीत्युपपन्नं शरानयनम् । अत्र मध्यमशरो नाम चन्द्रबिम्बक्रान्तिवृत्तयोस्तिर्यगन्तरं लम्बितचन्द्रबिम्बक्रान्तिवृत्तयोस्तिर्यगन्तरं च स्फुटः शरस्तयोः शरयोरन्तरं च नतिः ।

अतः शरनत्योरेकदिक्के मध्यमशरनत्योर्योगः स्फुटः शर एव स्फुटावनतिः आचार्येण कथ्यते भिन्नदिक्के तु तयोरन्तरसमा स्फुटावनतिर्भवतीति सर्वं निरवद्यम् । अत्र स्वल्पान्तराद्रविनतिर्न साधिताऽऽचार्येण ॥

१५. इदानीं रविचन्द्रयोः स्फुटबिम्बानयनमाह । मध्यममानाभ्यस्तेति ।

रविचन्द्रयोः स्फुटा गतिर्मध्यमबिम्बमानेनाऽभ्यस्ता गुणिता मध्यभुक्त्या भक्ता च तदा रविचन्द्रयोस्तस्मिन् काले स्फुटं बिम्बकलापरिमाणं भवति ।

अत्रोपपत्तिः । अत्रोच्चस्थिते रविचन्द्रबिम्बे गतिर्लघ्वी बिम्बं चाल्पं भवति नीचस्थिते तु बिम्बं विपुलं गतिश्च महती ततो मध्यगत्या मध्यमबिम्बेन चानुपातो यदि मध्यगत्या मध्यमं बिम्बं तदा स्फुटभुक्त्या किं जातं स्फुटं बिम्बकलामानं $= \frac{\text{मध्यबिं} \times \text{स्फुग}}{\text{मध्यग}}$ अत उपपन्नम् ।


१६. इदानीं स्थितिसाधनमाह । अवनतिवर्गमिति ।

रवीन्दुपरिमाणयोगदलवर्गात् रविचन्द्रमानैक्यखण्डवर्गात् अवनतिवर्गं स्फुटावनतिवर्गमर्धात् स्फुटशरवर्गं जह्यात् त्यजेत् ततो द्विगुणान्मूलात् तिथिभुक्तवत्कालमादिशेत् । अचेदमुक्तं भवति द्विगुणं मूलं षष्ट्रिगुणं रविचन्द्रगत्यन्तरकलाभक्तं तत्स्थितिकालः स्यादिति । अचोपपत्तिः । मध्यकालिकस्फुटशरसमं स्पार्शिकं मौक्षिकं च स्फुटशरं प्रकल्प्य स्थितिसाधनं कृतं तद्यथा मानैक्यखण्डं कर्णः स्पार्शिकः स्फुटशरः कोटिस्तद्वर्गान्तरपदं क्रान्तिवृत्ते भुजः स्थित्यर्द्धसमः स द्विगुणः स्पर्शमोक्षान्तरकलास्ततोऽनुपातो यदि गत्यन्तरकलाभिः षष्ट्रिघटिकास्तदा स्थितिकलाभिः किं जातः स्थितिकाल इत्युपपन्नम् ।

१७–१८. इदानीं ग्रासं परिलेखं चाह । रविशशिमानेत्यादि ।

रविचन्द्रयोर्मानैक्यखण्डात् अवनत्या स्फुटशरेण हीनाद्याः शिष्टा लिप्तास्तानि चन्द्रमसा चन्द्रेण मानोः सूर्यस्य छन्नानि ज्ञेयानि । अर्द्धेन व्यासार्द्धेन रविं रविबिम्बं विलिख्य मध्यात् रविकेन्द्राद्यथादिशमुत्तरां दक्षिणां वाऽवनतिं दत्वाऽवनत्यन्तात् सकाशात् तद्व्यासार्द्धेन ग्रासार्थं चन्द्रबिम्बं विलिखेत् ।

अचोपपत्तिः । कल्प्यते मध्यग्रहणे अकग, रविबिम्बपरिधिः र, तत्केन्द्रं जटग, चन्द्रबिम्बपरिधिः, च तत्केन्द्रं च चर, रविचन्द्रयोः केन्द्रान्तरं स्फुटशरो वा स्फुटावनतिः । तदा कट ग्रासमानं



$= \text{कर} - \text{रट} = \frac{\text{रविं}}{२} - (\text{रच} - \text{चट}) = \frac{\text{रविं}}{२} - \left(\text{अवन} - \frac{\text{चविं}}{२}\right)$

$= \frac{\text{रविं} + \text{चविं}}{२} - \text{अवनति}$ । अत उपपन्नं छन्नानयनम् । परिलेखसाधनं च तथा विलिखति आचार्यः । रकेन्द्रेण रकव्यासार्द्धेन अकग रविबिम्बं विलिख्य रकेन्द्राद्यथा दिशं रचमितामवनतिं दत्वा तदग्रे चन्द्रबिम्बं जटगसंज्ञं यदि विलिख्यते तदा स्वतश्छन्नकलापरिमितं छन्नं रविबिम्बं दृश्यत इति सर्वं चतुरस्रम् ॥

इति रोमकसिद्धान्ते सूर्यग्रहणसाधनमष्टमाध्यायेन जातमिति ।

अथ सूर्यसिद्धान्तानुसारेण रविग्रहणाधिकारः ।

१. तत्रादौ मध्यमरविसाधनमाह द्युगणेऽर्के इति ।

द्युगणेऽहर्गणे ऽष्टशतैर्गुणिते ततः पक्षवेदार्णवै ४४२ र्विरहितेऽवशिष्टे स्वरखद्विद्वि-नवयमे २९२२०७ हृते ऽवन्त्यां दिनदले मध्याह्नसमये सूर्यसिद्धान्तमतेन क्रमाद्भगणादिकः सूर्यः स्यादिति ।

अत्रोपपत्तिः । यदि सूर्यसिद्धान्तीययुगसावनदिवसैः ९५७४९५७५ युगरविभगणाः १८०००० लभ्यन्ते तदाहर्गणेन किं जातो भगणात्मको मध्यमो रविः = $\frac{१८०००० \times अह}{९५७४९५७५}$ गुण-हरौ पञ्चविंशत्यधिकशतद्वयेना २२५ पवर्त्य जातो रविः = $\frac{८०० \times अह}{२९२२०७}$ अयमहर्गणोत्पन्नो रवि-र्ग्रन्थारम्भकालिकेन रविणा सहितो युगादेरविमानं भवति ग्रन्थारम्भकालिको रविश्च ऋणा-त्मकः $-\frac{४४२}{२९२२०७}$ एतावान् भवतीत्युपपन्नम् । गणितेन ग्रन्थारम्भकालिकरवेर्वा क्षेपकस्य साधनमग्रे वक्ष्ये ।

२ अथ चन्द्रसाधनमाह । नवशतसहस्रगुणित इति ।

अहर्गणे नवशतसहस्र ९००००० गुणिते ततः स्वरैकपक्षाम्बरस्वरर्तुभि ९७०२१७ र्विरहितेऽवशिष्टे कथंभूते षट्शून्येन्द्रियनववसुविषयजिनै २४५८९५०९ हृते भगणादिकश्चन्द्रः स्यादिति ।

अत्रोपपत्तिः । युगसौरवर्षाणि १८०००० द्वादशगुणानि अधिमाससहितानि तदा चान्द्रमासाः स्युस्ते च रविचन्द्रभगणान्तरसमा अतो रविभगणाश्चान्द्रमासान्विताश्चन्द्र-भगणाः स्युरेवं जाताश्चान्द्रभगणाः = २४०९३८९ एकस्मिन् दिने भगणात्मिका चन्द्रगतिः

$$= \frac{२४०९३८९}{९५७४९५७५} = \frac{९००००}{२४५८९५०९} - \left(\frac{९००००}{२४५८९५०९} - \frac{२४०९३८९}{९५७४९५७५}\right)$$

$$= \frac{९००००}{२४५८९५०९} - \frac{५९७७९९७५००००० - ५९७७९९९३५३८३४}{२४५८९५०९ \times ९५७४९५७५} = \frac{९००००}{२४५८९५०९} - \frac{७४९१९९}{२४५८९५०९ \times ९५७४९५७५}$$

इयं मध्यमा गतिरहर्गणगुणा भगणात्मकश्चन्द्रः स्यादिति जातश्चन्द्रः

$= \frac{९००००० \times अह}{२४५८९५०९} - \frac{७४९१९९ \times अह}{२४५८९५०९ \times ९५७४९५७५}$ अत्राचार्येण प्रथमखण्डोत्थं फलमेव चन्द्रशब्देनोच्यते द्वितीयखण्डजन्यसंस्कारमग्रे वक्ष्यति शशिविषयघ्नानीन्दोरित्यादिना । क्षेपकोपपत्तिरग्रे विलो-कनीया—इत्युपपन्नम् ।

३. इदानीं चन्द्रोच्चमाह नवशतगुणित इति ।

अहर्गणे नवशत ९०० गुणिते ततः रसविषयगुणाम्बरर्तुयमपक्षान् २२९०३५९ प्रक्षिप्य योगे नववसुसप्ताष्टाम्बरनवाश्विभि २९०८७८९ भक्ते भगणाद्यं शशाङ्कोच्चं भवति ।

अत्रोपपत्तिः । साम्प्रतकालिकार्यसिद्धान्तीयाश्चन्द्रोच्चभगणाः = ४८८२१६ सावनदिवसाः = १५७७६१७८०० ततो भगणात्मिका गतिरेकस्मिन् दिने = $\frac{४८८२१६}{१५७७६१७८००}$

$= \frac{६००}{२६०८७८६} + \left(\frac{४८८२१६}{१५७७६१७८००} - \frac{६००}{२६०८७८६}\right) = \frac{६००}{२६०८७८६} + \left(\frac{१४२०१२६०५६७६१ - १४२०१२६०२०००}{१५७७६१७८०० \times २६०८७८६}\right)$

$= \frac{६००}{२६०८७८६} + \frac{३६७६१}{१५७७६१७८०० \times २६०८७८६}$ इयं गतिरहर्गणगुणा जातमहर्गणभवमुच्चं भगणाद्यं

$= \frac{६०० \times अह}{२६०८७८६} + \frac{३६७६१ \times अह}{१५७७६१७८०० \times २६०८७८६}$ अत्राचार्येण प्रथमखण्डोत्थं फलमेव चन्द्रोच्चशब्देन कथ्यते द्वितीयखण्डोत्थं संस्कारमग्रे कथयिष्यति — इत्युपपन्नम् । चेपकोपपत्तिरग्रे विलोक्या ।

४. इदानीं संस्कारमाह शशिविषयघ्नेति ।

इन्दोश्चन्द्रस्य पूर्वप्रकारेण यानि मण्डलानि (भगणाः) तानि शशिविषयै ५१ र्गुणितानि खार्काग्निभि ३१२० र्हृतानि च लब्धा विकलाः पूर्वप्रकारनिष्पन्नचन्द्रे ऋणं कर्तव्यास्तदा वास्तवो मध्यमश्चन्द्रो भवति । अथैवं पूर्वागतानि चन्द्रोच्चमण्डलानि दिग् १० घ्नानि ततः स्वरनन्दयमै २६० र्हृते या विकला लभ्यन्ते ता उच्चे धनं कर्तव्यास्तदा वास्तवमुच्चं ज्ञेयमिति ।

अत्रोपपत्तिः । पूर्वप्रकारसिद्धश्चन्द्रः = $\frac{६००००० अह}{२४५८६५०६} - \frac{७४६१६६ अह}{२४५८६५०६ \times ६५७४६५७५}$ अत्र यदाऽहर्गणः $\frac{२४५८६५०६}{६००००}$ तदा प्रथमखण्डजन्यं चन्द्रस्यैकमण्डलं पूर्णं भवति तत्सम्बन्धि द्वितीयखण्डोत्थं फलं चाहर्गणस्थाने $\frac{२४५८६५०६}{६००००}$ इत्यङ्कस्योत्थापने कृते भगणाद्यं

$= \frac{७४६१६६ \times २४५८६५०६}{२४५८६५०६ \times ६५७४६५७५ \times ६००००} = \frac{७४६१६६}{६५७४६५७५ \times ६००००}$ इद २१६०० × ६० मेभिर्गुणं जातं विकलात्मकं संस्कारसम्बन्धिफलं $= \frac{७४६१६६ \times २१६०० \times ६०}{६५७४६५७५ \times ६००००}$ अत्र गुणहरौ १६२००० एभिरपवर्त्य जातं फलं $= \frac{७४६१६६ \times ८}{५० \times ७३०५१७५} = \frac{५६६६३२८}{३६५२५८७५०} = \frac{५६६६३२८ \times ५१}{३६५२५८७५० \times ५१} = \frac{५१}{३६५२५८७५० \times ५१ / ५६६६३२८} = \frac{५१}{३१२०}$

इदमेकस्मिन्मण्डले ऋणात्मकं द्वितीयं विकलात्मकं खण्डं जातमिदमेवेष्टमण्डलगुणमिष्टमण्डलभवं भवतीत्युपपन्नं चन्द्रसंस्कारानयनम् । अथोच्चसंस्कारोपपत्तिः । पूर्वागतमुच्चं $= \frac{६०० अह}{२६०८७८६} + \frac{३६७६१ अह}{१५७७६१७८०० \times २६०८७८६}$ अत्रापि यदाहर्गणः $= \frac{२६०८७८६}{६००}$ तदा प्रथमखण्डभवमुच्चस्यैकं मण्डलं भवति तदहर्गणस्य द्वितीयखण्डे चोत्थापने कृते जातमेकमण्डलसम्बन्धि द्वितीयखण्डोत्थं भगणाद्यं फलं $= \frac{३६७६१ \times २६०८७८६}{१५७७६१७८०० \times २६०८७८६ \times ६००} = \frac{३६७६१}{१५७७६१७८०० \times ६००}$ इद २१६०० × ६० मेभिर्गुणं जातं विकलात्मकं फलं $= \frac{३६७६१ \times २१६०० \times ६०}{१५७७६१७८०० \times ६००}$ अत्र गुणहरौ ३२४००० एभिरपवर्त्य जातं फलं $= \frac{१४७१६४}{४३८३१०५} = \frac{१४७१६४ \times १०}{४३८३१०५ \times १०} = \frac{१०}{४३८३१०५ \times १० / १४७१६४} = \frac{१०}{२६७}$ इदमेकस्मिन्म-

गडले धनं विकलात्मकं द्वितीयखण्डमानमिष्टमण्डलगुणमिष्टमण्डलसंबन्धि भवतीत्युपपन्नं सर्वम् ।

५–६. इदानीं राहुसाधनमाह विघनदशघ्न इत्यादि ।

अहर्गणे विघनदशभि २७० गुणिते (अत्र क्षेपाङ्का अतिभ्रष्टा न ज्ञायन्ते) क्षेपयुक्ते यमवसुभूतार्णवगुणधृतिभि १८३४५८२ भक्ते क्रमाद्भगणाद्यं राहोर्वक्रं मुखं क्षेयं तच्चक्राद्द्वादशराशिभ्यः शुद्धं तदा क्रमगणनया मुखं स्यात्तन्मुखं च षड्राशिसहितं पुच्छं तदेव केतुसंज्ञं चोच्यते । प्रागागतं मुखं सहितं कर्तव्यं चक्रशुद्धमुखं च रहितं कर्तव्यं कुत्र चन्द्रे इत्याध्याहार्यम् । तस्य सहितविवरस्य या लिप्तास्ताभिर्विक्षेपः सिध्यति स च परमः ससप्तर्तिर्द्विशती २७० भवतीति तात्पर्यार्थः ।

अत्रोपपत्तिः । यद्यार्यभटीयाः पातभगणा गृह्यन्ते तत्कुदिनानि च । तदा भगणात्मिका पातगतिः $= \frac{२३२२२६}{१५७७६१७८००} = \frac{२३२२२६ \times २७०}{१५७७६१७८०० \times २७०} = \frac{२७०}{\frac{१५७७६१७८०० \times २७०}{२३२२२६}} = \frac{२७०}{१८३४५८२}$ अनेन गुणहारयोः सत्यता सिध्यतीत्युपपन्नम् । अथ सरला वासना ।

अथ क्षेपकोपपत्तिः । तत्र तावत्साम्प्रतकालिकसूर्यसिद्धान्तानुसारेण सृष्ट्यादेर्यन्यारम्भपर्यन्तमहर्गणः साध्यते यन्त्रारम्भस्तु ४२७ शके तत्र सौरवर्षगणः = १६५५८८३६०६ सौरमासाः = २३४७०६०३२७२ अधिमासाः = ७२१३८४२०४ चान्द्रमासाः = २४१६१६८७४७६ एते त्रिंशद्गुणिता जाताश्चान्द्राहाः = ७२५७५६६२४२८० ततः क्षयाहाः = ११३५६०२३२०७ चान्द्राहाः क्षयाहैर्विरहिता जातः सावनोऽहर्गणो लङ्कायामर्द्धरात्रसमये = ७१४४०३६०१०७३ अयमहर्गणः ८०० गुणितः २६२२०७ भक्तः शेषमृणात्मकं = – ४२ अयमर्द्धरात्रकालिकः क्षेपः दिनार्द्धकालिकक्षेपार्थमत्र ४०० शोध्यं जातो वास्तवः क्षेपकः – ४४२ पाठपठितसमः । अनेन रविक्षेपकोपपत्तिः स्फुटा भवति ।

अथ चन्द्रक्षेपकोपपत्तिः । अहर्गणः = ७१४४०३६०१०७३ चन्द्रभगणै २४०६३८६ गुणो जातः = १७१६१३२६६७१८२४५३२६७ अयं कुदिनै ६५७४६५७५ भक्तो जातो भगणाद्यो यन्त्रारम्भकालिकश्चन्द्रः = २६१४७८७१०८१ + $\frac{६५१५७८२२}{६५७४६५७५}$ = २६१४७८७१०८२ – $\frac{५८८७५३}{६५७४६५७५}$ अत्र यदि ऋणात्मकः क्षेपकः पाठपठितहरेऽ २४५८६५०६ स्मिन् परिणाम्यते तदा – २२०१६७ एतावान् भवति अत्र ४५०००० गत्यर्द्धविशोधनेन जातो दिनदले ऋणात्मकः क्षेपकः – ६७०१६७ अत्र स्वल्पान्तरात् – ६७०२१७ अयं पठित इत्युपपन्नं चन्द्रक्षेपकमानम् ।

अथ चन्द्रोच्चोपपत्तिः । तत्रार्यभटीयोच्चभगणाः = ४८८२१६ अहर्गणेन ७१४४०३६०१०७३ गुणा जाताः = ३४८७८५४११७१२२५८६८७ एते कुदिनै १५७७६१७८०० भक्ता जातं भगणात्मकमुच्चं = २२१०४१५५६ + $\frac{१२२६४०८७८७}{१५७७६१७८००}$ अत्रायं १२२६४०८७८७ धनात्मकः क्षेपो यदि पाठपठिते

हरेऽस्मिन् २६०८७८६ परिणाम्यते तदा २२६०८०५ एतावान् भवति गत्यर्द्ध ४५० विशोधनेन जातः क्षेपकः = २२६०३५५ अत्र चन्द्रोच्चानयने आचार्येणैकाधिकः क्षेपः पठितः स च स्वल्पान्तर इत्युपपन्नं चन्द्रोच्चक्षेपकमानम् ।

अथ रोमकमतेनोज्जयिन्यां कस्मिन् समये ग्रहाः सिद्धा भवन्तीति विचार्यते ।

तत्र तावद्ग्रन्थारम्भे वराहमिहिरोक्तसूर्यसिद्धान्तानुसारेणोज्जयिन्यां दिनदले भगणात्मको रविः = $-\frac{४४२}{२६२२०७} = -\left(\overset{रा}{0} \mid 0° \mid ३२' \mid ४०''\right) = \overset{रा}{११} \mid २६° \mid २८' \mid २०''$ अयं गतिं ५६' । ८'' चतुर्थांशेन १४' । ४७'' सहितो जातः सूर्यास्तसमये लङ्कायां रविः = $\overset{रा}{११} \mid २६° \mid ४२' \mid ७''$

अथ रोमकमतानुसारेण ग्रन्थारम्भसमये रविः = $-\frac{६५}{५४७८७} = -\left(\overset{रा}{0} \mid 0° \mid २५' \mid ३७''\right)$
$= \overset{रा}{११} \mid २६° \mid ३४' \mid २३''$

सूर्यसिद्धान्तीयो रविः = ११ । २६° । ४२' । ७''
रोमकमतीयो रविः = ११ । २६ । ३४ । २३
अनयोरन्तरं = ० । ० । ७ । ४४

एवं ग्रन्थारम्भसमये चन्द्रो भगणात्मकः = $-\frac{६७०२१७}{२४५८६५०६} = -\left(\overset{रा}{0} \mid ६° \mid ४८' \mid ४४''\right)$
$= \overset{रा}{११} \mid २०° \mid ११' \mid १६''$ दिनदले । स च दिनगतिं ७६०' । ३५'' चतुर्थांशेन सहितो
३ । १७ । ३६
जातो रव्यस्तसमये लङ्कायां चन्द्रः = $\overset{रा}{११} \mid २३° \mid २८' \mid ५५'' \mid$

रोमकमतेन ग्रन्थारम्भसमये चन्द्रः = $-\frac{१६८४}{१०४०६५३} = -\left(\overset{रा}{0} \mid 0° \mid ४१' \mid १०''\right)$
$= \overset{रा}{११} \mid २६° \mid १८' \mid ५०''$

रोमकमतीयो विधुः = ११ । २६° । १८' । ५०''
सूर्यसिद्धान्तीयो विधुः = ११ । २३ । २८ । ५५
} अनयोरन्तरं ५° । ४६' । ५५''

अथ तस्यासन्नस्तु रोमकप्रोक्तः स्पष्टतरः साविच इत्यादिना द्वयोर्मतयोरन्तरं समुचितमेव तथापि प्रायः सर्वसिद्धान्तानुसारेण रवौ न महदन्तरं पतति । पूर्वसाधितरव्यन्तरं ७' । ४४'' स्वल्पमेव तेन रोमकमतानुसारेणाचार्येणोज्जयिन्यामर्द्धास्तसमये ग्रहाः साधिता इति युक्ततरं विभाति "ततः अस्तगमवन्त्यामिति रोमकमतानुसारिचन्द्रकेन्द्रसाधनश्लोकपाठः साधुरिति प्रतीयते । अथ यदि सूर्यास्तकालेऽवन्त्यां रोमकमतेन ग्रहाः सिद्धा भवन्तीति कल्प्यते तदा अवन्त्यामस्तकालिको रविः = $\frac{\text{अह} \times १५० - ६५}{५४७८७}$ यवनान्तरजा नाड्यः सप्तावन्त्यां त्रिभागसंयुक्ता इत्यादिना देशान्तरघटिकाः $७\frac{१}{३} = \frac{२२}{३}$ वा देशान्तरं दिनात्मकं

$= \frac{२२}{१८०} = \frac{११}{९०}$ एतत्संबंधिनी रविगतिः $= \frac{\frac{११\times १५०}{९०}}{५४७८७} = \frac{१८}{५४७८७}$ स्वल्पान्तरात् । उज्जयिन्यामस्तकालिको रविर्देशान्तरगतिसहितो जातो यवनपुरेऽस्तकालिको रविः $= \frac{१५० \text{ अह} - ४७}{५४७८७}$ अयमेव रविः "अर्द्धास्तमिते भानौ यवनपुरे सोमदिवसाद्ये" इत्याद्युक्त्याऽहर्गणसिद्धो भविष्यति ॥ अथ रौमकयुगारम्भसमये रविः पूर्णं भविष्यति ग्रन्थारम्भसमये च $-\frac{४७}{५४७८७}$ एतावान् भगणात्मकस्तच्च रौमकयुगारम्भात् ग्रन्थारम्भपर्यन्तं कियन्ति दिनानि व्यतीतानीति न ज्ञायते तत्प्रमाणं या १ अयं १५० गुणितः १५०या अयं ५४७८७ भक्तः लब्धिः पूर्णभगणात्मिका र कल्प्यते ततः शेषमानम् $= १५० य - ५४७८७र$ इदमवश्यं $- ४७$ समं भविष्यति ततः $१५० य - ५४७८७ र = - ४७ \therefore \frac{१५० य + ४७}{५४७८७} = र$ इदं रमानमभिन्नं यमानं चाभिन्नं तेन यमानमभिन्नं तथा कल्पनीयं यथा तन्मानं १५० अनेन गुणितं ४७ युक्तं ५४७८७ भक्तं सत् शुध्येत् ।

तदर्थं कुट्टकविधिना

```
१५०) ५४७८७ (३६५
     ४५०
     ------
      ९७८
      ९००
      ------
       ७८७
       ७५०
       ------
        ३७) १५० (४
             १४८
             ------
               २) ३७ (१८
                  ३६
                  ---
                   १
```

क्षेपक्षेपे लब्धी	०
	३६५
	४
	१८
	१
	०

उपान्तिमेन स्वोर्द्धे हतेऽन्त्येन युते तदन्त्यं त्यजेदिति कृते जातं राशियुग्मं $\frac{७३}{२६६६३}$ अधरं राशिं क्षेपेण ४७ नेन सङ्गुण्य हरेण ५४७८७ विहृते शेषं ४७८४७ = यावत्तावन्मानम् । परन्त्वनेन यावत्तावन्मानेन चन्द्रक्षेपको न समायातीति महदसमञ्जसम् । यदि देशान्तरसंस्कारं विनैव ४७ स्थाने ६५ क्षेपः परिकल्प्यते तदा यावत्तावन्मानं = ३४६६८ एतेनापि मानेन चन्द्रक्षेपो न समायाति । अनेनेदमनुमीयते यद्रौमकमतानुसारेणावन्त्यां ये चन्द्रादीनामस्तकाले क्षेपाः पठिताः सन्ति ते निरवयवा न

स्वल्पान्तरान्निरवयवाः कल्पिताः । अस्माभिस्तु अवास्तवनिरवयवक्षेपमानं प्रकल्प्य कुट्टकविधिना यावतावन्मानं साधितं तेनैव कारणेन सम्यक् नायाति । अथ यदि रविचन्द्रक्षेपाभ्यां समीकरणद्वयेन कुट्टकविधिना यावतावन्मानं साध्यते तदा तु

$$१५० \text{ या} - ५४७८७ \text{ र} = -६५ \quad \therefore \text{ या} = \frac{५४७८७ \text{ र} - ६५}{१५०}$$

$$३८१०० \text{ या} - १०४०६५३ \text{ ल} = -१६८४ \quad \therefore \text{ या} = \frac{१०४०६५३ \text{ ल} - १६८४}{३८१००}$$

$$\text{ततः } \frac{५४७८७ \text{ र} - ६५}{१५०} = \frac{१०४०६५३ \text{ ल} - १६८४}{३८१००}, \text{ १५० अनेन गुणिते}$$

$$५४७८७ \text{ र} - ६५ = २५४ \ (१०४०६५३ \text{ ल} - १६८४)$$

$$= २६४४०२०६२ \text{ ल} - ५०३६३६$$

$$\therefore \text{ र} = \frac{२६४४०२०६२ \text{ ल} - ५०३८७१}{५४७८७} = \text{अत्र ल मानवशेन यत् रमानमागतं यमाने तस्योत्थापने दत्ते यमानम्}$$

$$= \frac{५४७८७ \text{ र} - ६५}{१५०} = \frac{२६४४०२०६२ \text{ ल} - ५०३६३६}{१५०} = १७६२६८० \text{ ल} - ३३५६ + \frac{६२ \text{ ल} - ८६}{१५०}$$

$$= १७६२६८० \text{ ल} - ३३५६ + \frac{३१ \text{ ल} - ४३}{७५} \text{ अत्र कुट्टकेन लमानं २८ यमानेऽस्योत्थापने}$$

दत्ते $\text{य} = १७६२६८० \times २८ - ३३५६ + \frac{३१ \times २८ - ४३}{७५} = १७६२६८० \times २८ - ३३५६ + ११$

$= १७६२६८० \times २८ - ३३४८ = ४६३५५०४० - ३३४८ = ४६३५१६६२$ इदं मानं महदसम्भवं तेन रोमकयुगारम्भः कुट्टकविधिनाऽपि न सिध्यति क्षेपाणामसमीचीनत्वात् । इत्यलं प्रसङ्गागतविचारेण ।

७–८. इदानीमर्कचन्द्रयोः फलमाह अंशाशीत्येत्यादि ।

अर्कः अशीत्यंशैर्८०र्वर्रहितस्तदा रविकेन्द्रं भवति, एवं चन्द्रः स्वोच्चेन रहितश्चन्द्रकेन्द्रं भवति । तस्य केन्द्रस्य ज्या चेद्भवेत्तदा चतुर्दशगुणा शशिनो रूपाग्नि ३१ गुणा, एते द्वे व्योमरसानले ३६० भक्ते ये लब्धे तयोश्चापं कृत्वा स्थानद्वये स्थाप्यम् । शशाङ्कवशात् चन्द्रवशाद्यच्चापमागतं तदंशश्चक्रस्य प्रथमेऽर्द्धे मेषादिषट्कस्थे केन्द्रे चयः कर्तव्यश्चन्द्रे । पश्चिमे भागे तुलादिकेन्द्रे च चयः धनं कर्तव्य एवं रवावपि रविफलसंबन्ध्यंशः संस्कार्य इत्यर्थाज्ज्ञायत इति ।

अत्रोपपत्तिः । अशीत्यंशसमं रवेरुच्चं कल्पितं साम्प्रतकालिकप्रसिद्धसूर्यसिद्धान्तमतेन सप्तसप्ततिरंशा रवेरुच्चमायाति । अथोच्चेन हीनोऽर्कस्तस्य केन्द्रं भवति एवं चन्द्रोऽपि स्वोच्चेनस्तत्केन्द्रं केन्द्रज्या मन्दपरिधिना गुण्या भांशै ३६० र्हृता भुजफलं तच्चापं मन्दफलमिति प्रसिद्धं तच्चार्यभेण रवेर्मन्दपरिधिः १४ समो विधोश्च ३१ मितः कल्पित इति – उपपन्नं फलानयनम् । कार्यान्तरार्थं तच्चापं पृथक् स्थापितम् । कार्यमपि भुजान्तरसंस्कारार्थं रवेर्मन्दफलस्यैव साहचर्यादाचार्येणोभयोः पृथक्स्थापनमुक्तम् । मेषादिषट्के मन्दकेन्द्रे छेदके मध्य-

ग्रहात्पृथक् स्फुटो ग्रहो दृश्यते तुलादिषट्के च मध्यग्रहादयत एव तेनाचार्योक्ता धनर्णेतां समीचीनैवेति सर्वमुपपन्नम् ।

९. इदानीं भुजान्तरमाह सौर्यमिति ।

सूर्यस्य मन्दफलं यत् पृथक् स्थापितं तत् गत्या ग्रहगत्या गुणितं खखाष्ट्रियमै-२१६०० र्भक्तं लब्धं यद्यर्के प्रथमं चापं धनं कृतं तदेदमधुनाऽऽगतं फलमपि धनं कार्यं यदि ऋणं तदा ऋणं कर्तव्यमित्यर्थः । एवं चन्द्रगत्युत्पन्नं फलं चन्द्रे च दिवाकरवत् सूर्यवद्धनर्णे कार्ये यदि सूर्यफलं सूर्ये धनं कृतं तदेदं फलं चन्द्रे धनं कार्यं यदि च सूर्ये तत्फलमृणं कृतं तदेदं चन्द्रे च ऋणं कर्तव्यमित्यर्थः ।

अत्रोपपत्तिः । पूर्वं मध्यमार्कस्य दिनदले रविचन्द्रौ साधितावहर्गणेन । इदानीं स्फुटार्कस्य दिनदले रविचन्द्रौ साधयति। धने मन्दफले मध्यमार्काऽनन्तरं स्फुटरविर्याम्योत्तरवृत्ते ह्यायाति ऋणे तु पूर्वमेव। अतो रविमन्दफलभवकालेन चालितौ रविचन्द्रौ स्फुटरविदिनदले सम्यग्भविष्यतः । चालनं तु रविमन्दफलकलातुल्यमसुं प्रकल्प्याचार्येणानीतं तच्चानुपातः । यद्यहोरात्रासुभि २१६०० र्ग्रहगतिस्तदा रविमन्दफलकलातुल्यासुभिः किं जातं भुजान्तरं $= \frac{\text{ग}\text{ग} \times \text{र}\text{फ}}{२१६००}$ धनर्णवासना पूर्वं स्फुटरविदिनदलप्रतिपादनेन स्फुटेति ।

१०. इदानीं देशान्तरमाह पञ्चाशतेति

पञ्चाशता चिभिस्त्र्यंशसंयुतैस्त्र्यंशाधिकचिपञ्चाशद्योजनैः ५३$\frac{१}{३}$ कथंभूतैरेखादेशात् समपूर्वापरस्थैः एका नाडी भवति सा नाडी पूर्वदेशान्तरे नित्यं शोध्या पश्चिमदेशान्तरे देया च । अत्रैतदुक्तं भवति पूर्वसिद्धा ग्रहा उज्जयिन्यां दिनदले जाता उज्जयिन्याः पूर्वदेशे त्र्यंशाधिकचिपञ्चाशद्योजनान्तरिते दिनदले एकघटीरहिते समये ते ग्रहा भविष्यन्ति पश्चिमदेशे त्र्यंशाधिकचिपञ्चाशद्योजनान्तरिते च दिनदलानन्तरमेकघटीमिते काले ते ग्रहा आगमिष्यन्तीति ।

रेखादेशात्पूर्वदेशे प्रथमं मध्याह्नकालस्ततोऽनन्तरं रेखादेशे पश्चिमदेशे तु रेखादेशमध्याह्नानन्तरं मध्याह्नकालो भवति देशान्तरघटीमिते समये तेन पूर्वपश्चिमस्थे देशे क्रमेण शोधनं धनं शोभनमुक्तम् । देशान्तरघट्यर्थं द्वात्रिंशच्छतमितं स्पष्टभूपरिधिं प्रकल्प्यानुपातो यदि घटीषष्ट्या ६० स्पष्टभूपरिधिः ३२०० तदैकघट्या किं जातानि योजनान्येकघटी भवानि $= \frac{३२००}{६०} = ५३\frac{१}{३}$ इत्युपपन्नं सर्वम् ।

११–१२. इदानीं चालनार्थं मध्यमा गतीराह नवतिः सप्रशतीत्यादि ।

नवत्यधिकसप्रशती कला चतुस्त्रिंशद्विकलाः ९९०′ । ३४″ चन्द्रगतिरस्ति । एकोनषष्टि ५९ कला विकलाष्टकं च ५९′ । ८″ रवेर्मध्यमा गतिः । सप्तकलास्त्र्यंशैर्विकला विंशत्या रहिताः ६′ । ४०″ चन्द्रोच्चगतिर्भवति । अनया चन्द्रोच्चगत्या रहिता चन्द्रमध्यमगतिश्चन्द्रकेन्द्रगतिर्ज्ञेया । अनया केन्द्रगत्या वक्ष्यमाणप्रकारेण स्फुटगतिः सिध्यतीत्यर्थः ।

१३–१४. इदानीं स्फुटगतिमाह केन्द्रज्यान्तरेत्यादि ।

सा केन्द्रगतिरद्यतनकेन्द्रज्यासाधने यज्ज्यान्तरं तेनान्तरेण गुणिता तिथिवर्गेण २२५ भक्ता फलं मन्दपरिधौ परिणाम्य । अर्थात् तत्फलं मन्दपरिधिना गुण्यं भांशै ३६० भाज्यं यल्लब्धं तत्कार्मुकं गतिफलं भवति तत् मृगादिकेन्द्रे भुक्तौ मध्यगतौ ऋणं कर्कटादौ तु धनं कर्त्तव्यं तदैषाऽवशिष्टा संख्या तत्काले स्फुटा भुक्तिः स्यात् । एवं शशिनोरद्यतनश्वस्तनचन्द्रयोर्विशेषादन्तरादहोरात्रसम्बन्धिनी गतिरानेया । अथ मध्यमा भुक्तिर्व्यासार्द्धेन कल्पितचिज्यया १२० गुण्या स्फुटभुक्तिभक्ता तदा स्फुटः कलाकर्णो भवति ।

अत्रोपपत्तिः । अद्यतनश्वस्तनस्फुटग्रहयोरन्तरं स्फुटगतिरतोऽद्यतनश्वस्तनमन्दफलयोरन्तरं गतिफलं भवितुमर्हति तच्च पूर्वोक्तविधिना

$$\text{अद्यतनफलज्या} = \frac{\text{अद्यतनकेन्द्रज्या} \times \text{मंपरि}}{३६०}$$
$$\text{श्वस्तनफलज्या} = \frac{\text{श्वस्तनकेन्द्रज्या} \times \text{मंपरि}}{३६०}$$

अत्र स्वल्पान्तरात् फलज्यान्तरं फलान्तरज्यासमं प्रकल्प्यानयोरन्तरं कृतं तदा फलान्तरज्या

$= \frac{\text{मंपरि}}{३६०}$ (श्वस्तनकेज्या − अद्यतनकेज्या) अत्र केन्द्रज्यान्तरमद्यतनकेन्द्रज्यासाधने यद्भोग्यखण्डाख्यं २२५ चापे ज्यान्तरं तेनाद्यतनश्वस्तनकेन्द्रयोरन्तरेण केन्द्रगतिनामधेयेन चानुपातेनानीतं यदि पञ्चविंशत्यधिकशतद्वयेन भोग्यखण्डं लभ्यते तदा केन्द्रगत्या किं जातं तत्कालज्यान्तरवशात्केन्द्रज्ययोरन्तरं $= \frac{\text{भोखं} \times \text{केग}}{२२५}$ = श्वस्तनकेज्या − अद्यतनकेज्या । इदं मन्दपरिधिना गुण्यं भांशैर्भक्तं जाता पूर्वसाधिता फलान्तरज्या $= \frac{\text{भोखं} \times \text{केग} \times \text{मंपरि}}{२२५ \times ३६०}$ तच्चापं तत्कालज्यान्तरवशात् फलान्तरम् । अत एवैतस्य संस्कारेण तत्कालभुक्तिर्भवतीत्याचार्यः कथयति । प्रथमपदे ऋणमन्दफलमुपचयेन वर्त्ततेऽतः फलान्तरमृणम् । द्वितीये पदे ऋणफलमपचयेन भवत्यतः फलान्तरं धनं तृतीये धनमन्दफलमुपचयेनास्त्यतः फलान्तरं धनं चतुर्थे तु धनमन्दफलमपचयेन वर्त्ततेऽतः फलान्तरमृणम् । तेन चतुर्थप्रथमपदयोरर्थात् मृगादिकेन्द्रे फलान्तरमृणमन्यच्च कर्क्यादिकेन्द्रे धनं गतौ भवतीत्युपपन्नं भवति गतिस्पष्टीकरणम् । यथा यथा गतिरुपचीयते तथा तथा कलाकर्णोऽप्यपचीयते यथा यथा च गतिरपचीयते तथा तथा कलाकर्ण उपचीयते । अतो व्यस्तानुपातेन कलाकर्णानयनम् । यदि मध्यगत्या चिज्या १२० तुल्यः कर्णस्तदा स्फुटगत्या किं जातः स्फुटः कलाकर्णो व्यस्तानुपातेन $= \frac{\text{मध्यग} \times १२०}{\text{स्फुटग}}$ पूर्वं ज्यान्तरवशाद्या गतिः साधिता सा तत्काले चालनार्थमुपयुक्ता यतो भोग्यखण्डं न सर्वदा स्थिरम् । अतोऽद्यतनश्वस्तनशशिनोरन्तरादा गतिरुत्पद्यते साहोरात्रसम्बन्धिनी ज्ञेयेति सर्वमुपपन्नम् ।

१५. इदानीं योजनकर्णस्य स्फुटीकरणमाह । मुनिकृतेति ।

कलात्मकः स्फुटकर्णः मुनिकृतगुणेन्द्रिये ५३४७ निघ्नः खार्कै १२० र्भाजितस्तदार्कस्य कक्षा भवति । अत्र कक्षापदेन भूयहान्तरयोजनानि ज्ञेयानि । इदानीं यस्मिन् वृत्ते

ग्रहो भ्रमति तस्य वृत्तस्य संज्ञा कक्षेति भारतवर्षीया ज्योतिर्विदः कथयन्ति । एवं चन्द्रस्य स्फुटः कलात्मकः कर्णोऽग्निभिस्त्रिभिर्गुणितस्तस्य चन्द्रस्य कक्षा भूमध्यात्तदन्तरयोजनानि भवन्तीत्यर्थः ।

अत्रोपपत्तिः । त्रिज्यातुल्ये कलाकर्णे यदि ५३४७ योजनकर्णस्तदा स्फुटकलाकर्णेन किं जातं भूरव्यन्तरं $= \frac{५३४७ \text{ स्फुक}}{१२०}$ । एवं चन्द्रस्य मध्यमं योजनकर्णं ३६० एतन्मितं प्रकल्प्य स्फुटयोजनकर्णः साधितः । साम्प्रतकाले यस्य भूग्रहान्तरस्य स्फुटयोजनकर्णसंज्ञा तस्यैव कक्षानामाचार्यसमये । संज्ञाभेदे न काचिद्धानिः फलाविशेषात् ।

१६. इदानीं रविचन्द्रयोर्बिम्बे आह । खवसुखेति ।


खवसुखमुनीन्द्रविषयाः ५१४७०८० भानोः सूर्यस्य संख्या खकृतर्तुसुरगुणाः ३३३६४० शशिनश्चन्द्रस्य संख्या । एतत्संख्याद्वयं तात्कालिकमानार्थं तयोरविचन्द्रयोर्बिम्बमानज्ञानाय पृथग् स्वस्वकक्षया विभजेत् । रविसंख्या रविकक्षाहृता । चन्द्रसंख्या च चन्द्रकक्षाहृता । लब्धिः पुनस्त्रिंशद्गुणा तदा तयोः कलाबिम्बं आगच्छतः परन्तु त्रिंशद्भागहारविषये ग्रन्थकारः किमपि न वदति । कदाचिन्तदीयसमये पुनस्त्रिंशतापहृत्य बिम्बमानमानेयमिति प्रसिद्धा रीतिरासीत् तेनैव हेतुनाच किमपि न वदति—इत्यनुमीयते ।

अत्रोपपत्तिः । मध्यमं कलात्मकं रविबिम्बं $= \frac{६६२६}{३००}$ कलासमं प्रकल्पितं ततोऽनुपातो यदि मध्यमयोजनकर्णे कक्षापदवाच्येऽ५३४७स्मिन् मध्यमं बिम्बं $\frac{६६२६}{३००}$ लभ्यते तदा स्फुटकक्षया किं । अत्र व्यस्तानुपातेन स्फुटं बिम्बं $= \frac{६६२६ \times ५३४७}{३०० \times \text{स्फुक}} = \frac{५१४७०८०}{३० \text{ स्फुक}}$, एवं चन्द्रस्य मध्यमं कलाबिम्बं $= \frac{६२७}{३०}$ मध्यमयोजनकर्णं च ३६० इति प्रकल्प्य पूर्ववदानीतं स्फुटबिम्बं $= \frac{३३३६४०}{३० \text{ स्फुक}}$ । यथा यथा कर्णो वर्द्धते तथा तथा बिम्बमपचीयते यथा यथा कर्णो ह्रासमेति तथा तथा बिम्बमुपचीयत इति व्यस्तानुपातो युक्त एवाचेति सर्वमुपपन्नम् ।

१७–१८. इदानीं मध्यलग्नसाधनमाह । मध्यार्कलम्बिततिथेरित्यादि ।

मध्याह्नाद्यार्कवशेन लम्बिता तिथिरर्थात्, दशान्तसमये यो नतकालस्तत्संबन्धिनः प्राक्कपाले निरक्षराश्युदयैर्ये विपरीतेनांशा रवौ तत्समलिप्ता हानिः कर्तव्याः । अर्थात्प्राक् नतकालमिष्टं प्रकल्प्य निरक्षोदयैर्विपरीतेन मीनात्कुम्भः कुम्भान्मकर इत्यादिना येऽंशाः समायान्ति ते रवेः शोध्यास्तदा मध्यलग्नं भवति पश्चिमकपाले च क्रमेण मेषवृषेत्यादिक्रमेण नतकालसमेष्टकाले निरक्षोदयैर्येऽंशा आगच्छन्ति ते रवौ धनं कर्तव्यास्तदा मध्यलग्नं भवति । तस्मान्मध्यलग्नात् अपक्रमांशाः क्रान्त्यंशाः साध्याः । क्रमशः उत्तरदक्षिणगोलयोस्तैरंशैरक्षो वियुतो युतश्च ततस्तज्ज्या या सा मध्यसंज्ञा ज्ञेयेत्यर्थः ।

अत्रोपपत्तिः । कल्प्यते मे नाडीक्रान्तिवृत्तयोः सम्पातः । मेनिवि विषुवद्वृत्तं । मेमर क्रान्तिवृत्तं । ध्रुमनि याम्योत्तरवृत्तम् । ध्ररवि रविगतं ध्रुवप्रोतम् । र रविचिह्नं । म मध्यलग्नं । निव नाडीवृत्ते नतकालः पूर्वः । मे मेषादिः, वृ वृषादिः, मि मिथुनादिः । रम निविकालसम्बन्धिनोऽंशा निरक्षोदयैर्विपरीतक्रमेण । अतो मध्यलग्नं = मेम = मेर − रम । एवं चेत् म चिह्नमेव रविचिह्नं, रचिह्नमेव मचिह्नं । ध्रुमनि रविगतं ध्रुवप्रोतं । ध्ररवि याम्योत्तरवृत्तं कल्प्यते तदा निव पश्चिमनतकालः । मर तत्संबन्धिनः क्रमेणांशाः । तदा मध्यलग्नं = मेर




= मेम + मर । अत उपपन्नं दशमलग्नानयनम् । ख चेत्खस्वस्तिकं कल्प्यते तदा खनि = अक्षांशाः मनि = दशमलग्नस्य मध्यलग्नाख्यस्योत्तरा क्रान्तिस्तद्विशोधनेन खमनतांशा भवन्ति । एवं यदा निचिह्नाद्वृत्तिपभागे दशमलग्नं तदा तत्क्रान्तिर्दक्षिणा तदा क्रान्त्यक्षयोर्योगेन नतांशा भवन्ति । नतांशानां ज्या मध्यज्येति संज्ञाऽऽचार्येण कृता — इत्युपपन्नं सर्वम् ।

१६—२३. इदानीं लम्बनमाह । तिथ्यन्तविलग्नज्येत्यादि ।

तिथ्यन्ते दर्शान्तकाले यल्लग्नं तस्य ज्या काष्ठान्तज्यया परक्रान्तिज्यया हता स्वलम्बज्यया भक्ता । ततो या लब्धिः सा पूर्वप्रतिपादितमध्यज्यया गुणिता व्यासार्द्धेन १२० भाजिताऽच या लब्धिः सा वर्गिता कर्तव्या सा कृतिर्मध्यज्याकृतेः सकाशात् विश्लेषिता शोध्या पृथक्स्था स्थानद्वये स्थाप्या । एकस्या यन्मूलमागच्छेत्तत्सवितुः सूर्यस्य दृक्क्षेपाख्यं विचिभनतांशज्या भवति । संस्मृत्यर्थमविस्मरणार्थं तद्दृक्क्षेपाख्यं पृथक् स्थाप्यम् । ततस्त्रिज्यावर्गात् सकाशात् गणको दृक्क्षेपकृतिं जह्यात् त्यजेत् ततोऽवशेषस्य यन्मूलं तल्लग्नार्कयोरन्तरज्यया गुणितं त्रिज्यया १२० भक्तं फलं रवेः शङ्कुः स्यात् । शङ्कुकङ्कुलाख्यविंशतिशतकृत्योः शङ्कुत्रिज्याकृत्योरन्तरेण विश्लेषात् रहितात् पूर्वस्थापितवर्गात् स्थानद्वये यत्पूर्वं स्थापितं यस्यैकस्थानस्य च मूलं पूर्वं रवेर्दृक्क्षेपाख्यमागतं तस्मात् यन्मूलं तत् द्विनवकेनाष्टादशसंख्यया हृतं पृथक् रविचन्द्रकक्षाभ्यां विभज्य द्वयोः फलयोश्चापे अंशात्मके कृत्वा तद्भागानां विशेषादन्तरात् तिथिवत् कालः साध्यः स कालस्तिथ्यैनमनं भवति । पुनस्तत्संस्कारेण नूतनस्तिथ्यन्तस्तस्माल्लग्नादीन् कृत्वा पुनस्तत्तिथ्यैनमनं साध्यमर्थात् स लम्बनकालः पुनर्मृग्योऽन्वेषणीय एवमसकृत्कर्म तावत् कर्तव्यं यावदुत्पन्नः कालोऽविशेषः । अर्थाद्यदा पुनः पुनः स एव काल आगच्छेत्तदा स्थिरं कर्तव्यमित्यर्थः ।

अत्रोपपत्तिः । तिथ्यन्ते लग्नं कृत्वा तस्याया साध्यते यदि त्रिज्यया परक्रान्तिज्या लभ्यते तदा लग्नज्यया किं जाता लग्नक्रान्तिज्या = $\frac{\text{परक्रांज्या} \times \text{लज्या}}{\text{त्रि}}$ ततो यदि लम्बज्याकोट्या त्रिज्याकर्णोस्तदा लग्नक्रान्तिज्यया किं जाता लग्नाया = $\frac{\text{त्रि} \times \text{परक्रांज्या} \times \text{लज्या}}{\text{त्रि} \times \text{लंज्या}} = \frac{\text{परक्रांज्या} \times \text{लग्नज्या}}{\text{लंज्या}}$



अथ कल्प्यते, सप्रास' क्षितिजं । सखस' याम्योत्तरवृत्तं । लमवि क्रान्तिवृत्तं । लपृष्ठीयकेन्द्रात् लविचापेन नवत्यंशप्रमितेन खविअ वृत्तं कार्यं तदा वि विचिभलग्नं खविअ विचिभलग्नदृङ्मण्डलं । खम, दशमलग्नस्य मध्यलग्नस्य प्रा वा नतांशाः । खवि विचिभनतांशा दृक्क्षेपनतांशा वा । खप्रा पूर्वापरवृत्तं प्राल, लग्नस्यायाचापांशाः । र क्रान्तिवृत्ते रविस्थानं । खरर'उ रविदृङ्मण्डलं । र', लम्बितरविचिह्नं र'द, लम्बितरव्युपरि कदम्बप्रोतवृत्तमर्थात् क्रान्तिवृत्तपृष्ठीयकेन्द्रप्रोतवृत्तम् ।

रद, क्रान्तिवृत्ते रविलम्बनम् । लअ = ९०° । प्रास' = ९० ∴ अस' = प्राल = लग्नायांशासमम् । खविम चापजात्ये खकोणः अस' चापसमस्तेन स'खज्यया चिज्यया १२० यदि अस'ज्या लग्नाया लभ्यते तदा खमज्यया मध्यज्यया किं जाता मविचापस्य ज्या = $\frac{\text{लग्नाया} \times \text{मज्या}}{१२०}$ ततः स्वल्पान्तरात् खविमचापजात्यमृजुजात्यं प्रकल्प्य खम, मवि, ज्यावर्गान्तरपदं खविचापस्य ज्या दृक्क्षेपाख्यं साधितम् । दृक्क्षेपवर्गोनात् चिज्यावर्गात् पदं दृक्क्षेपकोटिज्या = कखचापस्य ज्या = विअ चापस्य ज्या । ततो लरउ, चापजात्ये लकोणो विअ, चापमितस्ततोऽनुपातो यदि लविज्यया चिज्या १२० मितया विअ चापज्या लभ्यते तदा लर चापस्य लग्नार्कान्तरमितस्य ज्यया किं जाता रउ चापज्या स एव रविशङ्कुस्तद्वर्गोनस्त्रिज्यावर्गो दृग्ज्यायाः खरचापज्यासमाया वर्गस्तच खविचापज्यायाः दृक्क्षेपाख्यायाः वर्गविशोधनेन यन्मूलं सा खविचापकोटिज्यापरिणता खविरचापजात्ये विरचापस्य ज्या खनचापज्या ज्ञेया । अच क, क्रान्तिवृत्तपृष्ठकेन्द्रं तस्मात् र चिह्नोपरि यत् कनरवृत्तं तच खचिह्नाल्लम्बः खनचापसमः । अथ यदि खरज्यया रविदृग्ज्यया खरनचिभुजे तत्सम्मुखकोणज्या चिज्या लभ्यते तदा खनज्यया किं जाता खनसंमुखकोणज्या खरनज्या विरखकोणकोटिज्यासमा । अथ रर'दचापजात्यमृजुजात्यं चेत्स्वल्पान्तरात् कल्प्यते तदा < विरख = < र'रद । र'रद कोणकोटिश्च रर'द कोणसमाऽतः पूर्वागता विरखकोणकोटिज्या $\frac{\text{खनज्या} \times \text{त्रिज्या}}{\text{खरज्या}}$ इयं रर'द कोणज्यासमा जाता । ततो रर'द जात्ये यदि चिज्यासमया कोणज्यया तत्संमुखभुजज्या र'रज्यासमा लभ्यते तदा रर'दज्यया किं जाता रदचापज्या लम्बनज्यासमा । र'र तच रवेर्दृग्लम्बनं तदाऽऽनयनम् चैराशि-

केन यदि चिज्यातुल्यया पृष्ठीयदृग्ज्यया परमलम्बनज्या लभ्यते तदेष्टपृष्ठदृग्ज्यया खर'चापज्यासमया किं स्वल्पान्तरात् खर, खर' अनयोः समत्वं प्रकल्प्य जाता दृग्लम्बनज्या रर'ज्यासमा $= \frac{\text{ज्यापरमलं} \times \text{ज्याखर}}{\text{त्रिज्या}}$ परमलम्बनज्या तु भूव्यासार्द्धचिज्याघातेन ग्रहकर्णभक्तेन समा भवति ततः ज्यापरमलं $= \frac{\text{भूव्यासार्द्ध} \times \text{त्रिज्या}}{\text{यक}} = \frac{१८ \text{ त्रिज्या}}{\text{यक}}$ यतोऽपवर्त्तितो ग्रहकर्णसजातीयो भूव्यासः षट्त्रिंशत्सम इत्यये चन्द्रग्रहणे वक्ष्यति चाचार्यः । एवम्

$$\text{ज्यापलं} = \frac{१८ \text{ त्रिज्या}}{\text{यक}} \text{ । } \text{ज्यारर}' = \frac{\text{ज्यापलं} \times \text{ज्याखर}}{\text{त्रिज्या}} = \frac{१८ \text{ ज्याखर}}{\text{यक}} \text{ । } \text{ज्या} < \text{रर}'\text{द}$$

$$= \frac{\text{खनज्या} \times \text{त्रिज्या}}{\text{ज्याखर}}, \text{ लम्बनज्या} = \text{ज्यारद} = \frac{\text{ज्यारर}' \times \text{ज्या} < \text{रर}'\text{द}}{\text{त्रिज्या}} = \frac{१८ \text{ ज्याखर}}{\text{यक}} \times \frac{\text{ज्या} < \text{रर}'\text{द}}{\text{त्रिज्या}}$$

$$= \frac{१८ \text{ ज्याखर}}{\text{यक} \cdot \text{त्रिज्या}} \cdot \frac{\text{खनज्या} \times \text{त्रिज्या}}{\text{ज्याखर}} = \frac{१८ \text{ खनज्या}}{\text{यक}} \text{ ।}$$

अथ दर्शान्तकाले यद्रविचिह्नं तदेव चन्द्रचिह्नं च क्रान्तिवृत्तेऽतः सर्वं कर्म चन्द्रलम्बनसाधने रविवत् किन्तु तत्र चन्द्रकर्णो हरो भवतीति विशेषः । एवं रविचन्द्रयोर्लम्बनज्ये प्रसाध्य तच्चापांशान्तरतोऽर्थाल्लम्बनान्तरतस्तिथिवत्कालः साध्यः । लम्बनान्तरं षष्टिगुणितं गत्यन्तरभक्तं कालो भवति । अनेन गर्भीयदर्शान्तः संस्कार्यः । अत्र प्रसिद्धत्वात्संस्कारो न प्रदर्शित आचार्येण वस्तुतस्तु विचिभलग्नाद्रवावूने लम्बनं धनं दशान्तघटिकासु योज्यमन्यथा ऋणं कर्त्तव्यमिति ज्ञेयमेवं कृते पृष्ठीयदर्शान्तः स्थूलो भवति यतः पृष्ठीयदर्शान्तकालिकलम्बनेन संस्कृतो गर्भीयदर्शान्तः पृष्ठीयदर्शान्तो भवति । पूर्वं पृष्ठीयदर्शान्तस्याज्ञानाद्गर्भीयदर्शान्तकालिकलम्बनं प्रसाधितं तत्स्थूलं तत्संस्कृतो गर्भीयदर्शान्तः पृष्ठीयदर्शान्तश्च स्थूलोऽस्मात्स्थूलपृष्ठीयदर्शान्तवशात्पुनः सर्वं लग्नादि विधाय लम्बनं साध्यं तस्य गर्भीयदर्शान्ते संस्कारेणापरः पृष्ठीयदर्शान्तो ज्ञेयः पुनरस्मात् पूर्वोक्तं सर्वं विधाय लम्बनं साध्यमेवासकृद्यावदविशेष इति सर्वं निरवद्यम् ॥

२४—२५. इदानीं नतिं स्पष्टनतिं चाह । अविशेषादित्यादि ।

अविशेषात् पूर्वं स्थिरीकृतात्कालात् यद् दृक्क्षेपाख्यमागच्छति । अर्थात् पृष्ठीयदर्शान्तकाले यद् दृक्क्षेपाख्यमागच्छेत् तत् वस्वेक१८घ्नं पृथक् रविचन्द्रकर्णाभ्यां रविचन्द्रकर्णाभ्यां विभज्य लब्धचापांशान्तरं नतिर्मध्यज्यादिक्का ज्ञेया । ज्याविधिना चन्द्रराहुविवरज्ययाऽनुपातेनार्थात् चिज्यया परमशरो लभ्यते तदेष्टचन्द्रराहुविवरज्यया किमित्यनुपातेन तत्कालभवं विक्षेपं प्राप्य तेन शरेण सा पूर्वागता नतिः सहिता वोना समानान्यद्दिक्के नतिशरयोस्तदा स्पष्टा नतिः स्यात् ततः स्वैः स्वैः प्रमाणैर्यत् स्थितं यासं तद्वदेत् । अर्थात् मानैक्यार्द्धं स्पष्टनतिविहीनं तत्र स्थितो यासो भवतीत्यादि गणको वदेत् ।

अत्रोपपत्तिः । यदि चिज्यया परमलम्बनज्यातुल्या नतिज्या तदा दृक्क्षेपाख्येन किं जाता नतिज्या $= \frac{\text{ज्यापरलं} \times \text{दृक्क्षे}}{\text{त्रिज्या}} = \frac{१८ \times \text{त्रिज्या} \times \text{दृक्क्षे}}{\text{यक} \times \text{त्रिज्या}} = \frac{१८ \text{ दृक्क्षे}}{\text{यक}}$ एवं पृथक् पृथक् रविचन्द्र-

योर्नतिज्ये विधाय तच्चापांशान्तरं रविचन्द्रयोर्याम्योत्तरमन्तरं साध्यं पूर्वं च शरसममन्तरं दर्शान्ते गर्भाभिप्रायेण रविचन्द्रयोरासीत् । इदानीं पृष्ठाभिप्रायेण तयोरन्तरसाधनार्थं शरनत्योः संस्कारः कृतस्तस्य स्पष्टनतिसंज्ञा कृता साम्प्रतकाले स एव स्पष्टशरपदेनोच्यते भास्कराचार्यादिभिः । एवमनया स्पष्टनत्या ग्रासादिकं चन्द्रग्रहणवत् साध्यमिति ।

२६–२७. इदानीं स्थितिसाधनमाह । अवनतिवर्गमित्यादि ।

प्रथमः श्लोको रोमकसिद्धान्तीयसूर्यग्रहणस्य षोडशश्लोकवत् इति सुगमः । ग्रहणादिना ग्रहणस्पर्शकालेन यस्तिथ्यवनामो लम्बनं भवेत् तत्स्थित्योरन्तरं स्पष्टा स्पर्शकालस्थितिः । यदि लम्बनं भिन्नगोलभवमर्थाद्भिन्नदिक्कं भवेत् तदा धनं कर्तव्यमेवं स्पर्शकालस्थितिः स्पष्टा भवति । एवं मौक्तिकस्य कालस्यावनामवशेन लम्बनवशेन स्फुटा मोक्षकालस्थितिः साध्या । अत्र स्थितिपदेन पूर्वोक्तं स्थितिदलं ज्ञेयम् । अर्थादेका स्पार्शिकस्थितिरन्या मौक्तिकस्थितिरेवं स्थितिद्वययोगेन पूर्वोक्तस्थितिकाल आयातीति ।

अत्रोपपत्तिः । गर्भीयदृष्टिचिह्नोत्था स्थितिर्लम्बनसंस्कृता पृष्ठीयदृष्टिचिह्नाभिप्रायेण भवतीति सुगमा ॥


इति सूर्यसिद्धान्ते सूर्यग्रहणं नाम नवमोऽध्यायो जात इति ।

अथ सूर्यसिद्धान्तमतेन चन्द्रग्रहणाधिकारः ।

१–२· तत्र तावद्भूभानयनमाह । रविकक्षेत्यादि ।

रविकक्षा (भूकेन्द्राद्व्यन्तरं पूर्वं साधितं यत्तदेव कक्षाशब्देनोच्यते) नवत्या ९० गुणा षडश्वदस्रै २७६ रुद्धृता फलं षट्त्रिंघ्नायाः षट्त्रिंशद्गुणायाश्चन्द्रकक्षाया हरः स्यात् । हरेण हृते यो लब्धस्तेन हीनो योजनात्मको भूव्यासो भूभाव्यासस्तस्मिन् वियदर्कै १२० र्गुणिते शशिकक्षया विभक्ते फलस्य कार्मुकं चापं तमसो राहोर्व्यासः कलात्मकः स्यात् । चन्द्रतमोव्यासयुतिं द्वाभ्यां विभज्य ततस्तद्वर्गादित्यत्र सम्बन्धः ।

अत्रोपपत्तिः । र रविकेन्द्रं, भू भूकेन्द्रं, दचट चन्द्रकक्षा,



शिरग, भूम्यवरुद्धैरविकरैस्तमः सूच्यर्थं । रग रविव्यासार्द्धं शिगरेखोपरि लम्बरूपम् । भूघ भूव्यासार्द्धं शिघरेखोपरि लम्बरूपम् । चज भूभाव्यासार्द्धं शिगरेखोपरि लम्बरूपम् । च, शिचभूरमध्यरेखायां चन्द्रकक्षावृत्तस्थं भूभाकेन्द्रम् । भूकरेखा शिघसमान्तरा, चतरेखा च शिघरेखासमान्तरा कृता । तदा भूरकजात्यत्रिभुजे भूर = रविकर्णः । रक = रग − कग = रग − भूघ ॥ भूचतजात्यत्रिभुजे भूच = चन्द्रकर्णः अत्र नवीनानां मतेन भूयहान्तरस्य रविकर्णनामाऽस्माभिर्लिख्यते । ततो भूकचतसमानान्तररेखाद्वयं चररेखा छिनत्ति तेन < करभू = < तभूच । < क = < त = समकोण । तेन पूर्वोक्तं त्रिभुजद्वयं मिथः सजातीयं ततोऽनुपातो यदि रविकर्णेन भूरमितेन भूरविव्यासार्द्धान्तरं करमितं लभ्यते तदा चन्द्रकर्णेन भूचमितेन किं लब्धं भूतमितं तस्य भूव्यासार्द्धे भूघमिते शोधनेनावशिष्टो घतसमो जचसमानो भूभाव्यासखण्ड इति स्थितिः । तत्रापवर्तितरविव्यासः = १४६ योजनानि । भूव्यासश्च ३६ योजनानि । ततः करः = ७३ − १८ = ५५ ॥ भूत = $\frac{\text{कर} \times \text{भूच}}{\text{रभू}} = \frac{५५ \times \text{चक}}{\text{रक}}$

$= \frac{५५ \times \text{चक} \times ९०}{९० \text{ रक}} = \frac{\frac{५५ \times ९० \text{ चक}}{२७६}}{\frac{९० \text{ रक}}{२७६}} = \frac{९८ \text{ चक}}{\text{छेदः}}$ ततः कलाकरणार्थमनुपातो यदि चन्द्रकर्णेन योज-

नात्मकेन भूभाव्यासार्द्धं तदा विज्यया १२० किं जाता भूभाव्यासार्द्धज्या = $\frac{\frac{१८\,\text{चक्र}}{\text{छेद}} \times १२०}{\text{चक्र}}$ एत-च्चापं द्विगुणं भूभाव्यासः कलात्मकः स्यात्तच ज्यामेव द्वाभ्यां सङ्गुण्य स्वल्पान्तरात्तच्चापमेव तमोव्यास इत्युक्तमाचार्यैः । एवं भूभाव्यासस्य ज्या = $\frac{\frac{३६\,\text{चक्र}}{\text{छेदः}} \times १२०}{\text{चक्र}}$ अत उपपन्नम् ॥

३–४. अथ ग्रहणस्थितिमाह । विक्षेपवर्गहीनादित्यादि ।


पूर्वश्लोके भूभाचन्द्रव्यासयोगार्द्धस्य यो वर्गः कृतस्तस्माद्वर्गाद्विक्षेपस्य शरस्य वर्गेण हीनात् यदासन्नपदं तस्मिन् वियद्द्विचन्द्रै १२० र्गुणिते रविचन्द्रगत्यन्तरभक्तेऽच लब्धाः स्थिते ग्रहणादिविरामध्ये नाडिकाः स्युः । ततः स्पर्शकालः साध्योऽर्थात्पूर्णोन्तः स्थितदलेनोनः स्पर्शकालः । तस्मिन् समये य इन्दुरसौ ग्रग्रहणेन्दुस्तस्मात्पुनर्विक्षेपं कृत्वाऽनया पूर्वोक्तया रीत्या पुनस्स्थितिर्भवति । एवं यावत् स्थित्यविशेषः कृतस्तावत् पुनः पुनः कर्तव्या स्थितिरर्थाद्यदा पुनः पुनः सैव स्थितिरागच्छेत्तदा तत्कर्म स्थिरं ज्ञेयमित्यर्थः ।

अत्रोपपत्तिः । मानैक्यार्द्धं कर्णः स्पर्शकालिकः शरः कोटिस्तद्वर्गान्तरपदं ग्राहकमार्ग-खण्डे भुजस्तस्य घटीकरणार्थमनुपातो यदि गत्यन्तरकलाभिः षष्ट्यधिकास्तदा भुजकलाभिः किं जाताः स्थित्यर्द्धनाडिकाः = $\frac{६० \times \text{भु}}{\text{गत्र}}$ एता द्विगुणा ग्रहणादिविरामकालः = $\frac{१२० \times \text{भु}}{\text{गत्र}}$ पूर्वं स्पार्शिकशरात्तानादिदं मध्यकालिकशरवशेन सर्वं कर्म कृतमतोऽसकृत्कर्मणा स्फुटः स्थितिकालो भवतीत्युपपन्नम् ।

५–६. इदानीमिष्टकालिकग्रासमाह । अर्केन्दुभुक्तिविवरमित्यादि ।

रविचन्द्रगत्यन्तरं या वाञ्छितनाड्य इष्टनाड्यस्ताभिर्गुणितं षष्ट्या ६० भक्तं तस्य मानैक्यार्द्धशरवर्गान्तरमूलसमा याः पूर्वं स्थितिलिप्ता आगतास्तासां चान्तरस्य तात्कालिक-चन्द्रवशाद्यो विक्षेपः शरो भवेत्तस्य च कृतियोगाद्यत्पदं भवेत् तच्छशिराहुकलाद्यमान-योगदलाच्चन्द्रभूभामानैक्यार्द्धाच्छोध्यं रविग्रहणे तु शशिरविमानैक्यार्द्धाच्छोध्यमित्यर्थत एव सिध्यति । एवं कृते यच्छेषं तद्रविचन्द्रयोस्तत्कालं ग्रस्तं ग्रासमानं ज्ञेयमिति ।

अत्रोपपत्तिः । चं, चन्द्रविम्बकेन्द्रं, भू, भूभाविम्बखण्डम्, स्पभू, स्थित्यर्द्धकला याः पूर्वं मानैक्यार्द्धशरवर्गान्तरमूलसमाः सिद्धाः । गत्यन्तरवशेन यदा चन्द्रविम्बकेन्द्रं चं स्थाने तत्स्थानं च कदम्बप्रोतेऽर्थात् क्रान्तिवृत्तपृष्ठीयकेन्द्रप्रोतवृत्ते भू,स्थाने भविष्यति तदा पूर्वापरान्तराभावात् मध्यग्रहणं तयोः केन्द्रान्तरं च मध्यकालिकशरसमं चंभूप्रमितं भविष्यति । अथ कल्प्यते गत्यन्तरवशात् स्प, स्पर्शस्थानात् इष्टकाले श, स्थानं चन्द्रस्य तदा स्पशकलानयनार्थमनुपातो यदि घटीषष्ट्या गत्यन्तरकलास्तदाऽभीष्टघट्या किं जाताः स्पशकलाः ।




तासां स्थितिकलानां च विवरे ऽवशिष्टा भूशकलाः । चंश तत्काले चन्द्रशरः । तद्वर्गयोगपदं तदा तयोः केन्द्रान्तरं = भूचं, जातम् । अथ, चंट = चंज − जट । उभयच भूट योजनेन चंट + भूट = भूचं = भूट + चंज − जट = मा.गे.द − जट ∴ जट = मानैक्यदल − भूचं । अथ जटसममेव तदा यास इत्युपपन्नं सर्वम् । एवं चन्द्रविम्बं रविविम्बं भूभाविम्बं च चन्द्रविम्बं प्रकल्प्य स्पष्टशरादिना रविग्रहणेऽपीष्टयासो बुद्धिमद्भिर्ज्ञेय इति ।

७. इदानीं विमर्दकालमाह । अन्त्याद्ययोरिति ।

अन्त्याद्ययोर्ग्राह्यग्राहकविम्बयोर्विशेषादन्तरादर्धं तस्य सूर्यग्रहणेऽवनतेः स्पष्टशरस्य च वर्गान्तरादुत्पदं चन्द्रग्रहणे च मानान्तरार्धशरवर्गान्तरादुत्पदं तद्द्विगुणं तस्मात् तिथिवत्कालं कृत्वाऽर्थोनतन्नत्यन्तरभक्तं षष्टिगुणमेवं रविचन्द्रयोर्विमर्दकालो भवति । अर्धादेतत्कालपर्यन्तं सकलं ग्राह्यविम्बं ग्राहकविम्बे निमज्जतीत्यर्थः ।

अत्रोपपत्तिः । कल्प्यते च ग्राह्यविम्बकेन्द्रम् । भू, ग्राहकविम्बकेन्द्रं संमीलनकाले चश शरः । द्वयोर्विम्बयोरन्तःस्पर्शबिन्दुश्च स्प । अथ ग्राह्यग्राहककेन्द्रयोर्गता भूचरेखा रेखागणितस्य तृतीयाध्यायेन वर्द्धिता सती स्पर्शबिन्दुं गमिष्यति तेन भूच = भूस्प − चस्प = मानान्तरार्धं = कर्णः । चश तत्काले शरस्तद्वर्गान्तरं ग्राहकमार्गखण्डे भुजः । स एव विमर्दार्धकलास्तत्संबधिकालानयनार्थमनुपातो यदि गत्यन्तरकलाभिः षष्टिघटिकास्तदा भुजकलाभिः किं जातः संमीलनकालान्मध्यग्रहावधिकालः स्वल्पान्तरान्मध्यग्रहादुन्मीलनपर्यन्तमप्येतावान् कालः कल्पित आचार्येणातः पूर्वागतः कालो द्विगुणः सम्पूर्णनिमज्जनकालो मर्दसंज्ञो




जातः = $\frac{२ \text{ भुज} \times ६०}{\text{गत्यन्तर}}$ अत उपपन्नं यथोक्तं सर्वम् ।

इति सूर्यसिद्धान्तमतानुसारेण चन्द्रग्रहणं नाम दशमोऽध्यायो जात इति ।

१–५. इदानीमनुवर्णनमर्थात्परिलेखमाह । यष्ट्या विध्यङ्गुलयेत्यादि ।


अन्त्याद्यदलैक्येन मानैक्यार्द्धेन विध्यङ्गुलाङ्कितया यष्ट्याऽऽदौ वृत्तं परिलिख्य दिशश्च पूर्वापरादि संप्रसार्य । आद्यस्य ग्राह्यस्य बिम्बार्द्धेनापरं वृत्तं विलिखेत् ।

चन्द्राकाशयोरन्तरांशाश्चन्द्रस्य सममण्डलीया नतांशा ये तेषामुत्क्रमज्यया वैषुवतीं ज्यामत्रज्यां निहत्य तस्य खार्कां१२०शा ये तत्सम्बन्धिनोऽंशान् उदयास्तमययोः पूर्वपश्चिमकपालयोः क्रमेणोदग्याम्यतो दद्यात् । अर्थात् प्राक्कपाले तेऽंशा उत्तरदिक्काः पश्चिमकपाले दक्षिणा ज्ञेया इत्यर्थः । राशिचययुतस्य चन्द्रस्य ये क्रान्त्यंशास्ते यद्युत्तरास्तदा दक्षिणवेद्या यदि दक्षिणास्तदोत्तरा इति । एवं क्रान्त्यंशान्यथादिशं गणकः कुर्यात् । एवं चापद्वयदानेन पूर्वापरायाः सिद्धिः स्यात् । ततो मत्स्येन याम्योदक्सिद्धिर्भवति । स्पर्शविन्दुज्ञानाय प्राक्चिह्नतः शशिनश्चन्द्रस्य दिग्व्यत्ययेन विक्षेपसूत्रं द्वितीयवृत्ते मानैक्यार्द्धवृत्ते स्पृशत् दिगन्तकं पूर्वापरपर्यन्तं कार्यम् । अर्थात् प्राक्चिह्नतः तच्छरसूत्रं मानैक्यार्द्धवृत्ते ज्याघट्टेयं यथा शरायं मानैक्यवृत्तपरिधौ शरमूलं चाधुनासाधितपूर्वापरसूत्रे लम्बरूपं भवेत् । ततस्तस्माच्छरायात् मध्यं केन्द्रपर्यन्तं सूत्र यत्रान्यं ग्राह्यवृत्तं स्पृशेत् तत्र स्पर्शो ज्ञेयः । एवं विपर्ययात् पश्चिमचिह्नात् मोक्षोऽपि ज्ञेयस्तत्र तु तात्कालिकान्मोक्षत्वात् मोक्षधर्मसंबन्धिनस्तात्कालिकाच्चन्द्रात्सर्वं विधाय तत्कालीना दिक् विधातव्या कर्त्तव्येति ।



अत्रोपपत्तिः । कल्प्यते स्पर्शकाले भू,भूभाविम्बकेन्द्रं, च चन्द्रविम्बकेन्द्रं । पूभूपू' क्रान्तिवृत्तखण्डम् । तत्समान्तरं चपू$_1$ । विभूवि' नाडीवृत्तखण्डं तत्समान्तरं चवि$_1$ । सभूस' सममण्डलखण्डं तत्समान्तरं च स$_1$ । भूपू$_1$वि$_1$स$_1$ मानैक्यखण्डं वृत्तं चश', स्पार्शिकश्चन्द्रशरश्चन्द्रदिक्कः । अथ सर्ववृत्तखण्डानि स्वल्पान्तरादृजुरेखारूपाणि प्रकल्प्य परिलेखः साध्यते । तत्र < सभूवि = < स$_1$ च वि$_1$ = अत्रवलनचापांशाः । < विभूपू = वि$_1$चपू$_1$ = अयनवलनचापांशाः । अथ च केन्द्रान्मानैक्यार्द्धेन यत् भूपू$_1$वि$_1$स$_1$ वृत्तं कृतं तत्र स$_1$ पूर्वचिह्नं प्रकल्प्य तस्मादद्यादिशमत्रवलनचापं यदि दीयते तदा वि$_1$ चिह्नज्ञानं तस्मादद्यादिशमयनवलनचापं, यदि दीयते तदा पू$_1$ चिह्नज्ञानं स्यात् ततः च पू$_1$ रेखा तात्कालिकपूर्वापरा क्रान्तिवृत्तसमान्तरा स्यात् तत्र लम्बरूपस्य शरस्य शभूप्रमितस्य श'चभिन्नदिक्कस्य दानेन

मानैक्यखण्डपरिधौ शराग्रे भूचिह्नज्ञानं भवति तस्मात्केन्द्रगतं सूत्रं भूचसंज्ञमवश्यं स्पर्शविन्दुलग्नं भवति अत्रश्चन्द्रविम्बपरिधौ तत्र स्पर्शो भवतीत्यत्र किं चित्रम् । एवं पश्चिमचिह्नान्मोक्षकालिकेन वलनादिना मोक्षविन्दुज्ञानं भवति ।



अथात्रवलनानयने ध्रुखख' याम्योत्तरमण्डलं, खख', सममण्डलं, विवं', नाडीमण्डलं, ध्रु नाडीवृत्तपृष्ठकेन्द्रमुत्तरं, स, सममण्डलपृष्ठकेन्द्रमुत्तरं, ग, ग्रहचिन्हं, ध्रुग, ग्रहोपरि नाडीवृत्तपृष्ठकेन्द्रप्रोतवृत्तं नाडीवृत्ते वा तत्समान्तरे गवि१ वृत्ते लम्बरूपं । सजग, ग्रहोपरि सममण्डलपृष्ठकेन्द्रप्रोतवृत्तं सममण्डले वा तत्समान्तरे गख१ वृत्ते लम्बरूपं तदा < वि१ गध्रु = समकोण । < ख१ गस = समकोण ।

∴ < वि१ गख१ = < ध्रुगस । अथ ध्रुगसकोणज्ञानार्थं ध्रुगसचिभुजे स कोणः खजचापमितः ग्रहस्य सममण्डलीयनतांशाः । ततो यदि ध्रुगज्यया क्रान्तिकोटिज्यया तत्संमुखग्रहसममण्डलनतांशज्या लभ्यते तदा सध्रुज्ययाऽत्रज्यया किं जाताऽत्रवलनज्या = $\frac{\text{ज्याग्रज} \times \text{ज्याग्र}}{\text{कोज्याक्रा}}$ अत्र प्राचीनसम्प्रदायानुसारेण खजज्यास्थाने तदुत्क्रमज्या क्रान्तिकोटिज्यास्थाने च चिज्या गृहीता ततोऽत्रवलनज्या = $\frac{\text{उज्याखज} \times \text{ज्याग्र}}{१२०}$ अस्याश्चापांशा अत्रवलनचापांशा भवन्ति। एवं यदि खख' नाडीवृत्तं विवि' क्रान्तिवृत्तं तयोः पृष्ठीयकेन्द्रे च क्रमेण स, ध्रु चिन्हे इति कल्प्यते या संपातविन्दुश्च ॥ तदा ध्रुगसकोणज्याऽऽयनवलनज्या, खध्रुगकोणः तच्चापसमो ग्रहकोटिसंमितः सगग्रहक्रान्तिकोट्यंशाः < गध्रुस = १८० − खध्रुत = १८० − गको = १८०−(९०−ग) = ९० + ग अतो यदि सगज्यया क्रान्तिकोटिज्यया तत्संमुखकोणज्या सचिभग्रहज्या लभ्यते तदा सध्रुज्यया परक्रान्तिज्यया किं जाताऽऽयनवलनज्या = $\frac{\text{ज्यापक्रा} \times \text{ज्यासचिभग}}{\text{कोज्याक्रा}}$ अत्र क्रान्तिकोटिज्यास्थाने स्वल्पान्तरात्त्रिज्या गृहीता तदा जाताऽऽयनवलनकोटिज्या = $\frac{\text{ज्यापक्रा} \times \text{ज्यासचिभग}}{१२०}$ = सचिभग्रहस्य क्रान्तिज्या तच्चापमायनवलनांशः । एवं मकारादिग्रहे उत्तराः कर्क्यादौ दक्षिणाः । अतोऽयनवलनांशा अयनदिक्का भवन्तीति । वलनविषये बहवो विशेषाः सिद्धान्तशिरोमणौ वा सिद्धान्ततत्त्वविवेके विलोकनीयाः ।

९. इदानीमङ्गुललिप्ता आह । लिप्राद्वयेनेति ।

हरिजे क्षितिजे ग्रहविम्बे सति लिप्ताद्वयेनैकमङ्गुलं भवति । अर्थात् तदा विम्बकला द्वाभ्यां हृता विम्बाङ्गुलानि भवन्ति। मेषरणे दशमेऽर्थात् मध्याह्ने यदा विम्बं भवति तदा कलाचयेणैकमङ्गुलं भवति विम्बकलास्तिभिर्भक्ता विम्बाङ्गुलानि भवन्ति तदेत्यर्थः । क्षितिज-खमध्यान्तरस्थे विम्बे दृष्टियुक्तार्थं दृग्गणितैक्यार्थमनुपातः कर्तव्यः । यदि दिनार्द्धसमोन्नत-काले एकलिप्रान्तरं तदा ऽभीष्टोन्नतकाले किं जातमन्तरं $= \frac{\text{उक्ता १}}{\text{दिनार्द्ध}}$ इदं कलाद्वयेन सहितमिष्ट-काले ऽङ्गुललिप्ता भवन्ति ।

अत्रोपपत्तिः । क्षितिजस्थं विम्बं वसुमतीगोलावरुद्धकरनिकरं विशालमिव प्रतिभाति । अतोऽल्पभाजकेन लिप्ताद्वयेन विभक्ते कलाविम्बेऽधिकान्यङ्गुलानि समायान्ति विम्बे । मध्याह्ने तु तद्विम्बं करनिकरपिहितत्वादत्यल्पं लक्ष्यते भूपृष्ठनिवासिभिरतोऽधिकेन भाजकेन लिप्ताच-येण विभक्ते कलाविम्बेऽल्पान्यङ्गुलानि भवन्ति ग्रहविम्बे । कलाद्वयं क्षितिजस्थं कलाचयं च मध्याह्नस्थं प्राचीनैरुपलब्ध्या लक्षितमिति मध्येऽनुपातः कर्तव्य इत्यत्र सुगमा वासना ।

तथा च श्रीपतिनोक्तम् ।

द्रष्टा महीव्यासदलेन यस्मात् समुच्छ्रितस्तिष्ठति भूमिपृष्ठे ।
नभस्थभानोर्निकटस्ततस्तं प्रभाकरं सूक्ष्ममवेक्ष्यते ऽसौ ॥
पिधीयते भानुवपुर्मयूखैः समन्ततः पङ्कजकर्णिकेव ।
तत्केसरैरम्बरमध्यवर्ती निरीक्ष्यते तेन च सूक्ष्ममूर्तिः ॥
वसुन्धरागोलनिरुद्धधामा दूरस्थितोऽयं सुखदृश्यबिम्बः ।
महीजवृत्तोपगतो विवस्वानतो महान् भात्यरुणो विरश्मिः ॥ इति

इति सूर्यसिद्धान्तमतानुसारेणाऽनुवर्णनं नामैकादशोऽध्यायः ॥

१–२. अथ पैतामहसिद्धान्तानुसारेणाहर्गणादिकमाह । रविशशिनोरित्यादि ।

रविशशिनो रविचन्द्रयोर्युगं पञ्चवर्षात्मकं भवतीति पितामहेन पञ्चवर्षाण्युपदिष्टानि तथा त्रिंशद्भिर्मासैरेकोऽधिमासो दिनानां द्विषष्ट्याऽवमं चैकमित्येतानि सर्वाणि ब्रह्मणा कथितानि । द्वाभ्यां रहितं शकं पञ्चभिरुद्धृत्य शेषवर्षाणां पूर्वनियमानुसारेणाधिमासावमे कृत्वा माघशुक्लप्रतिपदादेर्युगणमहर्गणं कुर्यात् । तद्युगणमानं चाह्नि दिवसे सूर्योदयाद्भवतीत्यर्थः ।

अत्रोपपत्तिः । प्रथमयुगारम्भः २शकेऽतो ऊनः शको युगसमूहो जातः । स च पञ्चभिस्तष्टो वर्तमानयुगवर्षाणि भवन्ति तेषां ब्रह्मनियमानुसारेणाहर्गणः साध्यः । अचार्येण ऊनमिति वदता २शको ब्रह्मसिद्धान्तकालो दर्शितः । अन्यथा ह्यूने न काचिदुक्तिरिति ।

३. इदानीं तिथिरविचन्द्रनक्षत्रानयनमाह । सैकषष्ट्यंशेति ।

युगणोऽहर्गणे स्वैकषष्ट्यंशसहिते तिथिर्भवति । अहर्गणे नवगुणिते उद्ध्यर्कैः द्वाविंशत्यधिकशतेन १२२ भक्ते धनिष्ठादां धनिष्ठादिगणनयाऽऽर्कं रविसंबन्धिनक्षत्रं भवति । एवमहर्गणमानं सप्तभिः खटियस ६१० भागैरूनम् । अर्थात् अहर्गणं दियसै ६१० र्भक्त्वा सप्तगुणितं लब्धं तच्चाहर्गणे रहितं कार्यं तदा धनिष्ठादिक्रमेण शशिनश्चन्द्रस्य नक्षत्रं ज्ञेयमित्यर्थः ।

अत्रोपपत्तिः । एकस्मिन् युगे सौरवर्षाणि = ५ सौरमासाः = ६० अधिमासौ = २ चान्द्रमासाः = ६२ ते त्रिंशद्गुणिताः तिथयः = १८६० अवमानि = ३० एभिरूनास्तिथयोऽहर्गणः = १८३० ततोऽनुपातो यदि १८३० दिने १८६० स्तिथयो लभ्यन्ते तदाऽहर्गणेन किं जातास्तिथयः $= \frac{१८६० \times अह}{१८३०}$ गुणहरौ त्रिंशतापवर्तनेन तिथयः

$= \frac{६२ \times अह}{६१} = अह + \frac{अह}{६१}$ अत उपपन्नं तिथ्यानयनम् । अथ रविनक्षत्रोपपत्तिः । युगारम्भे युगान्ते च रविनक्षत्रं धनिष्ठाऽत एकस्मिन्युगे पञ्चवारं धनिष्ठोपरि रविरागच्छति । अतो युगे २७ × ५ एतावन्ति रविनक्षत्राणि ततोऽनुपातो यदि १८३० दिने २७ × ५ रेतावन्ति रविनक्षत्राणि लभ्यन्ते तदाऽहर्गणेन किं लब्धानि रविनक्षत्राणि $= \frac{२७ \times ५ \times अह}{१८३०}$ पञ्चदशभिरपवर्तनेन रन $= \frac{६ \times अह}{१२२}$ अत उपपन्नं रविनक्षत्रानयनम् । अथ चन्द्रनक्षत्रानयनोपपत्तिः । एवमेकस्मिन् युगे चन्द्रनक्षत्राणि = २७ × ६७ ततोऽनुपातो यदि १८३० दिने २७ × ६७ चन्द्रनक्षत्राणि लभ्यन्ते तदाऽहर्गणेन किं जातानि चन्द्रनक्षत्राणि $= \frac{२७ \times ६७ \times अह}{१८३०} = \frac{६ \times ६७ \times अह}{६१०}$

$= \frac{६०३ \times अह}{६१०} = अह - \frac{७ अह}{६१०}$ अत उपपन्नं सर्वम् ॥

४. इदानीं शुक्लकृष्णपक्षीयतिथिज्ञानं व्यतिपातसाधनं चाह, प्रागर्द्ध इति ।

पूर्णान्तदर्शान्तयोः पर्वनामेति प्राचीनानां सम्प्रदायः । यदा मासस्य पूर्वार्धे पर्वज्ञानमर्थात् पूर्णान्तज्ञानमभीष्टं तदा पूर्वोक्तप्रकारेणागता तिथिरुत्तरा शुक्लपक्षीया ज्ञेयाऽन्यथा मासस्यापरस्मिन् दले पूर्वा कृष्णा तिथिर्ज्ञेयेति । अहर्गणे द्वादशगुणिते पञ्चाम्बरहृताशे ३०५ भक्ते लब्धा युगारम्भागता व्यतिपाता भवन्ति ।

अत्रोपपत्तिः । रविचन्द्रनक्षत्रयोगः सप्तविंशतितष्टः शेषं विष्कम्भादिक्रमेण सप्तविंशतियोगानां मध्ये योगो भवति ।

योगाश्चेमे

विष्कम्भः । प्रीतिः । आयुष्मान् । सौभाग्यम् । शोभनः । अतिगण्डः । सुकर्मा । धृतिः । शूलः । गण्डः । वृद्धिः । ध्रुवः । व्याघातः । हर्षणः । वज्रम् । सिद्धिः । व्यतिपातः । वरीयान् । परिघः । शिवः । सिद्धः । साध्यः । शुभः । शुक्लः । ब्रह्मा । इन्द्रः । वैधृतिः ।

तत्र युगारम्भे श्रवणान्तं रविनक्षत्रं चन्द्रनक्षत्रं चाश्विन्यादिक्रमेण तत्संख्या २२ तेन रविचन्द्रनक्षत्रयोर्युतिः = ४४ इयं सप्तविंशतितष्टा शेषं = १७ अतो विष्कम्भादिगणनया युगारम्भे सप्तदशसंख्याको व्यतिपात आयाति ।

अथैकस्मिन् युगे रविनक्षत्राणि = २७ × ५

चन्द्रनक्षत्राणि = २७ × ६७

रविचन्द्रनक्षत्रयोर्युतिश्च = २७ (६७ + ५) = २७ × ७२ इयं सप्तविंशतिभक्ता लब्धाः ७२ एकस्मिन् युगे व्यतिपातसंख्याः । ततोऽनुपातो यदि युगदिवसैः १८३० युगव्यतिपाता ७२ लभ्यन्ते तदाऽहर्गणेन किं आता व्यतिपाताः = $\frac{७२ \times अहः}{१८३०}$ षड्भिरपवर्त्य आता व्यतिपाताः = $\frac{१२ \times अहः}{३०५}$ अत उपपन्नं सर्वम् ।

सप्तविंशतिनक्षत्राणि चेमानि

अश्विनी । भरणी । कृत्तिका । रोहिणी । मृगशीर्षं । आर्द्रा । पुनर्वसुः । पुष्यः । आश्लेषा । मघा । पूर्वाफाल्गुनी । उत्तराफाल्गुनी । हस्तः । चित्रा । स्वाती । विशाखा । अनुराधा । ज्येष्ठा । मूलम् । पूर्वाषाढा । उत्तराषाढा । श्रवणा । धनिष्ठा । शतभिषक् । पूर्वभाद्रपदा । उत्तरभाद्रपदा । रेवती ।

५. इदानीं दिनमानमाह । द्व्यग्निनगेष्विति ।

द्व्यग्निनगेषु ७३२ उत्तरतोऽयनादितं व्यतीतं दिनं याम्यायनस्य चैष्यमवशिष्टं दिनं स्वं धनं कर्तव्यं ततो द्विघ्नं शशिरसै ६१ भक्तं यल्लब्धं तद् द्वादशभीरहितं कर्तव्यं शेषं मुहूर्तात्मकं दिवसस्य मानं भवेत् । नाडीद्वयेनैको मुहूर्तो भवति । अतो मुहूर्तात्मकं दिनं द्वाभ्यां गुणितं घट्यात्मकं दिनं भवति तत्षष्टिच्युतं रात्रिमानं स्यात् ।

अत्रोपपत्तिः । परमाल्पदिनं द्वादशमुहूर्तात्मकं प्रकल्पितं मध्यममानेन पञ्चदशमुहूर्तात्मकमतोऽनयोरन्तरं मुहूर्तत्रयं पञ्चदशमुहूर्तेषु योज्यं परमाधिकदिनमानं चाष्टादशमुहूर्तात्मकम् । परमाल्पपरमाधिकदिनमानयोरन्तरं मुहूर्तषट्कं द्वयोरयनयोरन्तरे दिनानि च १८३ ततोऽनुपातो यदि १८३ दिनैर्मुहूर्तषट्कमन्तरं लभ्यते तदोत्तरायनाद्गतदिनैर्याम्यायनस्यावशिष्टदिनैः किं जातमिष्टान्तरं $= \frac{६ \times इष्टदि}{१८३} = \frac{२ \times इष्टदि}{६१}$ इदं द्वादशयुतं जातं दिनमानं $= १२ + \frac{२ \times इष्टदि}{६१} = २४ + \frac{२ \times इष्टदि}{६१} - १२ = \frac{२४ \times ६१ + २ \times इष्टदि}{६१} - १२$

$= \frac{२}{६१}(१२ \times ६१ + इष्टदि) - १२ = \frac{२}{६१}(७३२ + इष्टदि) - १२$ अत उपपन्नं यथोक्तम् । "पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् । दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचि"रित्यत्र युगाध्यक्षस्य प्रजापतेर्ब्रह्मणो ध्यानेन ब्रह्मसिद्धान्तानन्तरं ज्योतिषवेदाङ्गस्य रचनाऽभूदित्यनुमीयतेऽन्यथा ब्रह्मणो युगाध्यक्षविशेषणं निरर्थकमिति मदीयं मतम् । तत्रापि ब्रह्मसिद्धान्तीयं दिनमानं चत्वारिंशच्छ्लोकेन प्रतिपादितं "शशिरसभक्तं दिवसमान"मित्यत्र शशिरसपाठावलोकनेन ज्योतिषवेदाङ्गे "तदेवषष्ट्या" इति लेखकप्रमाददोषेणाशुद्धः पाठः प्रतिभाति वस्तुतस्तु तदेकषष्ट्या इति ब्रह्मसिद्धान्तसमतो वासनासमलङ्कृतः पाठः समीचीन इति ।

ज्योतिषवेदाङ्गीयप्रकारश्चायम् ।

यदुत्तरस्यायनतो गतं स्याच्छेषं तथा दक्षिणतोऽयनस्य ।
तदेकषष्ट्या गुणितं विभक्तं सद्वादशं स्याद् दिवसप्रमाणम् ॥

इति पैतामहसिद्धान्तानुसारेण तिथ्यादिसाधनरूपो द्वादशाध्यायो जात इति ॥

१–२. इदानीं भूगोलवर्णनम् । पञ्चमहाभूतेत्यादि ।

अयं पञ्चमहाभूतमयो मृत्तिकावायुजलाकाशाग्निमयो महीगोलः खे आकाशे तारागणपञ्जरे भचक्रे वृतो वर्तुलाकारः स्थितः । यथाऽयस्कान्तान्तःस्थश्चुम्बकमध्यगतो लोहो लोहगोलस्तिष्ठति । अस्य भूगोलस्य सर्वः पृष्ठभागो वृक्षपर्वतनगरवाटिकानदीसमुद्रादिभिश्चितश्छादितोऽस्ति । तस्य मध्ये च देवानां स्थानरूपः सुमेरुनामा पर्वतेन्द्रो वर्तते यस्याधो दैत्याः स्थिताः सन्तीति ॥

३–५. इदानीं देवासुरस्थितिमाह । सलिलतटेत्यादि ।

नद्यादीनां जलनिकटे सङ्गतानां मानवानां यथाऽवाङ्मुखी, अधोमुखी छाया दृश्यते तथैव देवाऽभिप्रायेणासुराणां राक्षसानां गतिरर्थात् देवा असुरानधोमुखान् मन्यन्ते तेऽसुरा-अपि तान् देवानधो मन्यन्त इति । यद्वद्देवभागे मानवानां मध्ये शिखिन अग्नेः शिखा गगनमाकाशं याति यत्किञ्चिद्गुरुवस्तु गगनं क्षिप्रं तत्क्षितिं भूमिं च याति तद्वदिवेहास्मिन् भूगोलेऽधोऽसुराणां मध्येऽपि लक्ष्यतेऽतो भूमेर्न कुत्रचिदूर्ध्वं नाधश्चेति फलितम् । मेरोः पर्वतस्योपरि, आकाशे समं न कुत्रचिन्नतोन्नत एकोऽक्षो ध्रुवो दृश्यते । एवमन्यो ध्रुवश्चाधो व्योमस्थ आकाशस्थो दृश्यत इत्यर्थः । तच्च तयोर्ध्रुवयोर्निबद्धो भगणो भपञ्जरः प्रवहनाम्ना वायुना पश्चिमाभिमुखं भ्राम्यत इति ।

६–७. इदानीं भूभ्रमणखण्डनमाह । भ्रमति भ्रमस्थितेवेत्यादि ।

यथा लोहकारस्य भ्रमयन्त्रस्थितो लोहगोलो भ्रमति तथैव भ्रमयन्त्रस्थिता – इव क्षितिः पृथ्वी भ्रमति । उडूनां नक्षत्राणां गणः समुदायश्च न भ्रमतीत्यपरे आचार्या वदन्ति । अथ यद्येवमर्थात् क्षितिर्भ्रमत्येव तर्हि श्येनाद्या आकाशे दूरगामिनः पक्षिण आकाशात्पुनः स्वनिलयं स्वनीडं नोपेयुः । पृथिव्याः प्राग्भ्रमणेन तन्नीडस्य स्थानान्तरस्थत्वात् पक्षिणः प्राचीनस्थाने स्वनीडं न लप्स्यन्त इति ग्रन्थकारस्याभिप्रायः । एतेन वराहमिहिरेण भूवायुसहितायाः पृथिव्याः प्राग्भ्रमणं न बुद्धमिति ज्ञायते । अन्यच्च, अहो एकेन दिनेन यदि प्राग् भूमेर्भ्रमणं भवेत्तर्हि तेन भ्रमरंहसा भ्रमवेगेन प्रासादमन्दिरशिरःस्थितानां ध्वजादीनां पताकादीनां नित्यं पश्चात्प्रेरणं पश्चिमाभिमुखं संचलनं कथं न स्यात् । अथ यदि भूमिरल्पगा मन्दं मन्दं भ्रमति तर्हि, एकेन दिनेन कथं सर्वतो भावेन भ्रमतीत्यर्थः । ध्वजादीनां पश्चिमाभिमुखं सञ्चलनमिदमपि खण्डनं भूवायुसहितायाः भूमेः प्राग्भ्रमणेन व्यर्थमेवास्तीति ज्ञेयमिति ।

८. इदानीं जैनमतं तत्खण्डनं चाह । अर्हत्प्रोक्त इति ।

अर्हत्प्रोक्ते जिनोक्ते शास्त्रे द्वौ सूर्यौ द्वौ चन्द्रौ च वर्तेते तौ एकान्तरेणोदयं व्रजतः । अद्यैवाद्य यो रविरुदेति स पुनस्तच्च तृतीयदिने ह्युदेति । एवं द्वयोश्चन्द्रयोरप्युदय-

एकान्तरेण । अथ यद्येवं तर्हि अहा एकेन दिनेन अर्कसूत्रेण सह ध्रुवचिह्नं ध्रुवमत्स्यः कथं भ्रमति । अत्रैतदुक्तं भवति सूर्यास्तसमये सूर्याद् ध्रुवोपरि सूत्रं नेयं तदर्कसूत्रं ध्रुवमत्स्यस्य यस्मिन्नङ्गे लगति तदङ्गं यत्नतः परीक्ष्यं पुनर्द्वितीयसूर्योदये ध्रुवमत्स्यस्य तदङ्ग एव लग्नं तदर्कसूत्रं पूर्वदिशि लक्ष्यतेऽतः स एव सूर्यः परिवर्त्य प्रागुदित इति स्पष्टतया ज्ञायते ऽतो द्वौ द्वौ रवीन्दू इति न युक्तम् ।

९–११. इदानीं भचक्रव्यवस्थामाह । प्रोद्यद्रविरित्यादि ।

अमराणां देवानां प्रोद्यद्रविरुदयकालिको रविः कुवृत्तगः क्षितिजस्थो मेषादौ सव्यक्रमेण भ्रमति तदा लङ्कायामुपरिष्ठादुपरि भ्रमति राक्षसानां मध्ये च तदैव क्षितिजस्थः प्रतिलोमं विपरीतमपसव्यक्रमेण भ्रमति ॥ यदा मिथुनान्तगो रविर्भवति तदाऽमराणां कुवृत्तात् क्षितिजादंशचतुर्विंशतिं विहायोन्नतेरुपरि भ्रमति । अर्थान्मेरुवासिनामंशचतुर्विंशतिसमा रवेरुन्नतांशा उपलभ्यन्ते । तदाऽवन्त्यामुज्जयिन्यां रविः समोपरिष्ठादुपरि भ्रमति । अतो मध्याह्ने तत्र नष्टच्छाया शङ्कोश्छायाऽभाव इत्यर्थः । तत्प्रभृत्युदक्स्थानामुज्जयिनीत उत्तरदिक्स्थितानां देशानां मध्ये मध्याह्ने तदोत्तरा छाया दक्षिणदिक्स्थितानां देशानां च मध्ये दक्षिणा छाया भवतीत्यर्थः ।

अत्रोपपत्तिः । देवासुराणां क्षितिजं तु नाडीवृत्तं तदेवलङ्कायाः सममण्डलमतो नाडीवृत्तस्थो रविर्देवासुराणां क्षितिजे लङ्कायाः सममण्डले भवति । देवा असुराश्च मिथः कुदलान्तरस्था अतस्तत्र भ्रमन्तं रविं ते सव्यापसव्यं विलोकयन्ति लङ्कानिवासिनश्च सममण्डले भ्रमन्तं रविं मध्याह्ने निजोपरि विलोकयन्तीति । मिथुनान्तस्थो रविर्नाडीवृत्तादुपर्युत्तरध्रुवाभिमुखं परमक्रान्त्यन्तरे भ्रमति । अतो देवानां तदा चतुर्विंशत्यंशसमा उन्नतांशा उपलभ्यन्ते । उज्जयिन्यामाचार्यमतेन परक्रान्त्यंशसमा अक्षांशा अतस्तदा मध्याह्ने रवेः खस्वस्तिकस्थत्वाच्छायाया अभावस्तत उदग्देशानां तदा खस्वस्तिकाद्दक्षिणतो नतो रविरत उत्तरा छाया दक्षिणदेशानां मध्ये च दक्षिणा छाया भवति खस्वस्तिकाद्रवेरुत्तरनतत्वादित्युपपन्नं सर्वम् ।

१२–१३. इदानीं संहितोक्तदेवतादिनराक्षिमानखण्डनमाह । मेषवृषेत्यादि ।

यैरर्के रवौ मेषवृषमिथुनस्थिते मेरुवासिनां दिवस उक्तस्तथा रवौ कर्कटादिगे कर्कसिंहकन्यास्थिते राक्षिरुक्ता तेभ्यो मम नमोऽस्त्विति वक्रोक्तिः । यतो मेषवृषमिथुनानां यान्यहोरात्रवृत्तानि तान्येव क्रमेण कन्यासिंहकर्कटानामतो मेषात् सकाशात् येषु येषु स्थानेषूदयविर्यांति मिथुनान्तान्निवृत्तेऽपि पुनस्तेषु तेष्वेव स्थानेषु रविरायाति ततो यत्रस्थो रविः प्रथमं दृश्यो जातस्तत्रस्थ एव पुनः कथं न दृश्यः स्यादिति युक्त्या संहितोक्तं मानमसदिति ।

१४–१७. इदानीं विशेषमाह । दृश्ये चक्रस्यार्द्धे इत्यादि ।

चक्रस्य भचक्रस्यार्द्धं क्षितिजादधःस्थं यत्तदृश्यमन्यत्क्षितिजोपरिष्ठं दृश्यं तस्मिन् दृश्ये भागे खमध्यात्क्षितिजावधि ये राशयस्ते प्रसिद्धा अंशा नवतिः सन्ति । एवमुदयात्

खमध्यावधि तानि नवतिखण्डानि गणकैः परिकल्पनीयानि । तत्रैकैकश्चांशः पृथिव्यां स्थूपस्य नवमांशेनैर्नवयोजनै $९-\frac{१}{९}$ भवति । अयं योजनविधिः समदक्षिणोत्तराणामेकस्याम्योत्तरगतानां देशानामेकस्य मध्यात् खमध्यात् ख आकाशे प्रत्यक्षो भवति । एवं नवत्यंशैरष्टौ शतयोजनानि भवन्ति द्रष्टुः पुरुषस्य य उदयस्तस्मात्तत्प्रामाण्यादेशे तद्योजनप्रमाणप्रदेशे मध्याह्नो भवति । योज्जयिनी सा लङ्कायाः संनिहिता निकटस्योत्तरस्यां दिश्येकस्मिन् समसूत्रे याम्योत्तरवृत्ते वर्त्तते । तयोर्लङ्कोज्जयिन्योर्मध्याह्नो युगपदेकस्मिन् समये भवति किन्तु विषुवतोऽन्यो मेषतुलाभिन्नोद्भवो दिवसो विषमो भवति — इति ॥

अत्रोपपत्तिः । यदि चक्रांशे ३६०भूपरिधियोजनानि ३२०० तदैकेनांशेन किं जातान्येकस्मिन्नंशे योजनानि $=\frac{३२००}{३६०}=\frac{८०}{९}=९-\frac{१}{९}$ एतानि नवतिगुणितानि नवत्यंशसंबन्धीनि योजनानि = ८०० । अथ लङ्कोज्जयिन्यौ द्वे नगर्य्यावेकस्मिन् याम्योत्तरवृत्ते वर्त्ततेऽतो युगपन्मध्याह्नो भवति क्षितिजयोर्भेदाद्भिन्नमानं विषुवद्दिवसभिन्नं भिन्नं भवतीति ।

१८. इदानीं भूपरिमाणमाह । योजनशतानीति ।

षोडशद्विगुणितानि योजनशतानि द्वात्रिंशच्छतयोजनानि ३२०० भूमिपरिधेर्मानमस्ति विषुवस्थो नाडीवृत्तस्थितोऽर्को मेरुमध्यात् क्षितेः समन्तात्तद् भ्रमति । अर्थाद्भूगोले महत्परिधिर्नाडीवृत्तधरातलगतो यस्तस्य पृष्ठीयकेन्द्रं मेरुरतो नाडीवृत्तस्थो रविर्मेरुमध्यात्तावन्ति योजनानि ३२०० तस्मिन् दिने भ्रमतीति । एवमित्यस्यार्थे संबन्ध इति ।

१९. इदानीं भूमौ मेरुसंस्थानमाह । षडशीतिमिति ।

अवन्त्याः सकाशादुदग्दिशि षडशीतिं पञ्चशतीं त्रिभागहीनमेकं योजनं च $५०० + ८६ + (१ - \frac{१}{३}) = ५८६\frac{२}{३}$ गत्वा क्षितेर्भूमेर्मध्यमर्थान्मेरुस्थानमस्ति लङ्कायाः सकाशाच्चोदग्दिशि अष्टशतीं ८०० योजनसंख्यां गत्वा तदेव स्थानमुपलभ्यत इति । आचार्यमते मेरुरेव भूमध्ये ।

अत्रोपपत्तिः । मेरुस्थानान्नवत्यंशान्तरे लङ्काऽतो लङ्कातो भूपरिधिचतुर्थांशान्तरे मेरुरिति सुगमा वासना भूपरिधिमानं ३२०० अस्य चतुर्थांशः = ८०० अष्टौ शतानि योजनानि भवन्ति अथ लङ्कातश्चतुर्विंशांशान्तरेऽवन्ती तेनाऽवन्त्या मेरुः (९० — २४) = ६६ अंशान्तरेऽतोऽनुपातो यदि चक्रांशै३६०भूपरिधि ३२००र्लभ्यते तदा षट्षष्टिभागैः किं जातानि योजनानि $=\frac{३२०० \times ६६}{३६०}=\frac{८० \times ६६}{९}=\frac{८० \times २२}{३}=\frac{१७६०}{३}=५८६\frac{२}{३}$ अत उपपन्नं सर्वमिति ।

२०. इदानीं विशेषमाह । प्रतिविषयमिति ।

प्रतिविषये प्रतिदेशे हरिजात् क्षितिजाद्यावत्तुङ्गो ध्रुव उत्तरस्थो दृश्यते विषुवति विषुवद्वृत्ते खमध्यात्तावदेवांशैर्दक्षिणतो दिनकृत् सूर्योऽपि नमति ।

अत्रोपपत्तिरतिसुगमा यतः क्षितिजादुत्तरध्रुवस्य य उन्नतांशा वा खस्वस्तिकान्नाडीमण्डलस्य नतांशाः समा एवाक्षांशसमा अतो विषुद्वृत्तस्थस्यार्कस्य मध्याह्ने ये नतांशास्तेऽक्षांशैः क्षितिजादुत्तरध्रुवोन्नतभागसमैः समा इति ।

२१—२२. इदानीं दिनमाने विशेषमाह । त्रिंशतीमित्यादि ।

उज्जयिनीतस्त्रिंशप्रतियुतां त्रिंशतीमेकस्य योजनस्य त्रिभागं चोदगत्वाऽयं पर्यस्तो भगणगोलः पूर्वं सम्यक् कथितो गोलो विरमति विराममेति । अर्थात् त्रिप्रश्नाधिकारे यथा गोलोपरि कुज्याचरज्यादिस्थानं प्रदर्शितं तत्सर्वं ३०३ $\frac{१}{३}$ एतद्योजनपर्यन्तमेव गोले दृश्यतेऽये सर्वसंस्था विलक्षणा न दृष्टिगोचरेति । तस्मिन् देशे दिवसनाथः सूर्यः सकृदेकवारमुदितः सन् षष्टिघटिकापर्यन्तं दृश्यते । यदा मिथुनान्तस्थो रविस्तदा तच्च सकृदुदितः षष्टिघटिकापर्यन्तं दृश्यते ततोऽस्य उत्तरदिशि परतः परतो बहुतरमधिकमधिकं दिनं भवति इत्येवं सुमेरौ षण्मासपर्यन्तं दिनं भवति ।

अत्रोपपत्तिः । यस्य राशेरहोरात्रवृत्तं समग्रं क्षितिजादुपरि भवति तच्च भ्रमतो रवेः सततं दर्शनाद्रात्र्यभावः । क्षितिजोन्मण्डलयोरन्तराले ह्यहोरात्रवृत्तस्य यत्खण्डं स एव चरकाल इति पूर्वं त्रिप्रश्नाधिकारे प्रतिपादितोऽतोऽत्र क्षितिजाहोरात्रवृत्तयोः संयोगाभावाच्चरकालादिकं नोपलभ्यते । अथ यत्र देशे षट्षष्टिः पलांशास्तत्र कल्प्यते ख, खस्वस्तिकं, खख$_१$, सममण्डलं, विवि$_१$ नाडीमण्डलं, सस$_१$, क्षितिजं, सध्रुवसि$_१$ख$_१$वि$_१$ याम्योत्तरवृत्तम् । ध्रुस = ६६° अथ यदा मिथुनान्तस्थो रविस्तदा तत्क्रान्तिः = २४°, द्युज्याचापांशाः = ६६ । अतो ध्रु केन्द्रात् षट्षष्टिचापेन ध्रुसमितेन यत्, रसर' वृत्तं स्यात्तस्मिन् रविर्भ्रमति । अतोऽस्य वृत्तस्य क्षितिजे स चिह्नं स्पर्शकरणात्सततं रविर्दृश्योऽतो दिनं षष्टिर्निशापूर्णेमिति स्थितिस्तदये ऽन्यस्मिन् देशे चोत्तरोत्तरमुपर्येव बहून्यहोरात्रवृत्तानि क्षितिजोर्द्ध्वगान्यतस्तेषु सततं रविर्दृश्योऽतोऽधिकमधिकं दिनं मेरौ तु मेषादिषण्णां राशीनामहोरात्रवृत्तानि क्षितिजोर्द्ध्वगानि तेन षण्मासपर्यन्तं दिनमिति । अथोज्जयिनीतः षट्षष्टिपलांशनगरस्थानं कियद्दूरे वर्तत इति ज्ञानाय प्रथममंशात्मकमन्तरं ज्ञायते तच्चांशयोरन्तरमेव नगरान्तरांशमानमिति जातमंशात्मकमन्तरं = ६६° − २४° = ४२° ततोऽनुपातो यदि चक्रांशै३६०-र्भूपरिधिस्तदाक्षांशान्तरेण ४२° किं जातं योजनात्मकमन्तरम् = $\frac{३२०० \times ४२}{३६०} = \frac{८० \times ४२}{६}$

$= \frac{८० \times १४}{३} = \frac{११२०}{३} = ३७३\frac{१}{३}$ अत उपपन्नं सर्वम् ।

२३–२५· इदानीं देशविशेषेण राशीनां सदा दृश्यादृश्यत्वमाह । योजनपञ्चनवांशा-इत्यादि ।

अवन्त्याः सकाशादेकस्य योजनस्य पञ्चनवांशास्त्यधिकं चतुःशतमर्थात् ४०३ $\frac{५}{९}$ एतानि योजनानि गत्वा यदि भचक्रमवलोकयेत्तदा धनुर्मकरौ द्वौ राशी कदाचिदपि दर्शनं न व्रजतो गच्छतः । तस्मादेवोज्जयिनीस्थानात् साग्रां किंचिच्छेषसहितां द्व्यशीतियुक्तां चतुःशतीमर्थात् ४८२ एतानि योजनानि गत्वा यत्स्थानमत्र वृश्चिकमकरकुम्भधनुर्द्वयाः कदाचिदपि नोदयं यान्ति । एवमुज्जयिनीस्थानादेव षडशीतिं पञ्चशतीं चांशानं योजनं चार्थात् ५८६ – $\frac{१}{३}$ एतानि योजनानि गत्वा यत्स्थानमुपलभ्यते तत्र मेरावन्त्यं चक्रार्द्धं तुलादिषट्कं कदाचिन्नोदेति । आद्यं चक्रार्द्धं मेषादिषट्कं च कदाचिन्नास्तं यातीति ।

अत्रोपपत्तिः । यस्य राशेरुत्तरद्युज्याचापांशा यत्रांशसमास्तस्याहोरात्रवृत्तं क्षितिजे समस्थाने स्पर्शं कृत्वा समगमुपरि वर्त्तत इति प्रसिद्धं ततोऽग्रे पुनस्तदेवाहोरात्रवृत्तं यस्याऽन्यराशेस्तयोस्तदन्तर्वर्त्तिनां राशीनां च सदोदयस्तत्समदक्षिणद्युज्याचापांशानां राशीनामहोरात्रवृत्तानां क्षितिजाधःस्थितत्वात्सर्वदाऽनुदय इति स्थितिस्तत्र दक्षिणगोले धनुर्मकरयोः क्रान्तिराचार्यमतेन २०° । ३६′ द्युज्याचापांशाः = ६६° । २४′ एतत्समा यत्र पलांशास्तत्र तौ न दृश्यौ कर्किमिथुनौ च तत्र सदोदितौ तत्समोत्तरद्युज्याचापांशकारणात् । अथ यत्रै-६६° । २४′ ते पलांशास्तत्स्थानमुज्जयिनीतः कियद्दूर इति ज्ञानायाक्षान्तरं कृत्वाऽनुपातो यदि चक्रांशैः ३६० भूपरिधि३२००स्तदाऽक्षांशान्तरेणा ४५° । २४′ नेन किं जातानि योज-

नानि = $\frac{३२००\,(४५°\,।\,२४')}{३६०} = \frac{८०\,(४५\frac{२४}{६०})}{९} = \frac{८०}{९} \times ४५\frac{२}{५} = \frac{३६००+\frac{१६०}{५}}{९} = \frac{३६००+३२}{९} = \frac{३६३२}{९}$

= ४०३ $\frac{५}{९}$ इत्युपपन्नं प्रथमम् ।

एवं वृश्चिकस्य दक्षिणद्युज्याचापांशाः = ७८° । १५′ एत एवांशाः कुम्भद्युज्याचापांशाश्चातो यत्रैते पलभागास्तत्र वृश्चिककुम्भयोस्तदन्तर्वर्त्तिनोर्धनुर्मकरयोश्च दर्शनाभाव-इति स्थितिः । अक्षान्तरेण योजनज्ञानार्थं पुनस्तथैवानुपातो यदि चक्रांशैः ३६० भूपरिधिः ३२०० तदाऽक्षान्तरेणा (७८° । १५′ – २४°) = ५४° । १५′ नेन किं जातमुज्जयिनीतो योजनात्मकमन्तरं = $\frac{३२००\,(५४°\,।\,१५')}{३६०} = \frac{८०}{९}\,(५४°\,।\,१५') = \frac{८०}{३}\,(१८°\,।\,५')$

= $\frac{८०}{३} \times १८\frac{१}{१२} = \frac{८०}{३} \times \frac{२१७}{१२} = \frac{२० \times २१७}{३ \times ३} = \frac{४३४०}{९} = ४८२\frac{२}{९}$ अतः $\frac{२}{९}$ एतदर्थं साग्रामिति वदति २४ श्लोके ग्रन्थकारः । एवं मेरौ नवतिः पलांशास्तत्र मेषादिषण्णामहोरात्रवृत्तानि क्षितिजोर्द्ध्वगानि तुलादिषण्णां च क्षितिजाधःस्थान्यतः प्रथमं चक्रार्द्धं तत्र सदा दृश्यमन्य-च्चक्रार्द्धं सततमदृश्यम् । उज्जयिनीतो योजनज्ञानं पूर्वमेव १६ श्लोकटीकायामुक्तमित्युपपन्नं सर्वमिति ॥

२६· इदानीं ध्रुवस्थितिमाह । लङ्कास्था इति ।

लङ्कास्था जना भूलग्नां क्षितिजस्थां ध्रुवतारामीक्षन्ते विलोकयन्त यतस्तच पलांशाऽभावोऽतः सौम्यध्रुवतारायाः कुजे स्थितिर्मेरौ नवतिः पलांशास्तेन मेरुगता मेरुवासिन आकाशस्य मध्यस्थितां तां ध्रुवतारां विलोकयन्ति । अर्थात् मूर्द्धोपरि मेरुवासिनः सौम्यध्रुवतारां विलोकयन्ति । तयोर्लङ्कामेर्वोरन्तरे ह्युपगता जनाश्च तदन्तराले क्षितिजखमध्यान्तरे तां विलोकयन्तीति ।

२७—२८. इदानीं मेरौ विशेषमाह । सकृदुदित इत्यादि ।

मेरुपृष्ठसंस्थानां मेरुवासिनां देवानां सकृदेकवारमुदितोऽर्को मेषादिषड्राशिषु गच्छन् षण्मासपर्यन्तं दृश्यो भवति परतोऽन्यराशिषु तुलादिषड्राशिषु गच्छन् सन् स एवार्को दैत्यानां दृश्यः स्यात् । तेषां देवासुराणां नित्यं मेष एव लग्नं भूमिपुत्रस्य कुजस्य चांशो दृष्काणस्तस्यैव कुजस्य त्रिंशांशनवांशद्वादशांशाश्च भवन्ति इति ।

अत्रोपपत्तिः । देवा असुराश्च कुदलान्तरस्थिता अतो ये देवानां मेषादिषड्राशयो दृश्यास्ते दैत्यानामदृश्या ये च दैत्यानां तुलादिषड्राशयो दृश्यास्ते देवानामदृश्या अतः स्वस्वभागे चरन् तेषां रविर्दृश्यो भवति । प्राच्यां दिशि क्षितिजे क्रान्तिवृत्तस्य यः प्रदेशो लगति तस्य लग्नसंज्ञेति प्राचीनानां सम्प्रदायस्तेषां च नाडीवृत्तमेव क्षितिजं तेन क्रान्तिवृत्तनाडीवृत्तयोः सम्पातरूपो मेषादिरेव सदा क्षितिजे भवति तस्मात्तदेव लग्नम् । फलितवेदिनस्तस्य तन्मेषादिस्थितानां दृष्काणत्रिंशांशनवांशद्वादशांशानां च पतिः कुज एवेति वदन्ति षड्वर्गाणां पतयश्च बृहज्जातके वराहमिहिरेणोक्ता इति ।

२९. इदानीं लङ्कास्थितिमाह । विषुवल्लेखेति ।

विषुवल्लेखाधस्तात् विषुवद्वृत्ताधो भुवि लङ्काऽस्ति तस्यां लङ्कायां भगणगोलः समो न कुत्र चिन्नतोन्नतोऽस्ति तथा तस्यां लङ्कायां सदा त्रिंशद्घट्यात्मकं दिनमानं रात्रिमानं चेति ।


अत्रोपपत्तिः । लङ्कायामक्षांशाऽभावोऽतो भगणगोलो न कुत्र चिन्नतोन्नतः । तच क्षितिजमेवोन्मण्डलं तेन चरमानं शून्यमतो दिनरात्रिमाने समाने त्रिंशद्घट्यात्मके इत्युपपन्नं सर्वम् ।

३०—३४. इदानीं ध्रुवबेधमाह । सलिलेन समामित्यादि ।

एकं यथादिशं दिग्भिरलङ्कृतं तुङ्गमुन्नतं फलकं पीठं दृष्ट्वा नेत्रेण सलिलेन समं नतोन्नतरहितं दर्पणोदरसमं कृत्वा तथा दक्षिणकोट्यां दक्षिणदिग्भागे फलकसमानं शङ्कुं च व्यवस्थाप्य बेधं कुर्यादिति वाक्यशेषः । ऋजुशङ्कुबुध्नविन्यस्तलोचनः सरलशङ्कुतलधृतनेत्रो गणकस्तथा शङ्कुं नामयेद्यथा शङ्कुग्रं ध्रुवतारादृष्टिमध्यस्थं ध्रुवतारादृष्ट्योर्मध्ये भवति । एवं लङ्कायां पतितेन फलकोपरि समस्तलग्नेन शङ्कुना बेधो भवति सुमेरौ तूर्द्ध्वगेन

शङ्कुना । अन्तराले लङ्कासुमेर्वोर्मध्यस्थिते देशे च विनतेन शङ्कुना । तच्च तस्मिन् समये यदा शङ्कुग्रं ध्रुवतारादृष्टिमध्यस्थितं जातं तस्माच्छङ्कुग्रात् फलकच्छेदार्धसूत्रसमे फलकसमद्विभागकारि याम्योत्तरसूत्रसमं यत्सूत्रं तस्मिन् योऽवलम्बको लम्बो भवेत् स एव तच्चज्या तस्य लम्बस्य शङ्कोश्च यदन्तरं भवेदसौ याम्योत्तरदिक्प्रसिद्धुकरो विषुवदवलम्बको भवति । अर्थात् अयमत्रज्यासंबन्ध्यवलम्बको याम्योत्तररेखोपरिस्थितः स्यादिति । एवं सन्तो विद्वांसः स्वप्रत्ययेन स्वविश्वासेन सर्वं ज्ञात्वा भूमध्यं मेरुस्थानं वा सकलाया मह्या मानं वदन्ति यथाऽल्पेनापि लवणमिश्रितजलेन रसं वदन्ति । अत्रैतदुक्तं भवति यथा लवणमिश्रिताल्पजलपानात् सकलस्य लवणरसस्य स्वादु ज्ञायते तथैकदेशे वेधेन सर्वं विज्ञायैतादृशी स्थितिः सर्वत्र भवतीत्यनुमीयते ततो दक्षिणोत्तरयोर्द्वयोर्देशयोरन्तरयोजनानि पलांशान्तरं च विज्ञाय सकलमहीमानं यदि पलांशान्तरेण पुरान्तरयोजनानि लभ्यन्ते तदा चक्रांशैः किमित्यनुपातेन विज्ञायत इति ।

अत्रोपपत्तिः क्षेत्रदर्शनेनैव स्फुटा । तद्यथा कल्प्यते जलवत्समं कखगघ फलकं, पूप पूर्वापरा रेखा, दउ दक्षिणोत्तरा रेखा, दृ दृष्टिस्थानं तदेव शङ्कुमूलं च प्रथमं शङ्कुं दृष्टिस्थाने फलकोपरि लम्बरूपं धृत्वा तथा शङ्कुनामितो यथा दृशं शङ्कुवर्तुलेन दृशंध्रुरेखा ध्रुवोपरिगता स्यात् । तदा क्षितिजधरातलगते फलके ध्रुदृउकोणः पलांशास्तज्ज्या दृशंव्यासार्द्धं शंलमिता तत्कोटिज्या च याम्योत्तरवृत्तगता लम्बज्या दृलसमेति सर्वं प्रसिद्धुमेव सिद्धान्तविदां गणकानाम् । लङ्कायामक्षांशाभावोऽतः शङ्कुः सर्वतो भावेन फलके पतति मेरौ तु नवतिः पलांशा अतस्तच्च फलकोपरि लम्बरूपः शङ्कुर्भवतीति सर्वं निरवद्यम् ।




३५–३८. इदानीं चन्द्रस्य सितासिते आह । नित्यमधःस्थस्येत्यादि ।

भानोः सकाशान्नित्यमधोवर्तिनश्चन्द्रस्यार्द्धभागं सितं भवत्यन्यदर्धं च चन्द्रमूर्तिच्छाययैवासितं भवति यथाऽऽतपस्थितस्य कुम्भस्य सूर्याभिमुखो भागः शुक्लो भवति पश्चाद्भागश्च तत्कुम्भच्छाययैवाऽसितो भवतीति । जलमये चन्द्रबिम्बे रवेर्दीधितयः किरणाः पतित्वा मूर्छिता भवन्ति ततस्ते करा नैशं तमो रात्रिसंबन्ध्यन्धकारं क्षपयन्ति नाशयन्ति । यथा मन्दिरस्यान्तर्गृहमध्ये दर्पणोदरनिहिता दर्पणोपरिपतिता रविकिरणा अन्धकारं विनाशयन्ति । चन्द्रस्य प्रतिदिवसं यथा यथाऽर्कात् स्थानान्तरं भवति तेन स्थानान्तरकारणेन शौक्ल्यपरिवृद्धिर्भवति यथा घटस्य पश्चाद्भागे दिनार्धानन्तरमुत्तरोत्तरं शुक्लवृद्धिर्भवति । एवमसितात् पक्षात् कृष्णपक्षादर्धात्कृष्णपक्षानन्तरं शौक्ल्यवृद्धिः सितात्यक्षाच्चासितवृद्धि

र्थाच्छुक्लपक्षानन्तरं कृष्णावृद्धिर्भवति । शीतकरसंस्थाश्चन्द्रपृष्ठनिवासिनः पक्षयोरर्द्धमिति पक्षार्द्धं तत्पर्यन्तं रविं विलोकयन्ति यतो रविचन्द्रयुतिकालार्द्धादुभयतः पार्श्वद्वयेऽग्रे पृष्ठे च राशिचयान्न भा छाया न चन्द्रपृष्ठच्छायावशेन रवेरवरोधोऽतश्चन्द्रपृष्ठार्द्धवासिनः सततं रविं पश्यन्ति दर्शात्पृष्ठे राशिचयान्तरे कृष्णपक्षस्य दले तेषां रवेरुदयः शुक्लपक्षदलेऽस्तश्चेत्यर्थतः सिध्यतीति ।

३६–४१. इदानीं ग्रहकक्षाक्रममाह । चन्द्रादूर्ध्वमित्यादि ।

चन्द्रादूर्ध्वं बुधस्ततः शुक्रस्ततो रविस्ततः कुजस्ततो गुरुस्ततः शनिरित्येवमूर्ध्वक्रमेण ग्रहाः सन्ति सर्वेषामुपरि ततो भानि नक्षत्राणि सन्ति सर्वे प्राग्गतयो ग्रहाः स्वमण्डलगाः स्वस्वकक्षावृत्तगतास्तुल्यजवास्तुल्यगतयः सन्ति । योजनात्मिका गतिर्ग्रहाणां तुल्येति यथा तैलिकचक्रस्य यच्च तिलाः पीड्यन्ते ततैलिकयन्त्रं तस्य नाभ्यां मध्यस्थाने यदराणां कख,गघ, चज, इत्यादि रेखाणां विवरं घनं निविडं नेम्यां तु महद् भवति तथैव सर्वकक्षासु राश्यन्तराणि मेषवृषादीनामन्तराण्यूर्ध्वमूर्ध्वं महान्ति भवन्ति । यथाऽच नाभ्यामराणां विवराणि कग, गच इत्यादयल्पानि, नेम्यां च खघ, घज इत्यादयधिकानीति ।



नक्षत्रमण्डलस्याधःस्थः शशी स्वल्पं कक्षावृत्तं शीघ्रमेव पर्येति भ्रमति तथा ततुल्यगतिरर्कसुतः शनिरूर्ध्वस्थो महत्कक्षावृत्तं भ्रमतीति ॥

४२. इदानीं मासाद्यधिपानां शीघ्रं स्मरणार्थं युक्तिमाह । मासाधिप इति ।

चन्द्रादूर्ध्वक्रमेण यथा ग्रहाः सन्ति ते मासाधिपा भवन्ति यथा पूर्वं कक्षाक्रमेण चन्द्रः । बुधः । शुक्रः । सूर्यः । भौमः । बृहस्पतिः । शनैश्चरः । इति ग्रहाः । तच कल्प्यतेऽकस्मिन् मासे चन्द्रः पतिस्ततो द्वितीये मासे बुधस्तृतीये शुक्रश्चतुर्थे सूर्य इत्यूर्ध्वक्रमेण मासाधिपा भवन्ति । शनैश्चरादधः क्रमेण होरेशा भवन्ति । अर्थाद्यदि प्रथमो होरेशः शनिस्तदा द्वितीयहोरापतिर्गुरुस्तृतीयहोरापतिर्भौम इत्यधः क्रमेण होरापतयो भवन्ति । एवमेवोर्ध्वक्रमेण पञ्चमा दिनपतयो भवन्ति यदि प्रथमदिनपतिश्चन्द्रस्तदा द्वितीयदिनपतिश्चन्द्रात्पञ्चमो भौमस्तृतीयदिनपतिर्भौमात्पञ्चमो बुध इत्यूर्ध्वक्रमेण दिनपतयो भवन्ति वर्षपाश्च ग्रन्थादौ १८ श्लोके यथा प्रतिपादितास्तथैव स्पष्टाः सन्तीति ।


अत्रोपपत्तिः । वर्षाधिपश्चतुर्थो मासाधिपतिस्तृतीयोऽन्यः । होराधिपश्च षष्ठो निरन्तरं दिवसनाथश्चेति २१ श्लोकपरिभाषया गणनया पूर्वयुक्तिः स्फुटा भवति ।

इति त्रैलोक्यसंस्थानं नाम त्रयोदशोऽध्यायः ।

इदानीं यन्त्राध्यायो व्याख्यायते ।

१–४. तत्रादौ यन्त्रेण चरज्ञानमाह । साशीतिकेत्यादि ।

धरित्र्यां भुवि एकमविषमं सममशीत्यधिकशतव्यासोद्भवं वृत्तं कार्यं तत्र परिधावेकमेकमेण मेषादिद्वादशराशयः समानतश्चिन्हिताः कर्तव्याः । इदं वृत्तं पूर्वापरदक्षिणोत्तररेखाङ्कितं च बुद्धिमद्भिः कार्यम् । तथा पूर्वापरवृत्तं कृतं के केन्द्रात् । पमे१मेषक्रान्तिः । पवृ१वृषक्रान्तिः । पमि१मिथुनक्रान्तिश्च दत्ता । तदग्रतः पूर्वापररेखासमानान्तराः मेमे१, वृवृ१, मिमि१रेखाः कृतास्ता याम्योत्तरसूत्रे मे, वृ, मिविन्दुलग्ना ज्ञेयाः । तेभ्यो याम्योत्तरसमसूत्रादपक्रमांशपर्यन्तं रेखाः मेमे१, वृव१, मिमि१ । ताभिः केन्द्राद्वृत्तत्रयमंशैरङ्कं गणकः कुर्यात् । यथाऽत्र मेमे१व्यासार्द्धेन के केन्द्राल्लघुवृत्तं कृतमस्ति । एवमेवान्यद्वृत्तद्वयमप्यत्र भवति । इदं वृत्तत्रयं मेषवृषमिथुनानां द्युज्यावृत्तमिति प्रसिद्धम् । उत्तरचिन्हादुत्र, देशान्तांशान् दत्त्वा तदग्रे क्रमेण रेखा दीर्घा कार्या भगणपर्यन्ता च सा नेया । ततोऽक्षोत्तरलेखान्तरं अल स्वक्रान्त्यंशभवं ज्ञेयं यथाऽत्रक्षेत्रे मेषक्रान्त्या भवं मेकुसममायाति तदन्तरं तद्द्विगुणं मेषस्य लघुवृत्ते कुकु१समं दत्त्वा तच्चापांशदलं कुप१, तेन दिग्१० गुणिता प्रथमर्क्षस्य मेषस्य चरविनाडिकाः स्युः । एवं केवृ, वृषक्रान्तिज्यां केमि मिथुनक्रान्तिज्यां गृहीत्वा तयोश्चरविनाडिकाः साध्यास्ताश्च मिश्रिता आगच्छन्ति वृषचरान्मेषचरविशोधनेन, मिथुनचराद्वृषचरशोधनेन वृषमिथुनयोश्चरखण्डे भवतो मेषस्य चरखण्डं तु यथागतं तथैव ज्ञेयमिति ।



अत्रोपपत्तिः ।


यदि केल–स्वदेशलम्बज्यया अल–अक्षज्या कोटिस्तदा केमे–क्रान्तिज्यया किं जाताऽक्षज्यानुपातनः कुज्या कुमे–समा सैव द्युज्यावृत्ते चरज्या । अतस्तद्द्विगुणं पूर्णज्यावद् द्युज्यावृत्ते धृतं कुकु१चापं द्विगुणचरसममतस्तदर्धं चरचापांशास्ते षड्भक्ता घट्यस्ताः षष्टिगुणिता विघटिका अतस्तदर्द्धांशा दिग्गुणिता विघटिका जाता इत्युपपन्नम् ।


५–६. इदानीं छायादिज्ञानमाह । नाड्यः षड्घन्य इत्यादि ।

इष्टघट्यः षड्गुणिता भागा भवन्ति तेषामंशानां ज्या कर्तव्या (अत्र ज्यापदेनोत्क्रमज्या ग्राह्या) व्यासार्द्धात् सा ज्या शोधिता शेषं छाया स्यात् । एवं माध्यन्दिनी मध्याह्न-

पर्यन्तं छाया समेता समागता बोध्या । सा चिज्या नाड्यर्थं इष्टघट्यानयनार्थं तया छायया हीना कर्त्तव्या शेषमिष्टघटीनामुत्क्रमज्या भवतीत्यर्थतः सिध्यति । एवं दिङ्मध्यगतस्य शङ्कोश्छायायां यच्च क्षितिजमध्ये पतति तस्मात् क्षितिजपरिध्यन्तरं यत्तदेव जीवोत्क्रमज्या भवति तस्या ये चापांशास्तेषां षष्ठांशः प्राक्कपाले याता नाड्यः पश्चिमकपाले शेषनाड्यो भवन्ति—इति । या प्राचीत्यस्यायं सम्बन्धः ।

अत्रोपपत्तिः । नक्षिसस' क्षितिजे क्षिर,क्षिम—अहोरात्रवृत्ते उन्नतनाड्यः । खरन ख, खस्वस्तिकाद्व्युपरि दृङ्मण्डलम् । नर रवेरुन्नतांशाः । नाड्यः षड्गुणिताः क्षिरचापस्य भागास्तत्समा आचार्येण नर उन्नतांशाः कल्पितास्तदुत्क्रमज्या व्यासार्द्धाच्छोधिता शेषं रवेर्नतांशानां खरचापानां जीवा दृग्ज्यासंज्ञा भवति । अथ पृक्षिचिज्यया यो भगोलो विनिर्मितस्तत्र पृक्षि क्षितिजं, ख, खस्वस्तिकं पृपृष्ठस्थानाद्व्युपरिगतं सूत्रं यत्र स्वगोले लग्नं तत्र र,रविः । तदुपरि खरक्षि दृङ्मण्डलं, क्षिर रवेरुन्नतांशाः पूर्वयुक्त्या षड्गुणितनाडीसमास्तदुत्क्रमज्या = क्षिल । इयं व्यासार्द्धाच्छुद्धा शेषं पृल । अथ यदि लर, उन्नतज्यासमः शङ्कुः पृष्ठस्थाने पृयंसंज्ञः स्थाप्यते तदा रविकेन्द्रात् शङ्कुयगामि





शंवसूत्रं क्षितिजे क्षचिन्हलग्नं तेन तदा पृक्षछाया । शंक्ष सूत्रं यदि स्वल्पान्तरात् पूरसमानान्तरं कल्प्यते तदा <रपृल = <शंक्षपृ । <रलपृ = <शंपृक्ष = समको । रल = शंपृ । अतः पृल = पृक्ष, अतश्छायानयनमुपपन्नम् । एवं भगोले बेधेन र, रविचिह्नं ज्ञात्वा तस्माल्लम्बकरणेन रलक्षित्रायं तत्समं शङ्कुं पृष्ठस्थाने निवेश्य या छाया पृक्षमिता पृलसमोपलब्धा सा चिज्यायाः शोध्या शेषं क्षिलमुन्नतांशोत्क्रमज्या तच्चापांशाः रक्षिचापांशास्ते पूर्वयुक्त्या षड्गुणितनाडीसमा अतः षड्भक्ता उन्नतकालो भवतीत्युपपन्नं सर्वम् ।

८. इदानीं निरक्षोदयमाह । तिर्यग्रेखेति ।

तिर्यग्रेखा क्रान्तिवृत्ते मेषवृषमिथुनानां जीवा तज्ज्या क्रान्तिज्या दक्षिणोत्तरा तत्र या प्राची रेखा स्वद्युज्यावृत्ते तच्चापांशा दिग्भिर्गुणिताः क्रमान्मेषादिराशीनामुदयविनाडिका भवन्ति। अत्र भुजज्याक्रान्तिज्यावर्गान्तरपदसमा प्राचीरेखा ज्ञेयेति ।


अत्रोपपत्तिः । क्रान्तिवृत्ते मेषादिराशीनां ज्या कर्णाः । तत्क्रान्तिज्या भुजस्तद्वर्गान्तरपदं स्वद्युज्यावृत्ते कोटिरेवोदयज्या ततो द्युज्यावृत्ते तच्चापांशाः षड्भक्ता नाडिकाः । नाडिकाः षष्टिगुणिता विनाडिका अतस्त एवांशा दशगुणिता विनाडिका जाता इत्युपपन्नम् ।

८. इदानीं खस्वस्तिकमाह । मध्ये विन्यस्येति ।

तथा दिङ्मध्ये शङ्कुं विन्यस्य स्वतः स्वभावतः शङ्कोश्छायाऽभावेः प्राग्रे सति शङ्कोः सकाशाद्रविपर्यन्तं सूत्रं नेयं तत्सूत्रं यच स्वगोले लगति तच ये भांशास्ते विषुवान्तरभांशका उदिता: कथिता आचार्यैः । अर्थात्तदेव खस्वस्तिकस्थानम् । अनेन विधिना ह्युज्जयिन्यां यचाचार्यमतेन चतुर्विंशतिपलांशास्तचैव खस्वस्तिकज्ञानं भवति यतो मिथुनान्ते रविर्नाडीमण्डलादुत्तरतो मध्याह्ने भागचतुर्विंशत्या परक्रान्तिसमया भवति । उज्जयिन्यां तु नाडीमण्डलादुत्तरतोऽज्ञांशान्तरे खस्वस्तिकमतः खस्वस्तिकस्थे रवौ दिङ्मध्यस्थस्य शङ्कोश्छायाऽभावएवातः शङ्कोरविपर्यन्तं नीतं सूत्रं खस्वस्तिकं यातीति । विषुवद्वृत्तात्खस्वस्तिकमन्तरितमस्यतः खस्वस्तिकस्य विषुवान्तरमिति संज्ञा कृतेति ।

९–१० इदानीमज्ञांशज्ञानमाह । विन्यस्योदगिति ।

दिङ्मध्यादुदग्दिशि छायामच्छायां विन्यस्य । छायाग्रादपरतोऽर्थाच्छायामूले शङ्कुः पात्यः स्थाप्यस्ततो यः कर्णस्तत्समं तत्समानान्तरं सूत्रं मध्याद्गोले परिधिपर्यन्तं प्रसारयेत् । यचेदं सूत्रं परिधौ याम्योत्तरपरिधौ लगति तस्य विषुवान्तरस्य खस्वस्तिकस्य च यदन्तरं सोऽज्ञो भवति । एवं विलोमप्रकारेण गणकोऽज्ञाच्छायां च प्रकल्पयेदिति ।




अचोपपत्तिः । मशं शङ्कोश्छाया मछामिता । तत्कर्णश्च शंछा । मविन्दोः सकाशात्तत्समान्तरा मररेखा यच रविन्दौ याम्योत्तरपरिधौ लगति ५–६ श्लोकोपपत्तियुक्त्या तच खर चापांशा रवेर्नतांशा मध्याह्ने भवन्तीति स्थितिरस्ति । अथाज्ञांशसमे नतांशे मध्याह्ने या शङ्कोश्छायोत्पद्यते साऽज्ञभा पलभा च प्रसिद्धा तत्तुल्या यदि मछारेखा कल्प्यते तदा खरचापांशा अज्ञांशा एवेत्युपपन्नं सर्वम् । एव मज्ञाच्छायाज्ञानं विलोमकर्मणातिसुगमम् ।

१०–११ इदानीं बेधेन रविज्ञानमाह । इष्टेऽहनीत्यादि ।

इष्टेऽहनि दिने बेधेनाऽज्ञादधिको वोनो योऽपमः क्रान्तिस्तमपमं बुध्वा ज्ञात्वा तज्ज्या तिर्यग्रेखाविषुवद्रेखास्थिता कर्तव्या क्रान्तिवृत्तविषुवद्वृत्तसम्बन्धिन्योरेखयोर्मध्ये स्थाप्येत्यर्थः । ततः क्रान्तिवृत्ते यमंशं सा ज्या स्पृशति स गोलभागेनार्को ज्ञेयः । गोलभागेन गोलपदक्रमेण प्रथमपदे यथागता अंशा एव रविर्द्वितीये तेऽशा भार्द्धांशशुद्धास्तृतीये भार्द्धांशसहिताश्चतुर्थे तु चक्रा ३६० च्छोध्यास्तदा रविर्भवतीति ।


अचोपपत्तिः । मध्याह्ने बेधेन रविनतांशान् ज्ञात्वा तेषामज्ञांशानां संस्कारे ऽपमः । अर्थाद्यदि नतांशा दक्षिणास्तदा नतांशाज्ञांशान्तरमपमो यदि च नतांशा उत्तरास्तदा नतां-



शात्तांशयेागेाऽपमेा भवति—इत्येवमपमं ज्ञात्वा तत्स्थापनं क्रियते तच्च कल्प्यते संवि विषुवद्रेखा, संर क्रान्तिवृत्तरेखा < विसंर = २४° अच्च विषुवद्रेखेापरि लम्बरूपा क्रान्तिवृत्तरेखालग्ना विरक्रान्तिज्या स्थापिता ततः संविरजात्यत्रिभुजे त्रिकेाणमित्या संर = $\frac{\text{विर} \times \text{ज्या } ९०^\circ}{\text{ज्या} \angle \text{ विसंर}}$ अतेा भुजज्याज्ञानं स्वतः रविन्दुज्ञाने सति भवति तच्चापांशा रविभुजांशास्ततः पदवशाद्रविज्ञानमिति सर्वं सुगममेवेति ।

१२–१३ इदानीं बेधेन तिथ्यादिज्ञानमाह । केन्द्रार्द्धयष्ट्रीत्यादि ।

केन्द्रे स्थापितयेारर्द्धयष्ट्योस्त्रिज्यासमयष्ट्योर्बेधाद्रविचन्द्रयेारन्तरांशा य आयान्ति तदर्कांशस्तद्द्वादशांशः स्फुटा या नष्टाऽज्ञाता तिथिः सा ज्ञेया । यथा केन्द्रस्थत्रिज्यासमयष्ट्योः




केर, केच संज्ञयेार्बेधात्, र, च, रविचन्द्रयेारन्तरांशाः रच चापांशा ज्ञातास्ततस्थित्यानयनेाक्तवदेषां द्वादशांशस्तिथिः स्यात् । एवमस्मादन्तरात् पुनर्द्वितीयदिने चाऽन्या तिथिर्ज्ञेया ।

एवमेषु रविचन्द्रान्तरांशेषु छेद्यकेन यन्त्रेण पूर्वमपमबेधेन विज्ञातं भास्करं रविं दत्वा संयेाज्य छेद्यकेनैव यन्त्रेणैव तस्मिन् काले निशाकरश्चन्द्रेा भवतीति ।

अत्रेापपत्तिरतिसुगमा । यतेा रविचन्द्रयेारन्तरांशा यदि रवौ क्षिप्यन्ते तदा चन्द्रेा भवति यदि शशिनः शेाध्यन्ते तदा रविरिति ।


१४–१६ इदानीं भाभ्रमरेखाज्ञानमाह । नाभ्याः शङ्कुच्छायायमित्यादि ।

नाभ्या दिङ्मध्यान्त्रिः वारत्रयं शङ्कुच्छायायं गणकेाऽङ्कयेत्ततस्त्रिभिश्छायायबिन्दुभिर्द्वौ मत्स्यावुत्पादयेत् तन्मत्स्यमुखनिःसृतसूत्रद्वयस्य यत्र पातेा येागस्तस्माद् बिन्दुत्रयसंस्पर्शं कुर्वता सूत्रेण यदेकं मण्डलं भवेत् तदहि तस्मिन् दिने तन्मण्डलममुञ्चन्ती छाया तेन परिधिमार्गेण गच्छति । शङ्कुतः शङ्कुमूलात्तन्मण्डलमध्यपर्यन्तं सूत्रं दक्षिणेात्तरं भवति ।



तन्मण्डलस्य शङ्कुमूलस्य च यदुत्तरं विवरमन्तरं स्थितं भवेत्तत्र तस्मिन् दिने मध्याह्ने छाया स्यादिति । मण्डलेात्पादनार्थं कल्प्यते दिङ्मध्यस्थस्य शङ्केाश्छायायत्रयमेकस्मिन् दिने प्र,द्वि,तृ,संज्ञं, प्रद्वितृबिन्दुभ्यां पुप्र₁मुद्वि₁मत्स्यः, द्वितृबिन्दुभ्यां च पु₁द्वि₂मु₁तृ₁मत्स्यः । तयेाः पुच्छमुखरज्ज्वोः पुमु,पु₁मु₁रेखयेार्येागः युबिन्देा तस्माद्बिन्दुत्रयान्तरेण यत् प्रद्वितृवृत्तं क्रियते तेनैव मार्गेण तस्मिन् दिने छाया गच्छति । इति प्राचीनेाक्तिः । वस्तुत एकस्मिन् दिने यदि रवेरहेाराववृत्तं स्थिरं कल्प्यते तदा मेरेा भाभ्रमरेखारूपं वृत्ताकारं नान्यचेति ।

अत्रोपपत्तिः । यद्येतन्मण्डलं वास्तवमेव छायाभ्रमणमार्गरूपं कल्प्यते तदा वृत्तमध्यात् युसंज्ञात् शङ्कुमूलगामिनी या युमूछारेखा कृता तच रेखागणिततृतीयाध्यायसप्रमत्तत्वेन मूछा परमाल्पिका भवति गोलयुक्त्या मध्याह्नच्छाया च दक्षिणोत्तररेखारूपा परमाल्पिकाऽतो मूछारेखा मध्याह्नच्छाया युमूछा दक्षिणोत्तररेखा च भवतीति ।



१७–१८. इदानीं क्षितिजादिलक्षणमाह । हरिजमितीत्यादि ।

अवनौ पृथिव्यां यदन्तेषु प्रान्तेषु प्रसक्तमिव लग्नमिव गगनमम्बरं दृश्यते तदेव हरिजं क्षितिजमिति कथ्यते । इदं क्षितिजं पूर्वापरतः पूर्वापररेखातस्तथा दक्षिणोत्तरतश्च समं सहितं कर्तव्यम् । ध्रुवक्षितिजयोर्यदन्तरं सोऽक्षः । अक्षांशनवत्यन्तरमंक्षांशकोटिलम्बकश्च गणकैरभिहितः कथितः । खमध्यात्खस्वस्तिकात्स च लम्बो ध्रुवलग्नो नमति । अर्थाद् ध्रुवस्य ये खस्वस्तिकान्नतांशाः स एवावलम्बकः । एवं रव्युदयास्तमध्ये यः कालः स एव दिनव्यासो दिनविस्तृतिर्दिनमानमित्यर्थः ।


१९–२०. इदानीं बेधेन लग्नमिष्टकालं चाह । छेद्यवदर्द्धकपालमित्यादि ।

छेद्यवद्यन्त्रवदेकं चक्रमर्द्धकपालं कपालार्द्धसमं चिन्हे राश्युदयनाडिकादिभिर्व्यस्तैः सहितं सदिग् दिग्भिरङ्कितं सनाभ्यङ्कं केन्द्रचिन्हसहितमेकस्मिन् कीले लम्बाकारं कृत्वाऽवोन्नतमक्षांशतुल्योन्नतं कीलं कृत्वा बेधकर्त्रा सुसमावनिविन्यस्तं समावनौ स्थिरं कुर्यात् । अत्रैतदुक्तं भवति । एकं चक्रं धातुमयं दारुमयं वा कृत्वा ध्रुवयष्ट्रौ लम्बाकारं संस्थाप्य नाडीमण्डलानुकारं कर्तव्यं तच व्यस्ता मेषवृषादीनामुदयाश्चाङ्काः । तच पूर्वापरदक्षिणोत्तरसूचद्वयसम्पातरूपवृत्तमध्यस्थध्रुवयष्ट्रिच्छाया यचोदये लगति तच चक्रं परिभ्राम्योदयकालिको रविः स्थाप्यः । एवं यन्त्रस्थितिः कर्तव्या तत इष्टकाले यच तद्यष्ट्रिच्छाया लगति तचोदयकालिकच्छायाचिन्हाङ्कगनया येऽंशाः स्युस्ते भुक्तांशकाख्या रवौ देयास्तदेष्टकाल उदयो राशिरुदयलग्नं भवति । उदयेष्टकालिकच्छायाचिन्हयोर्मध्ये च यावत्यो घटिकास्ता दिनस्य याता घटिकाः स्युः ।

अत्रोपपत्तिः । अत्र यन्त्रं नाडीमण्डलमेव तचोदये यच ध्रुवयष्ट्रिच्छाया लगति तच्च चक्रं परिभ्राम्योदयकालिकरवे राश्यंशाः स्थापिता एवं कृते ह्याकाशीयवास्तवनाडीमण्डलस्य सजातीयं कल्पितनाडीवलयं जातं ततो यथायथा यावतीभिर्घटिकाभीरविरुन्नतस्तथातथा यष्ट्रिच्छाया तावतीभिर्घटिकाभिरधो याति ततस्तयोर्मध्ये दिनस्य याता घटिका भवन्त्येव तदन्तरांशाश्च रवौ क्षेप्या लग्नं स्यात् । यत उदये रविरेव लग्नं तत इष्टघटिकासम्बन्धिनोंशा रव्ययतश्चालिताः सन्तो यः प्रदेशस्तल्लग्नं परन्तु चक्रे राश्युदयाङ्कनं विलोमप्रकारेण कर्तव्यं मेषाये मीनो मीनाय कुम्भ इति क्रमेण छायाया विपरीतभ्रमणात् ।

२१–२२. इदानीं बेधेन रविमध्याह्ननतांशज्ञानमाह । समभगणाङ्केत्यादि ।


समं भगणांशैरङ्कितमेकं चक्रमर्द्धाङ्गुलविस्तृतं हस्तमायतं हस्ताङ्गुलव्यासं विधाय वस्तारमध्ये छिद्रं कर्तव्यम् । अथ यथा तन्मध्ये तिर्यक्रूपेण मध्याह्ने रविमयूखं तद्गच्छि



भवेत्तथा सूक्ष्मेण परिधिविवरेण पूर्वरचितच्छिद्रेण रविमयूखं प्रवेश्य वृत्तमध्यावलम्बितसूत्रात् मध्यसूत्रतले वृत्ताधरपाली येऽन्तरांशाः सोऽन्याक्षो मध्यनतांशाः स्युरिति । यथा तछि'छि चक्रयन्त्रस्य मध्याह्ने छि'छिछिद्रगतं रविमयूखं प्रविष्टं म,मध्यात् मल, अवलम्बसूत्रं च तले परिधौ तविन्दुलग्नं तदा तछि',चापमध्ये येऽशाः स्युस्त एव खस्वस्तिकात् खछिचापभागसमा रवेर्नतांशा भवन्तीति गोलयुक्त्या प्रसिद्धमेव ।

२३—२५· इदानीं पुनः प्रकारान्तरेणेष्टकालमाह बेधेन । समवृत्तपृष्ठमानमित्यादि ।

समं वृत्तं वर्तुलाकारं पृष्ठमेतादृशं प्रथमं सूक्ष्मं धातुमयं गोलं गोलबन्धोक्तविधिन नाडीमण्डलक्रान्तिमण्डलमण्डितं प्रसाध्य तच दक्षिणोत्तरयोः परमं स्थानं गत्वाऽर्को यत्रा स्थगितो भवति तिष्ठति तत्स्थानद्वयमुभयपार्श्वेऽङ्कयम्, एवं तत्स्थानद्वयं पूर्वक्षितिजभागे पश्चिमभागे चाङ्कितं कृत्वा रेखाद्वयं कार्यं तद्रेखाद्वयं कालभोगरेखाद्वयमित्युच्यते, एवं तद्रेखाद्वये तद्रेखाद्वयमध्ये परिधौ मीनमेषसन्ध्युभयपार्श्वे बेधादपमांशकाङ्कतुल्यानङ्कान् न्यसेत् कथं भूतानेतानङ्कान् तिर्यग्बेधप्रकाशकरान् तिर्यक्प्रकारेण यो बेधः क्रियते तं प्रकाशं कुर्वन्ति ये ते तिर्यग्बेधप्रकाशकरास्तानिति । अर्थात् प्रतिक्रान्त्यये दृज्यावृत्तानि नाडीमण्डलादुदग्दक्षिणपार्श्वे निवेशनीयानि । अथास्य गोलस्योदगदिश्यक्षांशतुल्योन्नित्यस्य ध्रुवाभिमुखधृतस्य स्वाहोरात्रवृत्ते यत्रेष्टकाले रविर्दृश्यते तत्र तात्कालिकस्तिर्यग्बेधप्रकाशकरोऽर्थादहोरात्रविन्दुर्यो यश्च तदहोरात्रविन्दुः प्राक्क्षितिजस्यस्तदन्तरस्था याता नाड्यः स्युस्ताश्च तद्विन्दुमध्ये ये चापांशास्तत्षडंशसमा भवन्ति । यथा खख$_१$ ऊर्ध्वाधरसूत्रं, विवि$_१$,नाडीमण्डलं सखख$_१$याम्योत्तरमण्डलं, सस$_१$क्षितिजं, ध्रुध्रु$_१$ ध्रुवयष्टिस्तद्वृत्तो भगोलोऽस्ति यत्र मेमे$_१$,वृवृ$_१$,मिमि$_१$मेषवृषमिथुनाहोरात्रवृत्तानि । तुतु$_१$,वृष्टृ$_१$,धध$_१$तुलावृश्चिकधनुरहोरात्रवृत्तानि सन्ति । अथ कल्प्यते मेषाहोरात्रवृत्ते, इष्टकाले र,रविचिह्नं, तदहोरात्रवृत्तं क्षितिजे च युविन्दुलग्नं तदा तदन्तरे युरमध्ये या घट्यस्ता इष्टनाड्योऽथवा युरचापांशाः षड्भक्ता इष्टनाड्यः स्युरिति सर्वं गोलयुक्तित एव सिध्यतीति ।



२६. इदानीं दिनवृद्धिह्रासकारणमाह । यदुदयतीति ।

कालचक्रे भचक्रे यत्प्रागादिकं मेषादिषट्कमुदेति, अर्थाद्यावद्रविर्मेषादिषट्कस्थित-उदेति तावद् दिनवृद्धिस्यात् । तद्व्यत्यासे तुलादिषट्के तस्य दिवसस्य हानिः स्यात् । व्याख्यातात्पूर्वानेकप्रकारकथनादत्र यच्छेषमवशिष्टं तद्बुद्धिमता स्वयमेव गम्यं ज्ञेयमित्यर्थः ।

अत्रोपपत्तिः । उत्तरगोलेऽर्थान्मेषादिषट्केऽहोरात्रवृत्तस्य क्षितिजोपरि खण्डं महद्दक्षिणगोले चाल्पं तेन तत्र भ्रमन् रविरुत्तरगोलेऽधिककालपर्यन्तं दक्षिणगोले चाल्पकालपर्यन्तं दृश्यो भवतीति ।

२७–२८. इदानीं यन्त्रस्यादिकारणानि यन्त्रयुक्तिदानपात्रादिकं चाह । गुणसलिलेत्यादि ।

गुणसलिलपांशुभिः सूचजलधूलिभिर्योजितानि मिश्रीकृतानि वस्तूनि सर्वयन्त्राणां मध्ये बीजान्यादिकारणानि भवन्ति । तैरादिकारणैः फलके पीठे कूर्ममानवयथेष्टरूपाणि कच्छपमनुष्याद्याकाराणि यन्त्राणि बुद्धिमता कार्याणि । गुरुरेतान्यादिकारणान्यचपलायाऽचञ्चलाय शिष्याय दद्यात् । शिष्योऽपि लब्ध्वा पुत्रेणाप्यज्ञातं गुप्तं बीजं यन्त्रे संयोजयेच्चमत्कारप्रदर्शनार्थमित्यर्थः ।

२९–३०. इदानीं देशान्तरज्ञानमाह । अभिमतदेशेत्यादि ।

विषुवति निरक्षदेशे यस्मिन् समये पूर्णिमा जाता तस्मिन् समयेऽभीष्टदेशाक्षांशवशात् कृतो बेधो येनासौ कृतबेधस्तेन कृतबेधेन गणकेन दृष्ट्याऽन्तरांशा रविचन्द्रयोः पूर्ववदाष्टद्वयबेधोक्तरीत्या ज्ञेयास्तेषां तत्पूर्णान्तघट्यूद्भवभार्द्धांश १८० समान्तरांशानां चान्तरांशान् तिथिवद्विभज्य कालः साध्यः । अर्थात् तदन्तरकलाः षष्टिगुणा गत्यन्तरकलाभक्ताः कालो भवति । स कालः पूर्वदेशान्तरे विषुवति निरक्षदेशसंबन्धिपूर्णान्तकाले युक्तः पश्चिमदेशान्तरे च वियुक्तस्तदाऽभीष्टदेशे इन्दुपूर्णिमाकर्म चन्द्रस्य पूर्णान्तकालो भवति । एवं विषुवति निरक्षेष्टकाले मेषादिषट्सु चरकालो योज्यस्तुलादौ च हीनस्तदाऽभीष्टदेशे स इष्टकालः स्यादेवं बुद्धिमता स्पष्टं देशान्तरं निरक्षस्वदेशयोरन्तरं ज्ञेयमिति ।

अत्रोपपत्तिः । निरक्षदेशे प्रथमं पूर्णिमा ततोऽनन्तरं पूर्वदेशेऽतस्तदन्तरकालो निरक्षकाले योज्यस्तत्पूर्वदेशे पूर्णान्तकालः स्यादेवं पश्चिमदेशे तद्वियोगेन पूर्णान्तकालो भवतीति सुगमा । उत्तरगोले मेषादिषट्सु प्रथमं स्वदेशे सूर्योदयस्ततश्चरकालेन निरक्षे सूर्योदयस्तस्मान्निरक्षेष्टकालश्चरसहितः स्वदेशीयेष्टकालो भवति दक्षिणगोले तु प्रथमं निरक्षे ततः स्वदेशे सूर्योदयस्तेन चररहितनिरक्षेष्टकालः स्वेष्टकालो भवतीति सर्वं निरवद्यम् ।

३१–३२. इदानीं घटीयन्त्रमाह । द्युनिशविनिःसृतेत्यादि ।

इष्टच्छिद्रेण स्वेच्छयाऽभीष्टमानच्छिद्रेण द्युनिशेऽहोरात्रे यावद्विनिःसृतं तोयं तस्मादाः षष्ट्यंशस्तावता जलेन सैका नाडी घटिका भवति इति स्वमतः प्रतिपादितः । वा पुंसः पुरुषस्य साशीतिशतवारं श्वासान्तर्वर्ती यः कालः सा चैका नाडी भवति । अथ यन्त्ररूपं वर्ण्यते । एकं ताम्रपात्रं कुम्भार्द्धाकारं घटदलाकारं मूले तले छिद्रं च कार्यम् । कुण्डे निर्मले जले न्यस्तं स्थाप्यम् । अत्र तथा छिद्रं कार्यं यथा तस्मिन् पात्रे पूर्णे सत्येका नाडी स्यादिति ।

मूलस्य तलस्याल्पत्वात् तथा बेधः कर्त्तव्यो यथाऽहो दिनेन रात्र्या च षष्टिस्तच्च योज्या भवेदर्थात् षष्टिवारं निमज्जनं भवेत् तदापि सा घटिका भवेत् । यत् यस्मात्कारणात् षष्टिवर्णाः वक्राः कुटिला दीर्घा अत्र एकः श्लोको भवति । अतस्तच्छ्लोकषष्ट्या वा सैका नाडी स्यात् । श्लोकषष्टिपाठे यावान् कालः सा चैका नाडी भवतीत्यर्थः ।

अत्रोपपत्तिः । अहोरात्रमध्ये षष्टिघटिका भवन्ति ततोऽनुपातो यदि घटीषष्ट्याऽहोरात्रे यावज्जलं निःसृतं तत्प्रमाणं लभ्यते तदैकया घट्या किं जातमेकघट्या निःसृतजलमानं $= \frac{\text{अहोरात्रजलमानं}}{६०}$ । अथैकश्वासानन्तरं यावता कालेन द्वितीयः श्वासो निःसरति तत्कालो द्विगुणासुमितस्तत्तत्त्रिकेणैकं पलं पलषष्ट्येका नाडी तेन सार्धीतिशतश्वासैरेका नाडी वा भवति । दशदीर्घाक्षरोच्चारणकालेनैकोऽसुस्तैः षड्भिर्वा षष्टिदीर्घाक्षरैरेकं पलं स एव श्लोकोच्चारणकालोऽतः श्लोकषष्ट्या वैका नाडीस्यादित्युपपन्नम् । अत्राऽऽचार्येण कुम्भार्द्धाकारं पात्रमित्यादिश्लोकछन्दसैव घटीवर्णनं कृतम् ।

३३. इदानीं ताराचन्द्रयोगार्थमाह । बुद्ध्वाशशिविक्षेपमिति ।

चन्द्रस्य विक्षेपं शरं बुद्ध्वा ज्ञात्वा तथा ताराचन्द्रयोरन्तरं च दृष्ट्वाऽर्थाद्वेधेन प्रथमं सर्वं निश्चित्य तत इष्टकाले गणितयुक्त्या तत्सर्वं संसाध्य पश्चाच्चन्द्रेण सह तारासमायोगो वाच्यः ।

३४--३८. इदानीं युत्यर्थं बेधेन केषां चिन्नक्षत्राणां योगतारामाह । बहुलाषष्ठांशान्त इत्यादि ।

बहुलायाः कृत्तिकायाः यः षष्ठभागस्तदन्ते भगणात् क्रान्तिवृत्तादुदक् सार्द्धं हस्तचयेऽन्तरे कृत्तिकायोगतारास्ति । रोहिण्या अष्टमभागान्ते क्रान्तिवृत्ताद्दक्षिणतोऽर्द्धषष्ठेषु हस्तेषु रोहिणीयोगतारा । पुनर्वसोरष्टमे भागेऽष्टहस्तान्तरे क्रान्तिवृत्तादुभयदिशि द्वे दक्षिणोत्तरे तारे योगताराख्ये वर्त्तते । पुष्यस्य चतुर्थभागे ऽर्द्धचतुर्थहस्तान्तरे क्रान्तिवृत्तादुदग् योगतारा । सार्पस्याश्लेषाया अंशे प्रथमभागे हस्त एकहस्तान्तरे क्रान्तिवृत्ताद्दक्षिणतो योगतारोत्तरतश्चैका योगतारा । पित्र्यस्य मघायाः स्वक्षेत्रे क्रान्तिवृत्त एव षष्ठभागे समायोगो भवति चन्द्रस्येत्यध्याहार्यमर्थात्तत्रैव योगतारा मघायाः । चित्रायाः अर्द्धाष्टमभागे संस्थिते चिभिर्हस्तैरन्तरिते क्रान्तिवृत्ताद्दक्षिणतो योगताराऽस्ति । अथ शशाङ्कस्य चन्द्रस्य मध्यात्केन्द्राद्या विक्षेपकलास्तदन्तादङ्गुलात्मकः शरः कृतः । कथमङ्गुलात्मकः शरः करणीयस्तदर्थं प्रकारं लिखति ग्रन्थकारः । विक्षेपात् शरात् सप्तदशापनीय त्यक्त्वा पञ्चदशगुणाच्छेषादः कृताग्न्यंशश्चतुस्त्रिंशदंशस्तदैवाङ्गुलमानं विद्याज्जानीयात् । तथा दिनभोगविवरेण कालं च विद्यात् । अर्थादभीष्टदिने चन्द्रतारयोरन्तरं विज्ञाय चन्द्रस्य दिनगत्या युतिकालो ज्ञेय इति ।

अत्रोपपत्तिः । उपलब्धिरेव । उपलब्ध्या योगतारायां याः शरकला उपलब्धास्तदङ्गुलानि ३८ श्लोकयुक्त्या संप्रसाध्य चतुर्विंशत्यङ्गुलैरेको हस्त इति शरो हस्तात्मकः कृतः ।


अङ्गुलसाधने तु नक्षत्राणां याः शरकला उपलब्धास्ताभ्यश्चन्द्रविम्बदलं १० विशोध्य चन्द्रविम्बपरिधिप्रान्तस्य नक्षत्रविम्बस्य चान्तरकलाः साधितास्ततोऽनुपातो यदि चतुस्त्रिंशत्कलाभिः पञ्चदशाङ्गुलानि लभ्यन्ते तदा शेषकलाभिः किमित्यनुपातेनाङ्गुलीकरणं स्फुटमुपप-

न्नमिति । युतिकालसाधनेऽपि चन्द्रः स्वगत्या प्राग्गच्छन् नक्षत्रमेति यतो नक्षत्राणां दिनात्मिका गतिर्नास्ति तत इष्टसमये चन्द्रनक्षत्रान्तरकला विज्ञाय ताभिश्चन्द्रगत्या चानुपातो यदि चन्द्रगतिकलाभिः षष्टिघटिकास्तदाऽन्तरकलाभिः किमित्यनेन कालश्च सिध्यति परन्तु शशाङ्कगतेः प्रतिक्षणं विलक्षणत्वात्पुनस्तात्कालिकं चन्द्रं कृत्वा युतिकालः साध्य एवमसकृत्कर्मणा स्फुटो युतिकालो भवतीति ।

३६–४१. इदानीमगस्त्योदयमाह । विषुवच्छायार्द्धेत्यादि ।

पञ्चकृतिः पञ्चविंशतिर्विषुवच्छायायाः पलभाया अर्द्धेन गुणिता ततश्चापं कर्त्तव्यं तच्चापं तिथि १५ युतं दशभिर्गुणितं फलं छायायाः पलभायास्त्रिसप्तक३३स्य च घातेन युतं योगे याः संख्याः स्युस्ता विनाड्यो विपलानि भवन्ति । कर्कटकाद्यान्मिथुनान्तात्ताभिर्विनाडीभिर्यल्लग्नं स्वदेशे भवति सहस्रांशौ तादृशेऽर्थात्तल्लग्नस्थे सत्यगस्त्यो मुनिर्गणितेन यानि पूर्वप्रकारेणोपलब्धानि छेद्यकयन्त्राणि तैः प्रकाशतामुदयं याति किं विशिष्टोऽगस्त्यो याम्याशावनितामुखविशेषतिलकः । याम्या याऽऽशा दिक् सैव वनिता नारी तस्या मुखस्य विशेषरूपस्तिलक इति । इदं दिव्यं कालाश्रयं कालाधीनं ज्यौतिषसंबन्धि ज्ञानं पुंसां पुरुषाणां मनांसि चेतांसि सुखयति प्रसन्नयतीत्यर्थः ।

अत्रोपपत्तिः । अशीतिभागैर्याम्यायामगस्त्यो मिथुनान्तग इति साम्प्रतसूर्यसिद्धान्तानुसारेण मिथुनान्तं ध्रुवं परिकल्प्याशीत्यंशान् ध्रुवग्रोतीयशरं च प्रकल्प्योच्यते । कल्प्यते खख१ ऊर्ध्वाधररेखा । सस१, क्षितिजम् ।



मेअ१संमि२ र१तु, नाडीमण्डलम् । मेमिलरतु, क्रान्तिवृत्तम् । ध्रुध्रु१, उन्मण्डलम् । अ, क्षितिजेऽगस्त्यबिम्बं, तद्गतं ध्रुवग्रोतं ध्रुमिअ१असंज्ञम् ।

मि,क्रान्तिवृत्ते मिथुनान्तचिह्नम् । अ$_१$मि = मिथुनान्तक्रान्तिः = २४° । अमि = अगस्त्यशरः = ८०° । अअ$_१$ = अगस्त्यस्फुटक्रान्तिः = अमि − अ$_१$मि = ८०° − २४° = ५६° । अक, अगस्त्याहोरात्रवृत्ते कुज्याचापांशाः । तत्सम्बन्धिनश्चरचापांशाः = अ$_१$सं । मिथुनान्ताहोरात्रवृत्तं तु मिमि$_१$ । गमि$_१$तत्सम्बन्धिनः कुज्याचापांशाः । तच्चरांशाः संमि$_२$मिताः । अतो यदाऽगस्त्यः क्षितिजे ह्युदयं गच्छति तदा मिथुनान्तप्रदेशस्योन्नतकालांशाः = अ$_१$मि$_२$ = चरद्वययोगांशाः । तदा प्राक्क्षितिजे क्रान्तिवृत्तस्य लसंज्ञः प्रदेशस्तस्मिन् ल,संज्ञे प्रदेशे यदा रविरागमिष्यति तदाऽगस्त्यसूर्यौ सममुदयं गच्छतोऽतो रवितेजश्छन्नोऽगस्त्यो न दृश्यो भवति । अगस्त्योदयात्सार्द्धघटीद्वयानन्तरं यदि व्युदयस्तदा तस्मिन् दिने नृदृष्ट्याऽगस्त्यो दृश्यते इति प्राचीनैः परीक्षया निश्चयः कृतोऽस्ति । अतः कल्प्यते नाडीमण्डले सार्द्धघटीद्वयचापांशा अर्थात् पञ्चदशांशाः = मि$_२$र$_१$ । र$_१$चिह्नोपरि ध्रुवर$_१$ध्रुवप्रोतं यच्च रचिह्नं क्रान्तिवृत्ते लग्नं तत्स्थो रविरगस्त्योदयानन्तरं सार्द्धघटिकाद्वयेनोदेष्यतीति । अथ तदा मिथुनान्तात् कालवृत्ते रचिह्नस्यान्तरं अ$_१$र$_१$चापांशसमम् । अंशाः षड्भक्ता घटिकाः । घटिकाः षष्ट्या गुणिताः पलानि अतोंऽशा एव दशगुणिता विनाड्यो भवन्ति । अथ मिथुनान्तं वा कर्कटकाद्यं रविं प्रकल्प्य स्वदेशोदयैः अ$_१$र$_१$इष्टघटिकासु यल्लग्नं तदेव क्रान्तिवृत्ते रचिह्नमानमागमिष्यतीति स्थितिरस्ति । अथ गणितेन चिप्रश्नाधिकारे एकाङ्गुलपलभादेशे मिथुनान्तचरपलमानमेकविंशतिरस्ति । ततोऽनुपातो यद्येकाङ्गुलपलभया चरपलमानं एकविंशतिर्लभ्यते तदेष्टपलभया किं जातं पलात्मकं चरं = २१पलभा । अथागस्त्यस्फुटक्रान्तिसंबन्धिचरानयनार्थमनुपातो यदि द्वादशकोट्या पलभाभुजो लभ्यते तदाऽगस्त्यस्फुटक्रान्तिज्यया किं जाता कुज्या $= \frac{\text{ज्या}\,(\text{अअ}_१) \times \text{पलभा}}{१२} = \frac{\text{पलभा} \times \text{ज्या}\,५६^\circ}{१२} = \frac{\text{पलभा} \times ९९}{१२}$ । पुनरनुपातो यदि क्रान्तिकोटिज्यया कुज्या लभ्यते तदा चिज्यया किं जाता चरज्या $= \frac{\text{पलभा} \times ९९ \times १२०}{१२ \times \text{कोज्या}\,(\text{अअ}_१)} = \frac{९९ \times १२० \times \text{पलभा}}{१२ \times \text{कोज्या}\,५६^\circ}$ $= \frac{९९ \times १२० \times \text{पलभा}}{१२ \times \text{ज्या}\,३४^\circ} = \frac{९९ \times १२० \times \text{पलभा}}{१२ \times ९७} = \frac{९९० \times \text{पलभा}}{९७} = \frac{२ \times ९९० \times \text{पलभा}}{९७ \times २} = \frac{१९८० \times \text{पलभा}}{९७ \times २}$ $= \frac{\frac{१९८०}{९७} \times \text{पलभा}}{२} = \frac{१९८०}{९७} \times \frac{\text{पलभा}}{२} = \frac{३० \text{ पलभा}}{२}$ एवमत्र साम्प्रतकालिकप्रसिद्धसूर्यसिद्धान्तपठिताशीतिशरांशग्रहणेन पञ्चविंशतिस्थाने त्रिंशदायाति । आचार्यसमये यः सूर्यसिद्धान्तस्तन्मतेऽल्पाः शरांशाः सन्तीत्यनुमीयते । त्रिंशत्स्थाने पञ्चविंशतिं प्रकल्प्य विलोमविधिना यदि शरांशा आनीयन्ते तर्हि ७५°। ३०′ एते स्वल्पान्तरादायान्ति । भास्कराचार्यमते तु ७७ अंशाः शरांशा अगस्त्यस्य सन्तीति । अथ या चरज्या कलात्मिका २५ × $\frac{\text{पलभा}}{२}$ इयमागता तच्चापं ज्ञातं, संअ$_१$प्रमितं ततः अ$_१$र$_१$चापांशाः = अ$_१$सं + संमि$_२$ + मि र$_१$ = चाप + $\frac{२१}{१०}$ पलभा + १५ एते चांशा दशगुणिता जाता विनाड्यः = १० (चा + $\frac{२१}{१०}$ पलभा + १५) = १० (चा + १५) + २१ पलभा । लग्नसाधनयुक्तिः पूर्वं प्रतिपादितेति सर्वं निरवद्यम् ।

उज्जयिन्यां वराहमिहरमतेऽक्षांशाः = २४° ततः खार्कचिज्यायां १२० साधिताऽक्षज्या = $\frac{१९५}{४}$, लम्बज्या = $\frac{५४७}{५}$, ततः पलभा = $\frac{१२ \times \text{अक्षज्या}}{\text{लम्बज्या}} = \frac{१२ \times १९५}{४} \times \frac{५}{५४७} = ५\frac{७}{२०}$ स्वल्पान्तरात्, ततश्चरखण्डानि, मेषस्य = १० × पलभा = ५४ विनाड्यः । वृषस्य = ८ × पलभा = ८ × ५ $\frac{७}{२०}$ = ४३ विपलाः । मिथुनस्य = $\frac{१०}{३}$ × पलभा = १८ विनाड्यः, एवमेतान्येव चरखण्डान्यत्क्रमेण कर्किसिंहकन्यानाम् । अथ मेषादिषण्णां निरक्षोदया विनाड्यश्चरोनयुताः स्वदेशोदयास्तथा

	मे.	वृ.	मि.	क.	सिं.	कन्या.
लङ्कोदया विनाड्यः =	२७८ ।	२९९ ।	३२३ ।	३२३ ।	२९९ ।	२७८
उज्जयिन्यां मेषादिचरखण्डानि =	५४ ।	४३ ।	१८ ।	१८ ।	४३ ।	५४
उज्जयिन्यां मेषादीनामुदयाः =	२२४ ।	२५६ ।	३०५ ।	३४१ ।	३४२ ।	३३२
	मी	कुं	म	ध	वृ	तु

अथोज्जयिन्यामगस्त्योदयसाधनार्थं विषुवच्छायार्द्धगुणा पञ्चकृतिरित्यस्य कर्णसाहिबप्रतिपादितार्थानुसारेण पलभा = ५ $\frac{७}{२०}$ = $\frac{१०७}{२०}$ अस्या अर्द्धं = $\frac{१०७}{४०}$ इदं पञ्चविंशत्या गुणितं जातं = $\frac{१०७ \times २५}{४०} = \frac{१०७ \times ५}{८} = \frac{५३५}{८} = ६७$ स्वल्पान्तरात्, ६७ अस्याश्चापार्थं खार्क १२० चिज्यायां दशभिर्दशभिरंशैर्यानि २१ । २० । १९ । १७ । १५ । १२ । ९ । ५ । २ एतानि खण्डानि तच्च चीणि २१, २०, १९, ६७ अस्याः शोध्यानि भवन्ति, शोधिते शेषं = ७ ततोऽनुपातो यदेष्यखण्डेना १० नेन दशांशा लभ्यन्ते तदा शेषेण ७ किं जाताः शेषसम्बन्धिनोऽंशाः = $\frac{७ \times १०}{१७} = \frac{७०}{१७}$ = ४° । ७′

ततोऽस्या ६७ श्चापांशाः = ३४° $\frac{७}{६७}$, एते छाया $\frac{१०७}{२०}$ चिसप्तक २१ घातेना $\frac{२२४७}{२०}$ नेन सहिता जाताः = ३४ $\frac{७}{६७} + \frac{२२४७}{२०}$ एते दशगुणिता जाता विनाड्यः = १० $\left(३४ \frac{७}{६७} + \frac{२२४७}{२०}\right)$ = ३४१ + ११२३ $\frac{१}{६}$ + $\frac{१}{२}$ = १४६४ $\frac{२}{३}$ आभ्यः कर्कटकाद्यादुदयानां विशोधनेन तुलापर्यन्तमुदया विशुद्धा भवन्ति शेषं = १४६४ $\frac{२}{३}$ − १३४७ = ११७ $\frac{२}{३}$ इदं चिंशद्गुणितं जातं = ३५१० + २० = ३५३० इदमशुद्धोदयेना ३४२ नेन भक्तं जाता वृश्चिकस्यांशाः = $\frac{३५३०}{३४२}$ = १० $\frac{११०}{३४२}$ अतो वृश्चिकस्यैकादशांशे रवावगस्त्योदयो महानशुद्धो बृहत्संहितोक्तात्सिध्यति कर्णसाहिबप्रतिपादितार्थानुसारेण तच्च मूलश्लोकेऽपि पाठाशुद्धिः । तत्कला,स्थाने तिथियुतमिति पाठः साधुः । अतो मदर्थो ह्युपपत्तिसिद्धः समीचीनः । तदर्थानुसारेणोज्जयिन्यामगस्त्योदयो रवौ सिंहस्य चयोविंशत्यंशस्थित एव बृहत्संहितोक्ताभिन्नः समायाति । तद्यथा पूर्वसाधिताश्चापांशाः ३४ $\frac{७}{६७}$ तिथि १५ युताः ४९ $\frac{७}{६७}$ एते दशगुणिता जाताः = ४९७ $\frac{७०}{६७}$ = ४९१ $\frac{१०}{६७}$ एते

दिनवारप्रवृत्तिर्न समाऽर्थात्सर्वदेशे दिवसारम्भोऽपि नैककालिकः । कथं नैककालिको दिवसारम्भ इत्यत्र यस्मात्कारणमपि न कथितं भवति तस्माद्दैवज्ञा गणका अत्रास्मिन् विषये विप्रवदन्ते विवादं कुर्वन्ति—इति ।

१८—२०. इदानीं दिवसारम्भे बहूनां मतान्याह । द्युगणाद्दिनवाराप्तिरित्यादि ।

हि यतो द्युगणादहर्गणाद्दिनवाराप्तिर्दिने यो वारस्तस्य प्राप्तिर्भवति द्युगणश्च देशकालसंबन्धात्सिद्धो भवति यथा लाटाचार्येण यवनपुरे सूर्यार्द्धास्तसमये सिंहाचार्येण लङ्कायां रव्युदये यवनानां मध्ये तद्गुरुणा यवनाचार्येण निशि रात्रौ दशभिर्मुहूर्तैर्गतैश्च दिनगणोऽहर्गणोऽभिहितः कथितः । आर्यभटस्त्वेकत्र लङ्कार्द्धरात्रसमये दिनप्रवृत्तिं जगाद कथितवान् भूयः पुनः स एवार्यभटोऽन्यत्र लङ्कायां सूर्योदयात् सकाशात्प्रवृत्तिमाहेति ।

२१—२३. इदानीं विशेषमाह । देशान्तरसंशुद्धिमित्यादि ।

तस्मिन् तस्मिन् देशे चेद्देशान्तरशुद्धिं कृत्वाऽपि तथा कालस्य साम्यं न घटते तदा कालशोधनार्थं तैरेवाचार्यैर्यथा शास्त्रं शास्त्रसंमतमस्ति तथाऽस्मिन् विषये कालस्य साम्यमुक्तं कीदृशं तत्साम्यमित्येतदर्थमाह मध्याह्नं भद्राश्वेष्वित्यादि । अर्को रविर्भारतवर्षे उद्यदुदितः सन् युगपदेककालावच्छिन्ने भाद्राश्ववर्षस्थजनेषु मध्याह्नं कुरुवर्षस्थजनेष्वस्तमयं केतुमालवर्षीयजनानामर्द्धरात्रं च कुरुते । एवं लङ्कायां यो रवेरुदयः सिद्धपुरे स एव सवितुः सूर्यस्यास्तमयो यमकोट्यां मध्याह्नो भवति स एव समयो रोमकविषये रोमकदेशे चार्द्धरात्रमिति । एवं गणका देशस्थितिं विज्ञायाभीष्टदेशस्याभीष्टसमयेऽहर्गणं साधयन्ति तदुत्थाः खेटाः सर्वत्र स्वस्वसमये वास्तवा एव भवन्त्यतो न काचिद्वानिर्दिवसारम्भभेद इत्याचार्यस्याभिप्राय इति ।

२४. इदानीं युगादिकालमाह । अधिमासकोनेति ।

युगस्यादावारम्भे अधिमासचयाहयहसावनदिनतिथिमेषराशिचन्द्रार्का अयनऋतुनाक्षत्रगतिराचय एते सर्वे समं युगपत्प्रवृत्ता इत्यर्थः । अर्थात् सूर्यास्तसमयेऽधिमासादयः सर्वे युगपत्प्रवृत्ता इति कुचेति न कथयत्याचार्यः परन्तु प्रायः सर्वसिद्धान्तानुसारेण लङ्कायामेव युगादिः ।

२५. इदानीं देशान्तरे विशेषमाह । अन्यद्रोमकविषयादिति ।

रोमकदेशाद्देशान्तरं यत्तदन्यत् । एवं यवनपुराच्च यद्देशान्तरं तदप्यन्यदिति ।

२५—२७. इदानीं दिनाधिपे मतान्तरमाह । लङ्कार्द्धरात्रसमयादित्यादि ।

लङ्कायामर्द्धरात्रसमयाद्वारप्रवृत्तिरित्येकं मतं तत्रैव सूर्योदयाच्च वारप्रवृत्तिरित्यन्यन्मतमस्ति । अथ यदि प्रतिदिवसं सूर्यस्यार्द्धास्तादेव वयं दिनाधिपं दिनपतिमर्थाद्वारप्रवृत्तिं ब्रूमः कथयामस्तर्हि तत्रापि आप्तवाक्यं प्रमाणवाक्यं न चास्ति तथा काचिदन्या युक्तिश्च नास्ति । दिवसपतेः सूर्यात् क्वचित् कस्मिंश्चित्स्थाने संध्या कस्मिंश्चित्स्थानेऽहो दिनं कस्मिंश्चित्तु स्थाने निशा रात्रिर्भवति । एवं स्वल्पे स्वल्पे स्थानेऽपि दिनपतित्वं व्याकुलं भवत्यसङ्गतं भवतीत्यर्थः ।

२८. इदानीं होरापतौ विशेषमाह । होरावार्तेति ।

एवमर्थादाद्या पूर्वं दिनपतिवार्त्ता प्रतिपादिता तथैव होरावार्तापि वर्त्तते यस्मादाद्या होरा दिनाधिपस्य भवति । अतस्तस्य दिनपतेरपरिनिष्ठानेऽनिश्चये कथं होराधिपतिर्भवति । अर्थाद्दिनपतेरनिश्चये होरापतेरप्यनिश्चयत्वमस्तीति ज्ञेयम् ।

२९. इदानीं सिद्धान्तमाह । अविचार्य्यैवमिति ।

एवमयं जनपदो देशः प्रायो विचारं विनैव दिनवारे परम्परातो यो वारः श्रूयते तस्मिन् वारे प्रवृत्तोऽस्ति । अर्थादद्य को वार इति परम्परात एव ज्ञायते तत्र काचिद्गणितादियुक्तिर्नास्ति यथा वारज्ञानं कर्तुं शक्यत इति । अथाऽऽचार्या इदं यद्गणितं स्फुटतिथिविच्छेदसमं स्फुटतिथ्यादिविचारेण समं तुल्यं भवेत्तदेव गणितं युक्तं समीचीनं प्राहुः । अर्थाद्येन गणितेन ग्रहा दृक्तुल्यतां यान्ति तदेव गणितं समीचीनं ज्ञेयं दिनपतिः कोऽपि भवत्वित्यत्र नाग्रह इति ।

इति ज्यौतिषोपनिषत्पञ्चदशोऽध्यायः ।

यथा वेदे परब्रह्मनिरूपणपरोपनिषदस्ति तथैवायमध्यायः केवलं ज्यौतिषतत्त्वनिरूपकस्तेनैवास्याध्यायस्योपनिषत्संज्ञेति । एवं ज्यौतिषस्योपनिषद्रूपः पञ्चदशोऽध्यायः समाप्तोऽभूदिति ।



अथ सूर्यसिद्धान्तानुसारेण भौमादीनां मध्यमाधिकारः ।

१–३. तत्र तावद्बुधशुक्रौ भौमगुरुशनींश्चाह । एष निशार्द्धेऽवन्त्यामित्यादि ।

अवन्त्यामुज्जयिन्यामर्कसिद्धान्ते निशार्द्धेऽर्द्धरात्रसमये एष वक्ष्यमाणस्तारायहाणां तारारूपा ये ग्रहा भौमाद्यास्तेषां निर्णयोऽस्ति । तत्र तस्मिन् निर्णये इन्दुपुत्रशुक्रौ बुधशुक्रौ मध्यमार्केण तुल्यगतौ अर्थाद्बुधशुक्रौ मध्यमौ मध्यार्केण समानावेव ज्ञेयौ । गणकः शताभ्यस्तं शतगुणितं द्युगणमहर्गणं द्विद्वियमाग्निद्विसागरै ४३२२३२ विभजेत् यल्लब्धं स्यात्ते जीवस्य गुरोर्भगणाः स्युः शेषात् सकाशात् क्रमेण राश्यादया अवयवाः साध्याः । एवं चन्द्रेणैकेन गुणितमहर्गणं सप्ताष्टषड्भि ६८७ भजेत् यल्लब्धं ते कुजस्य भौमस्य भगणाः स्युः शेषात्सकाशात्क्रमेण राश्यादया अवयवाः साध्याः । सहस्रगुणादहर्गणात्सकाशात् ऋतुरसशून्यर्तुषट्कमुनिखेकैः १०७६६०६६ हृतादयल्लब्धं ते सौरस्य शनेर्भगणाः स्युः शेषात्सकाशात् अत्रापि क्रमेण राश्यादया अवयवाः साध्याः । एवमत्र क्रमेण सर्वे मध्यग्रहा भवन्ति—इति ।

अत्रोपपत्तिः । आर्यभटीया गुरोर्भगणाः = ३६४२२० महायुगसावनदिनानि = १५७७६१७८०० ततोऽनुपातो यदि युगदिनैर्युगभगणा लभ्यन्ते तदाहर्गणेन किं जाता इष्टकालिका गुरोर्भगणाः = $\frac{३६४२२०}{१५७७६१७८००} \times$ अह = $\frac{१०० \text{ अह}}{४३२२३२} - \frac{१०० \text{ अह}}{४३२२३२} + \frac{३६४२२०}{१५७७६१७८००} \times$ अह

= $\frac{१०० \text{ अह}}{४३२२३२} -$ अह $\left(\frac{१००}{४३२२३२} - \frac{३६४२२}{१५७७६१७८०}\right) = \frac{१०० \text{ अह}}{४३२२३२} -$ अह $\left(\frac{१५७७६१७८०००-१५७७६१७५६०४}{४३२२३२ \times १५७७६१७८०}\right)$

= $\frac{१००\times \text{अह}}{४३२२३२} - \frac{२०६६ \times \text{अह}}{४३२२३२\times १५७७६१७८०}$ द्वितीयखण्डोत्थसंस्कारमग्ने वक्ष्यत्याचार्योऽत्र तु प्रथमखण्डोत्थफलमेव भगणात्मको गुरुरित्युपपन्नं गुरोरानयनम् ।

कुजस्यार्यभटीया भगणाः = २२६६८२४ महायुगसावनदिनानि = १५७७६१७८०० । ततोऽनुपातो यदि महायुगसावनदिनैस्तद्भगणा लभ्यन्ते तदाहर्गणेन किं जातो भगणात्मको भौमः

= $\frac{२२६६८२४ \times \text{अह}}{१५७७६१७८००} = \frac{\text{अह}}{६८७} - \frac{\text{अह}}{६८७} + \frac{२२६६८२४ \times \text{अह}}{१५७७६१७८००} = \frac{\text{अह}}{६८७} +$ अह $\left(\frac{२२६६८२४}{१५७७६१७८००} - \frac{१}{६८७}\right)$

= $\frac{\text{अह}}{६८७} +$ अह $\left(\frac{१५७७६१७८८८ - १५७७६१७८००}{६८७ \times १५७७६१७८००}\right) = \frac{\text{अह}}{६८७} + \frac{२८८ \times \text{अह}}{६८७ \times १५७७६१७८००}$ । द्वितीयखण्डोत्थसंस्कारमग्ने वक्ष्यत्याचार्योऽत्र तु प्रथमखण्डोत्थफलमेव भगणात्मको भौम इत्युपपन्नं भौमानयनम् ।

अथ शनेर्युगभगणा आर्यभटीयाः = १४६५६४ । महायुगसावनदिनानि = १५७७६१७८०० ततोऽनुपातो यदि महायुगसावनदिवसैर्युगभगणा लभ्यन्ते तदाऽहर्गणेन किं जातो भगणात्मकः

शनिः = $\frac{१४६५६४ \times \text{अह}}{१५७७६१७८००} = \frac{१०००\times \text{अह}}{१०७६६०६६} - \frac{१०००\times \text{अह}}{१०७६६०६६} + \frac{१४६५६४ \times \text{अह}}{१५७७६१७८००} = \frac{१०००\times \text{अह}}{१०७६६०६६}$

$-$ अह $\left(\frac{१०००}{१०७६६०६६} - \frac{१४६५६४}{१५७७६१७८००}\right) = \frac{१०००\times \text{अह}}{१०७६६०६६} -$ अह $\left(\frac{१५७७६१७८००००० - १५७७६१७६७२२४}{१०७६६०६६\times १५७७६१७८००}\right)$

$= \frac{१०००\times अह}{१०७६६०६६} - \frac{१०२७७६\times अह}{१०७६६०६६\times १५७७६१७८००}$ अत्रापि प्रथमखण्डोत्थफलमेव मध्यमं भगणात्मकं शनिं कथयत्याचार्यो द्वितीयखण्डोत्थसंस्कारं चाग्रे वक्ष्यतीत्युपपन्नं सर्वम् ।

४. इदानीं भौमादिमध्ये द्वितीयखण्डोत्थसंस्कारं कथयति । दशदशेति ।

प्रथमखण्डोत्थफलोद्भवो यो भगणादिको गुरुस्तस्य मध्ये भगणे भगणे प्रतिभगणे दश दश तत्पराः प्रतिविकलाः शोध्यास्तदा वास्तवः सुरगुरुर्बृहस्पतिः स्यात् । एवं प्रतिभगणे कुजस्य मध्ये मनवश्चतुर्दश तत्पराः प्रतिविकला देया योज्याः शनेर्मध्ये च बाणाः पञ्च प्रतिविकला विशोध्यास्तदा तौ कुजशनी वास्तवौ भवत इति ।

अत्रोपपत्तिः । पूर्वप्रकारेण वास्तवो गुरुः $= \frac{१०० \times अह}{४३३२३२} - \frac{२०६६ \times अह}{४३३२३२ \times १५७७६१७८०}$ । यदाहर्गणः $= \frac{४३३२३२}{१००}$ तदा प्रथमखण्डोत्थफले ह्येको भगणो लभ्यते द्वितीयखण्डोत्थफलं तु भगणात्मकं तदा $\frac{२०६६ \times ४३३२३२}{१०० \times ४३३२३२ \times १५७७६१७८०} = \frac{२०६६}{१०० \times १५७७६१७८०}$ इदमागच्छति तत्प्रतिविकलाः

$= \frac{२०६६ \times १२ \times ३० \times ६० \times ६० \times ६०}{१०० \times १५७७६१७८०} = \frac{२०६६ \times १२ \times ३ \times ६ \times ६ \times ६०}{१५७७६१७८} = \frac{२०६६ \times ४ \times ३ \times ६ \times ६ \times ६०}{५२५६७२६}$

$= \frac{२०६६ \times ४ \times ६ \times ६ \times ६०}{१७५३२४२} = \frac{२०६६ \times ४ \times ६ \times ६०}{२६२२०७} = \frac{३०१८२४०}{२६२२०७} = १०'''$ अतो गुरुसंस्कारानयनमुपपन्नम् ।

पूर्वप्रकारेण भगणात्मको वास्तवो भौमः $= \frac{अह}{६८७} + \frac{२८८ \times अह}{६८७ \times १५७७६१७८००}$ । अत्र यदाहर्गणः $= ६८७$ तदा प्रथमखण्डे ह्येको भगणो लभ्यते द्वितीयखण्डे तु $\frac{२८८ \times ६८७}{६८७ \times १५७७६१७८००}$ इदं भगणात्मकं लभ्यते तत्प्रतिविकलिकाश्च $= \frac{२८८ \times १२ \times ३० \times ६० \times ६० \times ६०}{१५७७६१७८००}$

$= \frac{२८८ \times १२ \times ३ \times ६ \times ६० \times ६०}{१५७७६१७८} = \frac{२८८ \times ४ \times ३ \times ६ \times ६० \times ६०}{५२५६७२६} = \frac{२८८ \times ४ \times ३ \times ६० \times ६०}{८७६६२१}$

$= \frac{२८८ \times ४ \times ६० \times ६०}{२६२२०७} = \frac{४१४७२००}{२६२२०७} = १४'''$ अतो भौमसंस्कारानयनमुपपन्नम् । अथैवं पूर्वप्रकारेण वास्तवः शनिर्भगणात्मकः $= \frac{१०००\times अह}{१०७६६०६६} - \frac{१०२७७६\times अह}{१०७६६०६६\times १५७७६१७८००}$ अत्रापि यदाहर्गणः $= \frac{१०७६६०६६}{१०००}$ तदा प्रथमखण्डे ह्येको भगणो द्वितीयखण्डे च भगणात्मक-

मिदं लभ्यते तत्प्रतिविकलाः $\frac{१०२७७६\times १०७६६०६६}{१०००\times १०७६६०६६\times १५७७६१७८००} = \frac{१०२७७६}{१०००\times १५७७६१७८००}$

$= \frac{१०२७७६\times १२\times ३०\times ६०\times ६०\times ६०}{१०००\times १५७७६१७८००} = \frac{१०२७७६\times १२\times ३\times ६\times ६\times ६}{१५७७६१७८०} = \frac{१०२७७६\times ४\times ३\times ६\times ६\times ६}{५२५६७२६०}$

$= \frac{१०२७७६\times ३\times ६\times ६\times ६}{१३१४६३१५} = \frac{१०२७७६\times ६\times ६\times ६}{४३८३१०५} = \frac{१०२७७६\times २\times ६\times ६}{१४६१०३५} = \frac{६३६६८७२}{१४६१०३५} = ५'''$

अत उपपन्नं शनिसंस्कारानयनम् । एतेन सर्वेण प्रायो वराहमिहिरकालिकसूर्यसिद्धान्तीया भौमादिभगणा महायुगसावनदिवसाश्चार्यभटीयभौमादिभगणसावनदिनैस्तुल्याः सन्तीत्यनुमीयत आर्यभटीयभगणादिग्रहणे प्रकाराणामुपपन्नत्वादिति ।

५-६. इदानीं भौमादीनां क्षेपानाह । राशिचतुष्टयमित्यादि ।

मध्यमस्य शनेर्मध्ये राशिचतुष्टयमंशद्वयं, अष्टाधिकविंशतिकला एकोनपञ्चाशद्विकलाश्च धनं कर्तव्यम् । गुरौ बृहस्पतौ, अष्टावंशाः षड्लिप्राः खमक्षौ, मक्षरोषे संघाते चेति धातोर्मक्षति संघातयति असौ मक्ष इति व्युत्पत्त्या मक्षशब्देन यमो गृह्यते तत्संख्याद्वयमेवं विंशतिर्विकलाश्च क्षेपः कर्तव्यो योज्य इत्यर्थः । अथवा खमक्षस्थाने खपक्षा इति पाठो योज्यः । कुजस्य क्षेपश्च, राश्यादौ यमतिथिपञ्चविंशच्च अर्थात् राशिद्वयं पञ्चदशांशाः । पञ्चविंशत्कलाश्चेति ।

अत्रोपपत्तिः । यदि महायुगसावनदिवसैर्महायुगग्रहभगणा लभ्यन्ते तदा ग्रन्थारम्भकालिकेनाहर्गणेना १५४४०३६०१०७३ नेन किं एवमनुपातेन यथोक्ताः क्षेपा ग्रहाणामुत्पद्यन्त इति ।

७. इदानीं बुधशीघ्रोच्चमाह । शतगुणित इति ।

अहर्गणे शतगुणिते स्वरनवसप्ताप्त ८७९७ भाजिते क्रमशो भगणाद्यं बुधशीघ्रं बुधशीघ्रोच्चं भवेत् । परन्त्वत्र पञ्चमस्य तत्परस्यार्द्धमत्यर्द्धपञ्चमः अर्थात् $4\frac{1}{2}$ तत्परो भगणहतः क्षेप्यस्तदा वास्तवं शीघ्रोच्चं स्यात् ।

अत्रोपपत्तिः । तत्र विलोमविधिना महायुगे बुधशीघ्रोच्चभगणज्ञानार्थं कल्प्यते भगणमानं = या । तत आचार्योक्तविधिना बुधशीघ्रोच्चं भगणाद्यं $= \frac{१०० \times अ}{८७९७} + \frac{या \times अह}{१५७७९१७८००} - \frac{१०० \times अ}{८७९७}$ = अत्र प्रथमखण्डे यदहर्गणस्थाने $\frac{८७९७}{१००}$ अस्योत्थापनं दीयते तदा ह्येको भगणो लभ्यते द्वितीयखण्डे च तदा प्रतिविकलात्मकं फलं

$= \frac{८७९७}{१००}\left(\frac{या}{१५७७९१७८००} - \frac{१००}{८७९७}\right) \times १२ \times ३० \times ६०^{२} = \left(\frac{८७९७ या}{१५७७९१७८०००० - १}\right) १२ \times ३० \times ६० \times ६० \times ६०$

$= \frac{१२ \times ३० \times ६० \times ६० \times ६० \times ८७९७}{१५७७९१७८०००० या} - ७७७६०००० = \frac{१२ \times ३ \times ६ \times ६ \times ६ \times ८७९७}{१५७७९१७८ या} - ७७७६०००० = \frac{४ \times ३ \times ६ \times ६ \times ६ \times ८७९७}{५२५९७२६ या} - ७७७६०००० = \frac{४ \times ६ \times ६ \times ६ \times ८७९७}{१७५३२४२ या} - ७७७६०००० = \frac{४ \times ६ \times ६ \times ८७९७}{२९२२०७ या} - ७७७६०००० = \frac{६}{२}$, द्वाभ्यां गुणनेन $\frac{८ \times ६ \times ६ \times ८७९७}{२९२२०७ या} - ७७७६०००० \times २ = ६$

वा $\frac{२८८ \times ८७९७}{२९२२०७ या} - १५५५२०००० = ६$

वा, $\frac{२५३३५३६}{२९२२०७ या} = १५५५२०००६$

$\therefore या = \frac{२९२२०७ \times १५५५२०००६}{२५३३५३६} = \frac{४५४४४०३५२६९८६३}{२५३३५३६} = १७९३७०००$

अनेनैव समीकरणविधानेन पूर्वं ये भौमगुरुशनीनां महायुगभगणा लिखितास्तेषां ज्ञानं कार्यम् । १७९३७०००० एते बुधशीघ्रोच्चभगणाः साम्प्रतकालिकसूर्यसिद्धान्तभगणेभ्यस्तथाऽऽर्यभटीयभगणेभ्यश्च भिन्नाः सन्ति । भगणानयनविलोमयुक्त्या भगणेभ्यः पूर्वप्रकारोपपत्तिरतिसुगमा ।

८. इदानीं शुक्रशीघ्रोच्चमाह । सितशीघ्रमिति ।

द्युगणोऽहर्गणो दशगुणिते स्वरार्णवाश्वियमै २२४७ र्भक्ते सति भगणाद्यं सितस्य शुक्रस्य शीघ्रोच्चं भवेत् परन्त्वचाद्रुकादश भगणसंगुणिता विलिप्रिका देया अर्थात् साद्रुदशगुणित-भगणसमा विलिप्रिकास्तच्च योज्यास्तदा वास्तवं शीघ्रोच्चं स्यात् ।

अत्रोपपत्तिः । पूर्वसमीकरणयुक्त्या ज्ञाताः शुक्रशीघ्रोच्चभगणाः = ७०२२३८८ एभ्यो महा-युगसावनदिवसेभ्यश्च १५७७९१७८०० अनुपातो यदि महायुगदिनैर्महायुगभगणास्तदाऽहर्गणेन किं जातं भगणाद्यं शुक्रशीघ्रोच्चं = $\frac{७०२२३८८ \times \text{अहः}}{१५७७९१७८००} = \frac{१० \times \text{अहः}}{२२४७} + \text{अहः}\left(\frac{७०२२३८८}{१५७७९१७८००} - \frac{१०}{२२४७}\right)$

$= \frac{१०\times \text{अहः}}{२२४७} + \text{अहः}\left(\frac{१५७७९३०५८३९ - १५७७९१७८०००}{२२४७ \times १५७७९१७८००}\right) = \frac{१०\times \text{अहः}}{२२४७} + \frac{१२७८३९ \times \text{अहः}}{२२४७ \times १५७७९१७८००}$ अत्रापि यद्यहर्गणः $= \frac{२२४७}{१०}$ तदा प्रथमखण्डे ह्येको भगणो द्वितीयखण्डे च विकलात्मकं फलं

$= \frac{१२\times३०\times६०\times६०\times १२७८३९\times२२४७}{१०ं \times २२४७ \times १५७७९१७८००} = \frac{१२\times३ \times ६ \times ६\times १२७८३९}{१५७७९१७८} = \frac{४ \times ३ \times ६ \times ६ \times १२७८३९}{५२५९७२९}$

$= \frac{४ \times ६ \times ६ \times १२७८३९}{१७५३२४२} = \frac{४ \times ६\times १२७८३९}{२९२२०७} = \frac{३०९८०९४}{२९२२०७} = १०'' \frac{१}{२}$ स्वल्पान्तरात्, इत्युपपन्नम् ।

९. इदानीं बुधशुक्रशीघ्रोच्चयोः क्षेपावाह । सिंहस्येति ।

सिंहस्य सिंहराशेर्वसुयमांशा अर्थात् चत्वारो राशयः अष्टाविंशत्यंशाः स्वरेन्दवः सप्तदश कलाश्च ज्ञशीघ्रधनं बुधशीघ्रे धनमिति ज्ञशीघ्रधनं कर्तव्यम् । एवं सितस्य शुक्रशीघ्रो-च्चस्य मध्ये शशिरसनवपक्षगुणदहना ३३२९६१ विकलाः शोध्या ऋणात्मिका भवन्तीत्यर्थः ।

अत्रोपपत्तिः । यदि महायुगसावनदिनैर्महायुगभगणा लभ्यन्ते तदा ग्रन्थारम्भकालिका-
रा
हर्गणेन ७१४४०३६०१०७३ किमेवमनुपातेन बुधशीघ्रोच्चस्य राश्याद्याः क्षेपः ४। २८°। १७'। ६'' समायाति तच्चार्येण षड्विकलास्त्यक्ताः स्वल्पान्तरात् ॥ शुक्रशीघ्रोच्चस्य पूर्वोक्तानुपातेन
रा
राश्यात्मकः क्षेपः = ८। २७°। ३०'। ३५''मण्डलाच्छोधनेन ऋणात्मकः क्षेपः=३। २°। २९'। २५''
= ३३२९६५'' आचार्योक्तश्च क्षेपश्चतुर्विकलाल्प इति स्वल्पान्तराद्वा पाठभेदेन जात-इत्यनुमीयते ।

१०–११. इदानीं भौमादिमध्ये बीजकर्माह । क्षेप्याः स्वरेन्दुविकला इत्यादि ।

प्रतिवर्षं मध्यमक्षितिजे मध्यमे भौमे स्वरेन्दुविकलाः सप्तदशविकलाः क्षेप्याः । गुरोः सकाशाद्गुशदश विकला विशोध्याः । शनैश्चरे साद्रुसप्तविकलाः युक्ताः । सिते शुक्रशीघ्रोच्चे पञ्चाब्धयः पञ्चचत्वारिंशद्विकला विशोध्याः । बुधे बुधशीघ्रोच्चे खाश्विचन्द्र १२० विकला युक्ताः कर्तव्याः । सुरपूजितस्य गुरोर्मध्याच्च पुनः खखवेदेन्दु १४०० विकलाः शोध्याः स्युरेवं कृते दृष्टियोग्या ग्रहा भवन्ति–इति ।

अचोपलब्धिरेव वासना नान्यत्कारणं वक्तुं शक्यतेऽतः पूर्वश्लोकानां शोधनमप्यशक्यम् । एवमेव लल्लोऽपि शिष्यधीवृद्धिदे बीजकर्म्म जगाद तथा च तद्वाक्यम् ।

शाके नखाब्धिरहिते शशिनोऽब्धिदस्रैस्तत्तुङ्गतः कृतशिवैस्तमसः षडङ्कैः ।
शैलाब्धिभिः सुरगुरोर्गुणिते सितोच्चाच्छोध्यं विपञ्चकुहतेऽभ्रशराब्धिभक्ते ॥
स्तम्बेरमाम्बुधिहते क्षितिनन्दनस्य सूर्यात्मजस्य गुणितेऽम्बरलोचनैश्च ।
व्योमाग्निवेदनिहते विदधीत लब्धं शीतांशुसूनुकुजमन्दकलासु वृद्धिम् ॥

इत्यनेनाऽऽचार्योक्ताद्विघ्नं बीजकर्म्माऽऽयाति ।

इति सूर्यसिद्धान्ते मध्यगतिः ।

सूर्यसिद्धान्तानुसारेण भौमादीनां मध्यमाधिकारो जात इति ।



॥ अथ सूर्यसिद्धान्तानुसारेण भौमादीनां स्फुटीकरणम् ॥

१–२. तत्रादौ मन्दपरिधीन् मन्दोच्चांशांश्चाह । शीघ्राख्योऽर्क इत्यादि ।

अन्येषां भौमादिग्रहाणां भौमगुरुशनीनामर्क एव रविरेव शीघ्राख्यः शीघ्रोच्चसंज्ञः । पञ्चविंशत् ३५ मनवश्चतुर्दश । अष्टयः षोडश । शराः पञ्च । षडयुतास्त्रिंशाः षड्रहितास्त्रिंशाश्चतुर्विंशतिरित्यर्थः । एतेऽङ्का द्विगुणितास्तदा भौमादीनां मन्दपरिधयः स्युः । एवं मन्द-
भौ. बु. गु. शु. श.
परिधिभागा भौमादीनां = ७० । २८ । ३२ । १० । ६० । एवं रसाः षड् भवा एकादश वसवोष्ट्रा वेदाश्चत्वारः । अर्का द्वादश । एतेऽङ्का विंशतिगुणिताः कुजस्य दशकोना दशभागैर्विरहितास्तदा भौमबुधगुरुशुक्रशनीनां मन्दगतिनामभागा मन्दोच्चांशाः स्युः । एवं भौमादीनां मन्दोच्चांशाः भौ = ६ × २० − १० = ११०° बु = ११×२० = २२०° । गु = ८ × २० = १६०° । शु = ४ × २० = ८०° । श = १२ × २० = २४०° ।

३. इदानीं भौमादीनां शीघ्रपरिधीनाह । शीघ्रपरिधाविति ।

अथ कुजादीनां कृतगुणपक्षाः २३४, द्विवन्हिशीतकराः १३२ पक्षस्वराः ७२ खषड्यमाः २६० खकृताः ४० एते शीघ्रपरिधावंशाः स्युः ।


४. इदानीं भुजकोटी आह । शीघ्रान्मध्यमहीनादिति ।

मध्यमेन ग्रहेण हीनात् शीघ्रोच्चाद्यच्छेषं तस्मिन् राशिचतये राशित्रयमध्ये यदा तदा राशित्रये यद्गतं यच्छेष्यं तयोर्ज्ये क्रमेण भुजकोटी भवतः । तत्परतो राशित्रयाधिके तस्मिन् शेषे षड्भ्यः पतिते सति शेषात्स एव विधिः कर्तव्यः । अत्र संक्षेपेणाचार्येण भुजकोटी प्रदर्शिते वस्तुत एकस्मिन् भचक्रे चत्वारि पदानि चिमिस्त्रिभिर्भैर्भवन्ति प्रथमे पदे गतो भुज एष्या कोटिः । द्वितीये एष्यांशो भुजः । गतांशः कोटिरेवं तृतीये गतो भुज एष्यः कोटिः । चतुर्थे तु एष्यो भुजः । गतांशः कोटिरिति परम्परातः प्रसिद्धोविधिस्तत आचार्येण स्फुटं नोक्तम् ।

५–६. इदानीं शीघ्रफलमाह । स्वपरिधिगुणित इत्यादि ।

ते पूर्वागते भुजकोटी अर्थाद्भुजकोटिज्ये स्वपरिधिना स्वशीघ्रपरिधिना गुणिते खर्तुगुणे ३६० भाज्ये तदा ते द्वे विपरिणते भवतोऽर्थात् शीघ्रपरिधौ भुजफलकोटिफले भवतः । अथ तत्र कोटिफलं व्यासार्द्धे चिज्यायां १२० मृगकर्क्यादौ केन्द्रे चयापचयं कर्तव्यमर्थान्मकरादिकेन्द्रे कोटिफलं चिज्यायां योज्यं कर्क्यादौ तु विशोध्यमेवं कृते यदवशिष्टं तत्स्फुटकोटिसंज्ञं ज्ञेयम् । खसूर्यघ्नं चिज्या १२० गुणितं भुजफलं तद्भुजकृतियोगपदैः स्फुटकोटिभुजफलवर्गयोगमूलेन विभजेत् फलस्य यच्चापं तस्यार्द्धं शीघ्रकेन्द्रवशात् मन्दे मन्दोच्चे हानिधनं कर्तव्यमर्थात् मेषादिकेन्द्रे तदर्द्धं मन्दोच्चाच्छोध्यं तुलादौ तु योज्यं तदा स्पष्टं मन्दोच्चं स्यात् ।

अत्रोपपत्तिः । त्रिज्याव्यासार्द्धं ये भुजकोटिज्ये ते शीघ्रान्त्यफलज्याव्यासार्द्धं परिणते शीघ्रपरिधौ शीघ्रकेन्द्रभुजकोटिज्ये भवतस्तयोः क्रमेण भुजफलकोटिफलसंज्ञा कृता ।



अथ कल्प्यते भू, भूकेन्द्रम् । स्फुटस्फुटं कक्षावृत्तम् । म, मध्यमग्रहस्थानम् । म, केन्द्रेण शीघ्रपरिधिः यउयसंज्ञः । उ, उच्चस्थानं तस्मादयतः पृष्ठतश्च त्रिभेऽन्तरे मकरादिकेन्द्रं तदन्यत्कर्क्यादिकेन्द्रं भवति । य, मकरादिकेन्द्रे ग्रहस्थानम् । य, कर्क्यादिकेन्द्रे ग्रहस्थानम् । यल, भुजफलम् । लम, कोटिफलम् । भूम, त्रिज्या, मकरादिकेन्द्रे त्रिज्याकोटिफलयोर्योगमिता भूल, स्पष्टा कोटिः कर्क्यादौ त्वन्तरेण भूल स्पष्टा कोटिः । तद्भुजफलवर्गयोगपदं भूयमितो वा भूय समः कर्णः स्यात्ततोऽनुपातो यदि कर्णाग्रे भुजफलं लभ्यते तदा भूस्फु, त्रिज्यया किं जाता मस्फुचापस्य शीघ्रफलस्य ज्या तच्चापार्द्धं मेषादिकेन्द्रे मध्यमग्रहे धनं तुलादिकेन्द्रे च ऋणं साम्प्रतकालिकसूर्यसिद्धान्तानुसारेण क्रियते ततोऽस्मान्मन्दोच्चं मन्दकेन्द्रार्थं विशोध्यते, एवं शीघ्रफलार्द्धसंस्कृतमध्यमग्रहो द्वयोः केन्द्रयोः $=$ मय $\pm \frac{\text{शीफ}}{२}$ । मन्दकेन्द्रं च $= \left(\text{मय} \pm \frac{\text{शीफ}}{२}\right) - \text{मउ} = \text{मय} \pm \frac{\text{शीफ}}{२} - \text{मउ}$

$= \text{मय} - \left(\text{मउ} \mp \frac{\text{शीफ}}{२}\right)$ अत उपपन्नं सर्वम् ।

७–८. इदानीं मन्दफलमाह । स्फुटयित्वैवमित्यादि ।

एवं पूर्वोक्तप्रकारेण मन्दं मन्दोच्चं स्फुटयित्वा स्फुटं कृत्वा तस्य स्फुटमन्दोच्चस्य मध्यान्मध्यग्रहाद्विशोधितस्य यो बाहुस्तं मन्दपरिधौ परिणाम्यार्थाद्भुजज्या मन्दपरिधिगुणा चक्रांशैः ३६० भक्ता ततो यच्चापं तदर्द्धं मन्देन मन्दोच्चेन सह मन्दकेन्द्रवशादुक्तमन्तरं च कर्त्तव्यम् । अर्थान्मेषादिकेन्द्रे धनं तुलादिकेन्द्रेऽन्तरं कार्यमेवं पुनः स्फुटमन्दोच्चं स्यादिदं पुनर्मध्यग्रहाद्विशोध्य ततस्तस्माद्बाहुं संसाध्य पूर्ववत् मन्दपरिधौ परिणाम्यास्य चापं कार्यं तच्चापं मन्दकेन्द्रवशान्मध्यमे मध्यमग्रहे चयधनं कर्त्तव्यं मेषादिकेन्द्रे ऋणं तुलादिकेन्द्रे धनमित्यर्थः ।

अत्रोपपत्तिः । मध्यान्मन्दोच्चस्य विशोधनेन मन्दकेन्द्रं तज्ज्या मन्दपरिधिपरिणता मन्दभुजफलं मन्दकर्म्मणि कर्णानुपाताभावात् मन्दभुजफलस्य चापमेव मन्दफलं जातं (मृदुदोःफलस्य चापं बुधा मन्दफलं वदन्ति इति भास्कराचार्येणाप्युक्तम्) तदर्द्धं मध्यमग्रहे संस्कार्यम् । अत्र शीघ्रकेन्द्राद्विपरीतं मन्दकेन्द्रं यतस्तच्च शीघ्राग्रहे शोधिते शीघ्रकेन्द्रमत्र तु मन्दोच्चमेव मध्यग्रहाच्छोधितं तेन तुलादिकेन्द्रे मन्दफलं धनं मेषादौ च ऋणमित्यनेन विधानेन जातो मन्दफलार्द्धसंस्कृतो मध्यमग्रहः $=$ मय $\mp \frac{\text{मंफ}}{२}$ अस्मात्पुनर्मन्दोच्चवि-

शोधनेन मन्दकेन्द्रं = मग ∓ $\frac{\text{मंफ}}{२}$ − मउ = मग − $\left(\text{मउ} \pm \frac{\text{मंफ}}{२}\right)$ पुनरस्मात्केन्द्रान्मन्दफलं संसाध्य तत्संस्कृतो मध्यमग्रहो मन्दस्फुटो भवतीति प्राचीनानां विधिः ।

९. इदानीं स्फुटग्रहसाधनमाह । एवं स्फुटमध्याख्यानिति ।

एवं पूर्वविधिना ये स्फुटमध्याख्या मन्दस्पष्टा ग्रहाः सिद्धास्तान् शीघ्रोच्चाद्विशोध्य पूर्वविधिनैव शीघ्रकर्णादीन् संसाध्याऽऽदिवत्प्रथमवद्यच्चापं लब्धं तत्स्फुटमध्याख्ये मन्दस्फुटे चयापचयं कर्तव्यं मेषादौ केन्द्रे धनं तुलादौ च ऋणमित्यर्थः । एवं सर्वे ग्रहाः स्फुटाः स्युरित्यत्र सम्बन्धः ।

अत्रोपपत्तिः । मन्दस्पष्टाच्छीघ्रफलमानीय मन्दस्पष्टे तत्फलं संस्कार्यं स्वकक्षावृत्ते ग्रहा भवन्तीति सर्वं छेद्यकविधिना स्फुटमिति ।

१०–११ इदानीं बुधशुक्रयोः संस्कारविशेषमाह । सर्वे स्फुटाः स्युरित्यादि ।

ज्ञस्य बुधस्य शीघ्रात् शीघ्रोच्चाद्रविमन्दोच्चं विहाय शेषस्य भुजज्या रविपरिधिनता रविमन्दपरिधिपरिणताऽर्थात् भुजज्या रविमन्दपरिधिहता चक्रांशैर्भक्ता ततश्चापं बुधफलवद्बुधे चयं धनं च कुर्यात् । यदि रविमन्दोच्चरहितेन शीघ्रोच्चेन यन्नूतनं केन्द्रं सिद्धं तन्मेषादौ तदा धनं तुलादौ तु ऋणमेवं कृते स्फुटो बुधो भवति । अथ पूर्वफलद्वयसंस्कारेण स्फुटीकृतस्य शुक्रस्य मध्ये सप्तषष्ट्रिलिप्राः शोध्यास्तदा वास्तवः स्फुटः शुक्रो भवति । एवं भुक्तिविशेषेण वक्रानुवक्रकालो ज्ञेयोऽर्थाद्यदा ऋणात्मिका गतिस्तदा वक्रः । यदा चोत्तरोत्तरमृणात्मिका गतिस्तदाऽनुवक्रो ज्ञेय इति ।

अत्रोपपत्तिरुपलब्धिरेव नान्यत्कारणं वक्तुं शक्यते ।

१२. इदानीं कालांशानाह । स्फुटदिनकरेति ।

विंशतिर्वसु ८ शशि १ शिखि ३ मुनि ७ नवके ९ न्द्रियैः ५ रहिता कार्या तदा क्रमशश्चन्द्रादीनां ग्रहाणां दर्शने स्फुटदिनकरान्तरांशाः स्फुटग्रहदिनकरयोरन्तरांशाः सन्ति । अर्थाद्यदा रविचन्द्रयोरन्तरांशा द्वादश तदा चन्द्रो दृश्यो भवति यदा रविकुजयोरन्तरांशा एकोनविंशतिस्तदा रात्रौ कुजो दृश्यो भवतीति चन्द्रादीनामन्तरांशाः

$$= \begin{cases} २० \mid २० \mid २० \mid २० \mid २० \mid २० \\ \hline ८ \mid १ \mid ३ \mid ७ \mid ९ \mid ५ \\ \hline १२ \mid १९ \mid १७ \mid १३ \mid ११ \mid १५ \end{cases}$$

अत्रोपपत्तिः । यदा रविग्रहयोः समागमो भवति तदा रविप्रभाहतं ग्रहबिम्बं कियन्ति दिनानि रात्रौ दृष्ट्वा न दृश्यं भवति । एवं रवेर्दूरस्थितत्वाद्यस्मिन् दिने तद्बिम्बदर्शनं भवति तस्मिन् दिने रविग्रहान्तरं वेधेन निश्चीयत एवं चन्द्रादीनां पाठपठिता अन्तरांशा उपलब्धा यद्यपि बिम्बानां स्थूलसूक्ष्मत्वान्निकटदूरगतत्वाच्चैतेऽन्तरांशा न स्थिरास्तथापि सुखार्थमाचार्येण पठिता इति ।

१३–१४. इदानीं भौमादीनां शरानयनमाह । मन्दग्रहान्तरज्येत्यादि ।

मन्दग्रहान्तरज्या विपातमन्दस्पष्टग्रहान्तरज्या स्वाष्टमभागेन संयुता तदा ग्रहोनात् विपातमन्दस्पष्टग्रहान्तरवशात्कुजगुरुशनीनां सौम्यान्ययोरुत्तरदक्षिणयोर्दिशोर्विक्षेपो भवेत् । शीघ्रविधावन्यश्च विक्षेपो भवति । अर्थात् बुधशुक्रयोः स्थाने तदीयशीघ्रोच्चं गृहीत्वा पातशीघ्रोच्चान्तरे स पूर्वोक्तो विधिः कर्तव्यस्ततस्तस्मिन् विधावन्यो विक्षेपश्चोत्पद्यते, पातशीघ्रोच्चान्तरज्या स्वाष्टांशयुता बुधशुक्रयोर्विक्षेपः शरो भवतीत्यर्थः । एवं या स्वाष्टांशयुता पूर्वं ज्या सिद्धा तच्च गुरुभूतनयास्फुजितां गुरुकुजशुक्राणां पादोना चतुर्थांशोना कार्या त्रयमयोर्बुधशन्योश्च यथार्थमेव सा साष्टांशा ज्या स्थाप्या एवं कृते या संख्या भवेत् सा चिज्यया गुण्या कर्णेन भक्ता तदा भौमादीनां वियोगजाशः पातग्रहान्तरदिक्को विक्षेपो भवेदिति ।

अत्रोपपत्तिः । आचार्येण भौमादीनां मध्यमशरकलाः परमाः क्रमेण १०१′। १३५′ । १०१′। १०१′ । १३५′ एताः कल्पितास्ततोऽनुपातो यदि चिज्यया विपातमन्दग्रहज्यया परमशरकला लभ्यन्ते तदेष्टविपातग्रहान्तरज्यया किं जाता भौमादीनां क्रमेण शरकला मध्यमास्ततः कर्णाये यदि मध्यमाः शरकलास्तदा चिज्यया किं जाता भगोले स्फुटशरकलाः ।

$$\text{भौमस्य} = \frac{१०१ \times \text{विज्या}}{१२०} = \frac{(१३५ - ३४)\ \text{विज्या}}{१२०} = \frac{१३५\ \text{विज्या}}{१२०} - \frac{३४\ \text{विज्या}}{१२०} = \frac{९\ \text{विज्या}}{८} - \frac{९\ \text{विज्या}}{८ \times ४}$$

$$\text{बुधस्य} = \frac{१३५\ \text{विज्या}}{१२०} = \frac{९\ \text{विज्या}}{८}$$

$$\text{गुरोः} = \frac{१०१\ \text{विज्या}}{१२०} = \frac{९\ \text{विज्या}}{८} - \frac{९\ \text{विज्या}}{८ \times ४}$$

$$\text{शुक्रस्य} = \frac{१०१\ \text{विज्या}}{१२०} = \frac{९\ \text{विज्या}}{८} - \frac{९\ \text{विज्या}}{८ \times ४}$$

$$\text{शनेः} = \frac{१३५\ \text{विज्या}}{१२०} = \frac{९\ \text{विज्या}}{८}$$

एतेन क्रमेण सर्वेषां शरानयनमुपपन्नं भवति, कर्णानुपातोपपत्तिरतिसरला । विपातमन्दस्पष्टग्रहस्योत्तरगोले क्रान्तिमण्डलाद्विमण्डलमुत्तरदिक्कमतोऽत्तरविक्षेपो भवति दक्षिणे त्वस्माद्विपरीत इति सर्वं निरवद्यम् ।

इति तारायहस्फुटीकरणं नाम षोडशोऽध्यायः ।

तारारूपा ये भौमाद्यायहास्तेषां स्फुटीकरणरूपः षोडशोऽध्यायो जात इति ।

इदानीमुदयास्ताधिकारमाह ।

१.—२. तत्रादौ वसिष्ठमतेन शुक्रचारमाह । हित्वा मुनिजलेत्यादि ।

द्युगणादहर्गणात् मुनिजलचन्द्रान् १४७ हित्वा त्यक्त्वा ततो वेदाष्टभूतै ५८४ र्भक्ते ये लब्धास्ते उदयसंज्ञा ज्ञेया शेषदिनादीनि पृथक् स्थाप्यानि । अथ प्रतिशुक्रोदये शुक्रस्य गुणांशैः सहिता अलिनो वृश्चिकस्य पञ्चभागाः प्रमाणं भवति । अर्थात् सप्तराशयः, पञ्चांशाः विंशतिकला इति । शुक्र उदयानन्तरं कालांशैः षड्विंशतिं षड्विंशतिदिनानि गत्वा ततः परेणोदयं याति पश्चिमोदयं याति । अर्थादुदयसंज्ञानन्तरं षड्विंशतिदिनैः शुक्रस्य पश्चिमोदयो भवति । अथ पूर्वं ये लब्धा उदयास्तेषां य एकादशभागस्तं दिनेषु पूर्वस्थापितशेषदिनेषु दत्त्वा प्रक्षिप्य ततश्च शुक्रस्य चारा गतयो वक्ष्यमाणप्रकारेण ज्ञेया इत्यर्थः ।

अत्रोपपत्तिः । आर्यभटानुसारेण कल्पे शुक्रभगणाः ४३२०००० शुक्रशीघ्रोच्चभगणाः ७०२२३८८ । एतदन्तरसमाः शीघ्रकेन्द्रभगणाः २७०२३८८ ततोऽनुपातो यदि एतैः केन्द्रभगणैः कल्पकुदिनानि १५७७९१७८०० लभ्यन्ते तदैककेन्द्रभगणेन किं जात एककेन्द्रभगणकालः $= \frac{१५७७९१७८००}{२७०२३८८} = ५८४ - \frac{१}{६}$ * स्वल्पान्तरात् । अत्र वसिष्ठेना $५८४ - \frac{१}{११}$ यं गृहीतः । ततोऽहर्गणोऽनेन $५८४ - \frac{१}{११}$ । यदि विभज्यते तदा केन्द्रभगणा लभ्यन्ते शेषं दिनानि । अथ भागहारार्थं प्रथमं कल्प्यते अहर्गणोऽ ५८४ नेन भक्ते लब्धा उदयास्तदा वास्तवं शेषमानम् $=$ अह $-$ उद $(५८४ - \frac{१}{११}) =$ अहर्ग $-$ ५८४ उद $+ \frac{उद}{११} =$ शेदि $+ \frac{उद}{११}$ । अत्र अह $-$ ५८४ उद $=$ शेषदिनानि । अतः पूर्वशेषदिनेषु यदि उदयैकादशभागः प्रक्षिप्यते तदा वास्तवशेषमानं स्यात् । अथ यदा शीघ्रोच्चसमः शुक्रस्तदैव शीघ्रकेन्द्रभगणपूर्तिस्ततः षड्विंशतिदिनैः शुक्रस्योदयः पश्चिमायां भवति — इति परीक्षया दृष्ट्या चाचार्येण वुद्ध्मित्युपलब्धिरेव वासना । अथैककेन्द्रभगणपूर्तिकालेः ५८४ $-\frac{१}{११}$ स्मिन् शुक्रस्य मानज्ञानार्थमनुपातो यदि एक सौरवर्षसावनदिनैः ३६५ $\frac{१}{४}$ द्वादश राशयो लभ्यन्ते तदै ५८४ $-\frac{१}{११}$ तैर्दिनैः किं जातमेकोदये शुक्रराश्यादिमानम् $= ७^{रा}$ । ५° । २८′ इत्युपपन्नं सर्वम् ।

अत्र जलशब्देनास्माभिर्वेद ४ मिता संख्या गृहीताऽनुमानात् । साम्प्रतकालिकोपलब्धज्योतिषसिद्धान्तग्रन्थेषु जलशब्देन न कापि प्रकाशिता संख्याऽस्ति । ज्योतिषफलग्रन्थेषु च जलशब्देन द्वादशभावस्थानानां मध्ये चतुर्थस्थानं गृह्यते ।

३.—५. इदानीं चारानाह । षष्टिचयेणेत्यादि ।

षष्टिचयेण, शुक्रो वेदाग्नियमयुतामंशसप्ततिं भुङ्क्ते ऽर्थादयदा शुक्रः शीघ्रोच्चसमानो जातस्तदनन्तरं प्रथमदिनषष्ट्या चतुःसप्तत्यंशान् द्वितीयदिनषष्ट्या त्रिसप्तत्यंशान् तृतीयदिनषष्ट्या द्विसप्तत्यंशान् क्रमेण भुङ्क्ते ततोऽर्थाष्टकेन पञ्चाशीतिदिनैः सप्तसप्तत्यंशान् ततस्त्रिभिर्दिनैः

* साम्प्रतकालिकप्रसिद्धसूर्यसिद्धान्तानुसारेण यदि गण्यते तदा ५८४ $-\frac{१}{६०}$ इत्यागच्छति ।

सपादांशं पञ्चदशकलाधिकमंशैकं गत्वा वक्रं चरति । ततो वक्रः शुक्रः पञ्चदशभिर्दिनैरंशद्वयं गच्छति, ततः पञ्चभिर्दिनैः पश्चिमेऽस्तं गच्छति ततो दशभिर्दिनैः प्रागुदितो भवति ततो नखैर्विंशतिदिनैर्जलधिनंशचतुष्कं गत्वाऽनुवक्री मार्गी भवति ततो दन्तकरैः २३२ दिनैः खशरयमानं २५० शान् गत्वा पूर्वस्यामस्तं गच्छति ततो दिनषष्ट्या पञ्चसप्तत्यंशान् गत्वाऽपरतः पश्चिमायां दिशि भृगुः शुक्रो दृश्यो भवति ।

अत्रोपपत्तिः । यदा शुक्रः शीघ्रोच्चसमो भवति ततोऽनन्तरमूर्ध्वलिखितदिनैः कतिकत्यंशान् स्फुटान् भुङ्क्त इति स्थूलगणनया ग्रहलाघवादिकरणानुसारेण

दिनानि,				गतयः
६०,	..	..	..	७४°
६०,	..	..	..	७३
६०	..	..	..	७२
८५	..	..	..	७७
३,	..	..	..	१,१५′
१५,	..	..	..	−२
५,	..	..	..	−४
१०,	..	..	..	−४
२०	..	..	..	−४
२३२	..	..		+२५०
६०,	..	..	..	७५
६१०				६१०°,१५′

एतावन्तो भवन्त्येतदनुसारेणास्माभिः संशोधिताः श्लोकाः ।

अत्र ५८४ दिनैः शीघ्रोच्चसमः शुक्रो भवति ततः षड्विंशतिदिनैः पश्चिमायां शुक्रोदयो भवति । एवमुच्चसमशुक्रकालात् ५८४ + २६ = ६१० एतन्मितैर्दिनैः पश्चिमायां शुक्रो दृश्यो भवति ।

वक्रः शुक्रस्तिथिभि १५ र्दिनैरंशद्वयं गत्वा, पञ्चभिर्दशभिर्विंशतिभिर्दिनैश्च तुल्यमेव चतुरश्चतुरोऽंशान् भुङ्क्ते तेन जलधिशब्दस्य प्रत्येकेन सहान्वयः समुचितः ।

९०—१३. इदानीं गुरोरुदयाद्याह । विचतुस्त्रिंशदित्यादि ।

अहर्गणाच्चतुस्त्रिंशद्विनानि चतुस्त्रिंशद् घटिकाश्च विशोध्य शेषं नवनवदहनैः ३९९ हृत्वा लब्धा गुरोरुदयाख्या भवन्ति स्थिता ये शेषास्ते दिवसाः पृथक् स्थाप्याः । उदयाख्यस्य नवमांशो दिनेषु पूर्वस्थापितदिवसेषु दत्वा योजितदिनानि चारज्ञानार्थं पृथक् स्थाप्यानीति शेषः । अथ पूर्वं ये लब्धा उदयाख्यास्ते षड्वर्गेण ३६ गुणनीया एकनवाग्निभि-३९१ र्भक्ताः शेषं पदसंज्ञमष्टादशभिर्युतं द्विः स्थानद्वये स्थाप्यं ततो वक्ष्यमाणैर्मध्यस्फुटखण्डैः फले प्रसाध्य तयोः फलयोर्विश्लेषाद्योंऽशास्तत्समा दिवसा मध्यखण्डात् स्फुटखण्डस्य हानौ पूर्वस्थापितोदयनवांशयुतदिनेषु योज्या अन्यथाऽर्थात् सौरे गुरुसम्बन्धिनि स्फुटखण्डेऽधिके तु शोध्यास्तदा चारज्ञानार्थं स्फुटा दिवसा भवन्ति । यावत्पदं १८० पर्यन्तं भवति, तावत् क्षयखण्डे रसविषयकृतशशाङ्काः १४५६ एतेऽङ्का ज्ञेयास्ततः पञ्चनवतिशत १९५ पदपर्यन्तं वृद्धौ घनखण्डे विषयरसेनाः १२६५ एतेऽङ्का ज्ञेयास्ततो हानौ क्षये तृतीयखण्डे १६ पदपर्यन्ते गुरोः षड्वसुमनवोऽ १४८६ ङ्का ज्ञेयाः । एतेऽङ्काः किमर्थं पठितास्तदानयनं चेष्टपदे कथं कर्तव्यमित्यादयो न बुद्ध्यन्ते "पञ्चगुणिते ह्युदयेऽष्टभिर्हृते पूर्वतः कला आगच्छन्ति देवपूज्यस्य गुरोः प्रथमे खण्डे कन्याया नवांशास्त्रिंशत्कलासहिता भवन्ति । अर्थात्प्रथमे

खखण्डे गुरोराद्यादिमानं = ५ रा । ६° । ३०′ । द्वितीयखण्डे च चक्रार्द्धं राशिषट्कं परेऽन्तिमे खखण्डे तु गुणाशा गुणसहिता दश त्र्येकादशांशाः । गुरुर्यदा शीघ्रोच्चसमो भवति ततोऽनन्तरं षष्ट्या दिनषष्ट्या द्वादश, भागान् खकृतैश्चत्वारिंशद्भिर्नैश्चतुरोंशान् कृताश्विभिश्चतुर्विंशतिदिनैरंशद्वयं गच्छति ततः सप्ताष्टकेन पञ्चदशदिनैर्वक्री भवति ततः षष्टितः षष्टिदिनैरंशषट्कं पुनः षष्टिदिनैरंशषट्कं वक्रो गुरुर्भुङ्क्ते ततोऽनुवक्रो मार्गो भवति मार्गानन्तरमशीतिदिनैरर्कभागान् पञ्चचत्वारिंशद्भिर्नैर्नवभागान् विभुज्यास्तं गच्छति तत एकं मासं स्थित्वाऽग्रिमे मासेऽस्य गुरोः स्फुटोदयो भवति ।

अत्रोपपत्तिः । साम्प्रतकालिकसूर्यसिद्धान्तानुसारेण रभ = ४३२०००० तथा गुरोर्भगणाः = ३६४२२० ततः शीघ्रकेन्द्रभगणाः = रभ − गुभ = ३६५५७८० । शीघ्रकेन्द्रभगणसमैव १५७७६१७८०० कुदिनेषु रविगुर्वोर्युतिस्ततोऽनुपातो यदि ३६५५७८० युतिभिः १५७७६१७८०० कुदिनानि लभ्यन्ते तदैकयुत्या किं जात एकयुतिकालः = $\frac{१५७७६१७८००}{३६५५७८०}$ = ३६६ − $\frac{१}{६}$ स्वल्पान्तरात् । ततोऽन्योऽनुपातो यदि ३६६ − $\frac{१}{६}$ दिनैरेकयुतिर्वैकशीघ्रकेन्द्रभगणस्तदाहर्गणेन किं लब्धं युतिमानं = $\frac{\text{अह}}{३६६ - \frac{१}{६}}$ अत्राहर्गणे ३६६ एतैर्भक्ते लब्धा उदयाख्या इति कल्प्यते तदा भागहरणरीत्या वास्तवशेषमानं = अह − उ (३६६ − $\frac{१}{६}$) = अह − ३६६उ + $\frac{उ}{६}$ = शेदि + $\frac{उ}{}$ अथैकस्मिन्नुदये ३६६ दिनानि तेन ३६१ उदयेषु ३६६ × ३६१ दिनानि भविष्यन्ति ततोऽनुपातो यदि १५७७६१७८०० दिनैः ३६४२२० एते गुरुभगणा लभ्यन्ते तदा ३६६ × ३६१ दिनैः किमिति जाता ३६१ उदयाख्येषु गुरोर्भगणाः = $\frac{३६४२२० \times ३६६ \times ३६१}{१५७७६१७८००}$ = ३६भ । ०रा । ४° स्वल्पान्तरात् । ततोऽन्योऽनुपातो यदि ३६१ उदयेषु ३६ भगणा लभ्यन्ते तदाऽभीष्टेनोदयाख्येन किं लब्धा गुरोर्भगणाः प्रयोजनाभावात्त्यक्ताः शेषस्य पदसंज्ञाः कृताः पुनर्यदि ३६१ उदयेषु चत्वारोऽंशा वा २४० कला लभ्यन्ते तदेष्टोदयाख्येन किं लब्धाः कलाः = $\frac{५ उ}{८}$ स्वल्पान्तरात् । अत्रारम्भकालिकः क्षेपः १८ । अथ यदा पदसंज्ञा १८० तदा पूर्वयुक्त्या गुरोर्भगणादिमानम् = $\frac{१८०}{३६१}$ = ० । ५रा । १५° । ४३′ अत्र प्रथमखण्डे आचार्येण ५रा । ६° । ३० दं गृहीतम् । द्वितीयखण्डेऽ १६५ स्मिन् गुरोर्मानम् = $\frac{१६५}{३६१}$ = ६रा । ०° । − २७′ तत्राचार्येण-६रा दं गृहीतम् तृतीयखण्डे तु गुरोर्मानम् $\frac{१६}{३६१}$ = ०रा । १४° । ४४′ तत्राचार्येण १३° दं गृहीतम् । अत्र गुरुमन्दफलजन्यविकारार्थं कदाचित् आचार्येण रसविषयकृतशशाङ्का इत्यादि संस्कारजन्यगुरोर्मानं स्फुटमेव नव सार्द्धाः कन्यांशा इत्यादिना पठितमित्यनुमीयते । यदि शीघ्रोच्चसमो गुरुर्भवति ततोऽनन्तरं गणितेन स्वल्पान्तरात्

६०	दिनेषु			गुरुगतिः	= १२°
४०	दिनेषु			गुरुगतिः	= ४
२४	,,	,,	,,	,,	= २
१५	,,	,,	,,	,,	= ०
६०	,,	,,	,,	,,	= − ६
६०	,,	,,	,,	,,	= − ६
८०	,,	,,	,,	,,	= +१२
४५	,,	,,	,,	,,	= ६
३०	,,	,,	,,	,,	= १५
४१४					१२ + १२°

इत्यायाति, ततः पाठपठिता दिनभागा युक्ता एवेति ।

१४–२०. इदानीं शनैश्चरस्य चारमाह । अध्यर्द्धशतमित्यादि ।

दिवसेभ्योऽहर्गणेभ्यः सचंशं विंशतिघटीभिः सहितं अध्यर्द्धशत १५० मपनयेत् । शोधयेत् । ततो वसुमुनिगुणै ३७८ रुद्धृतेभ्यो ये लब्धास्ते पूर्ववत् सूर्यजस्योदयाख्या भवन्ति, शेषं समभ्युदयादुदयानन्तरं दिवसाद्याः स्थिता भवन्ति । ततः शेषदिनेभ्य उदयाख्यस्य दशांशं जह्यात् त्यजेत् । अवशिष्टानि दिनानि चारज्ञानार्थं पृथक् स्थाप्यानि । अथ नवभिर्गुणितादुदयाख्यात्षड्विषययमै२५६र्हृतादाद्यच्छेषं तत्पदसंज्ञं भवति तच्च नवाशीत्या ८६ युतं कर्त्तव्यं १६ – १७ श्लोकाभ्यां कश्चित्संस्कारविशेषः कदाचिन्मन्दफलजन्यो दीयत आचार्येण तत्रापि १७ श्लोकस्योत्तरार्द्धेन यः संस्कारः स चोदयाख्यात् साधितस्तद्यथा शनेरुदय उदयाख्य एकाचिंशद्गुणितो द्विगुणै ३२ र्हृतः फलसमा क्षयाख्ये वृद्धिः कर्त्तव्याऽर्थात् पूर्वप्रकारेण यः संस्कार उत्पद्यते तच्चैकाचिंशद्गुणितोदयद्वाचिंशद्भागसमाः कलाः क्षयाः कर्त्तव्याः । १६ श्लोकेन, १७ श्लोकस्य पूर्वार्द्धेन च पदखण्डक्षयवशेन संस्कारः साधितस्तत्र ३० पदपर्यन्तं प्रथमखण्डं, १२७ पदपर्यन्तं द्वितीयखण्डं, ६६ पदपर्यन्तं तृतीयं खण्डम् ॥ प्रथमे खण्डे वृषभस्य षोडशांशा नवलिप्तारहिताः । द्वितीये पञ्चराशयस्त्रिघनः सप्तविंशत्यंशाः । चतुस्त्रिंशत्कलाश्च । तृतीये खण्डे तु सिंहस्य सप्तांशा अष्टाविंशतिकलाश्चेति क्रमेण शनेर्मानम् । अथ यदा शनिः शीघ्रोच्चसमस्ततोऽनन्तरं षोडशभिर्दिनैरंशक्षयं कृतोनषष्ट्या षट्पञ्चाशद्भिर्नैर्द्विगुणपक्षान् अर्थादंशक्षयं द्विपञ्चाशत्कला भुङ्क्ते । ततो विभूतषष्ट्या पञ्चपञ्चाशद्भिर्नैर्वक्री भवति ततो वक्रः शनिरष्टरसै ६८ र्दिनैस्त्रीनंशान् षष्टिदिनैः कृतान् ४ अंशान् भुक्त्वा मार्गी भवति ततः अर्थाश्च शतं चैषां समाहारोऽर्थशतमिति व्युत्पत्त्याऽर्थशतेना पञ्चाधिकशतेना १०५ ष्टौ भागान् भुक्त्वाऽस्तं गच्छति इति शेषः ततश्चास्तगः शनिः षट्कृत्या षट्त्रिंशद्भिर्नैर्दहनमंशक्षयं गत्वोदयं गच्छतीति शेषः ।

अत्रोपपत्तिः । साम्प्रतकालिकसूर्यसिद्धान्तानुसारेण रविभगणाः ४३२०००० शनिभगणाः १४६५६८ शनिशीघ्रकेन्द्रभगणाः = रभ − शभ = ४१७३४३२ ततोऽनुपातो यदि ४१७३४३२ भगणैः १५७७६१७८०० दिनानि लभ्यन्ते तदैकेन भगणेन किं जातो रविशनियुतिकालः $= \frac{१५७७६१७८००}{४१७३४३२} = ३७८\frac{१}{११}$ अचार्येण $\frac{१}{११}$ स्य स्थाने $\frac{१}{१०}$ अयं गृहीतः । ततोऽन्योऽनुपातो

यदि ३७८ $\frac{१}{१०}$ दिनैरेकः शीघ्रकेन्द्रभगणस्तदाऽहर्गणेन किं जातो भगणः $= \frac{\text{अह}}{३७८\frac{१}{१०}}$ अचार्येणाहर्गणं ३७८ अनेन विभज्य लब्धस्योदयसंज्ञा कृता ततो वास्तवशेषमानं = अह − उ (३७८ $\frac{१}{१०}$) = अह − ३७८ उ − $\frac{\text{उ}}{१०}$ = शेदि − $\frac{\text{उद}}{१०}$ । अथैकस्मिन्नुदये ३७८ दिनानि तेन २५६ उदयेषु ३७८ × २५६ दिनानि ततोऽनुपातो यदि १५७७६१७८०० दिनैः शनेः १४६५६८ भगणा लभ्यन्ते तदा ३७८ × २५६ दिनैर्वा २५६ उदयेषु किं जाताः २५६ उदयेषु शनेर्भगणाः $= \frac{१४६५६८ \times ३७८ \times २५६}{१५७७६१७८००}$ = ६ − (०रा । ४° । ८′) ततोऽनुपातो यदि २५६ उदयेषु ६ भगणा लभ्यन्ते तदेष्टोदयाख्येन किं अच लब्धानां भगणानां प्रयोजनाभावात् शेषस्य पदसंज्ञा कृता अनेन १५ श्लोकस्योपपत्तिर्भवति । ८६ तु क्षेपोऽस्ति ।

अथ यदि २५६ उदयाख्येन − (४° । ८′) = − २४८′ शोधनफलं लभ्यते तदेष्टोदयाख्येन किं जातं शोधनफलं कलात्मकं $= \frac{२४८ \text{ उद}}{२५६} = \frac{३१ \text{ उद}}{३२}$ अनेन १७ श्लोकस्योत्तरार्धमुपपन्नं भवति । अथ यदा ३० पदानि तदा पूर्वोक्तप्रकारेण राशिमानं $\frac{३० \times १२}{२५६}$ = १रा, । १२° । ११′ एतत्स्थाने आचार्येण १रा । १५° । १५′ एते पठिताः । यदा १२७ पदानि तदा पूर्वप्रकारेण $\frac{१२७ \times १२}{२५६}$ = ५रा । २८° । ३५′ एत आयान्ति आचार्यपठिताश्चैते ५रा । २७° । ३४′ ते सन्ति । एवं यदा ६६ पदानि तदा $\frac{६६ \times १२}{२५६}$ = ४रा । ७° । ३०′ एत आयान्ति । एतदनुसारेणैवास्माभिस्तृतीयखण्डोत्थाङ्काः शोधितास्ते च तदैव समीचीना यदा तत्र संस्कारामावः स्यादाचार्यमतेन । अथ यदा शनिः शीघ्रोच्चसमस्ततोऽनन्तरं स्थूलगणनया,

१६	दिनेषु	••	••	गतयः	••	••	१८०′	=	३°
५६	••	••	••	••	••	••	२३२	=	४ स्वल्पान्तरात्
५५	••	••	••	••	••	••	०	=	४
६८	••	••	••	••	••	••	••	=	− ३
६०	••	••	••	••	••	••	••	=	− ४
१०५	••	••	••	••	••	••	••	=	+ ८
३६	••	••	••	••	••	••	••	=	+ ३
३.६६									+ १५°

इत्यायाति ततः पाठपठिता दिनभागाः समीचीना एवेति ।

२१−३५· इदानीं भौमचारादिकमाह । द्युगणादित्यादि ।

द्युगणात्षट्पञ्चयमान् २५६ पञ्चाष्टकं ४० चत्वारिंशन्नाडीश्च विशोध्य शेषं गगनाष्टमुनिभिः७८०र्विभज्य प्राग्वन्महीजस्य भौमस्योदया लभ्यन्ते । शेषदिनानि यानि तत्र अब्ध्यन्वितस्वरतिथि (१५७ + ४ = १६१) गुणितोदयाख्यसमा विनाड्यो विघटिकाः क्षेप्यास्तदा वास्तवशेषदिनानि भवन्ति − इति ज्ञेयम् । अष्टादशगुणिता उदयाख्याः पञ्चदशभिर्भक्ता अस्माद्भागहरणात् स्थितं शेषमानं ज्ञेयम् । ततः प्रतिराश्यं शेषं स्वपञ्चांशोनं कृत्वा क्रमाद्राशिप्रमाणतो मध्यमो भौमः साध्यः । अर्थात् स्वपञ्चांशोनं शेषं राश्यादिको मध्यमो भौमो

भवति ततोऽस्य भौमस्य गणकः स्फुटताचारक्रमं स्पष्टभौमवशेन यद्भौमस्योदयवक्रादिगमनं तत्कुर्यात् । स्फुटभौमयोरन्तरे येऽंशास्ते मध्यमेऽधिके सति पूर्वस्थापितसंस्कृतदिनेषु क्षेप्या मध्यमहानौ मध्यमाल्पे तु तेऽन्तरांशाः शोध्यास्तदा स्फुटचारज्ञानार्थं वास्तवदिनानि भवन्तीति । अथ गतितश्चारं कथयत्याचार्यः २५ – २६ श्लोकाभ्यां तच्च २५ श्लोकस्थसंख्याज्ञानं न भवत्यतीवाशुद्धत्वात् । अस्तानन्तरं भौमस्त्रयोदशांशान् गत्वा निरंशो रविसमो भवति ततो निरंशानन्तरं विंशत्यंशान् व्यतीत्योल्लङ्घ्यार्धांशत्वा उदयमुपयाति । अतोऽनन्तरमहं गतिचारवशेन दिनक्रमं वक्ष्ये कथयिष्य इत्याचार्यः कथयति । २७ – २८ श्लोकाभ्यां कीदृशं दिनक्रमं वा गतिक्रमं कथयतीतीदानीं पर्यन्तं न ज्ञायते । मीनवृश्चिकमेषधनुःस्थितो वक्रो भौमो यदा वक्रो वक्रमार्गप्रवृत्तो भवति तदा षट्सप्तकेन द्विचत्वारिंश ४२ द्विनैर्नवभागान्, पुनर्द्विकृतेन ४२, नग ७ भागान् भुङ्क्ते ततो दिनषष्ट्या षोडशभागान् विभुज्यानुगतिर्भवति । अनुगतिशब्देन भौमस्य मध्यमा गतिराचार्येणाच गृह्यत इत्यनुमीयते, अनुगतिशब्देन यदि मार्गी गृह्यते तदा वक्रानन्तरं मार्गप्रवृत्तिः १४४ दिनैरायाति परन्तु वक्रानन्तरं मार्गप्रवृत्तिर्वास्तवगणनया प्रायः ६० दिनाभ्यन्तरे भवति । अतोऽनुगतिशब्देन नाच मार्गीति मन्मतम् । वृषमिथुनतुलाकन्यास्थितो भौमः ४० दिनैः सप्तांशान् पुनः ४० दिनैर्दशांशान् त्रिषष्टिदिनैश्च सप्तदशांशान् यथाक्रमं पूर्ववत् वक्रानन्तरं भुङ्क्ते । कर्कटसिंहस्थित आरो भौमस्तथैव ४४ दिनैः सप्त, ४० दिनैः षट्, षष्टिदिनैश्चाष्टादशांशान् क्रमेण वक्रादिषु भुङ्क्ते । एवं कुम्भमकरस्थितो भौमस्तद्वन्नमनचये ३२ दिनैः षट् ३६ दिनैर्नव ५७ दिनैश्च पञ्चदशांशान् भुङ्क्ते ॥ ३३ श्लोकेन वक्रातिवक्रानुवक्रगमनेषु मानं कथयत्याचार्यस्तन्न ज्ञायते श्लोकाशुद्ध्या । १ । ५ । ८ । ११ । १४ । ११ । ६ एतेऽङ्काः पञ्चाभ्यां द्वाभ्यां संयुतास्तदा भौमस्य सप्तधा गतयः ३ । ७ । १० । १३ । १६ । १३ । ११ एवमष्टमी शीघ्रगतिसंज्ञका गतिस्त्रिधा शशाङ्क १ कृत ४ वेद ४ रहितचत्वारिंशद्वशेन ३६ । ३६ । ३६ एवं पूर्वप्रतिपादितगतिषु दिवसान् कथयति । षट्त्रिंशत् ३६ह्युरनलाङ्काष्टर्क१२चिवर्ग६गुण३शून्यैः० सहिता तदा पूर्वप्रतिपादितसप्तगतिषु दिवसा भवन्ति ३८ । ३६ । ४५ । ४८ । ४५ ।३६। ३६ एवं सप्तमगत्यां ये चारदिवसाः प्रोक्ताः षट्त्रिंशत्समास्त एवाष्टमगत्यां शीघ्रगतौ च ज्ञेया इति ।

अत्रोपपत्तिः । साम्प्रतकालिकसूर्यसिद्धान्तमतेन रविभगणाः = ४३२०००० भौमभगणाः = २२६८३२ शीघ्रकेन्द्रभगणाः = २०२३१६८ ततोऽनुपातो यदि एतैः २०२३१६८ शीघ्रकेन्द्रभगणैः १५७७६१७८०० कुदिनानि लभ्यन्ते तदैकेन शीघ्रकेन्द्रभगणेन किं जातो भौमरवियुतिकालः = $\frac{१५७७६१७८००}{२०२३१६८}$ = ७८० दिनानि – २७७ विघटिकास्तत्राचार्यमतेन २६१ एता विघटिका आयान्ति, अथान्योऽनुपातो यदि ७८०दि – १६१वि सावयवदिनैरेको युतिकालस्तदाऽहर्गणेन किं लब्धा ह्युदयाख्याः पूर्ववत् प्रथमखण्डजन्यास्ततो वास्तवशेषमानम् = अह – उद ($७८०^{दि}$ – $१६१^{विघ}$) = अह – ७८० उद + १६१ $उद^{विघ}$ = शे + $१६१^{वि}$ उद ।

अत्रापि पूर्वयुक्त्या पञ्चदशभिरुदयाख्यैरष्टादशभगणा भौमस्यायान्ति ततोऽनुपातो यदि पञ्चदशभिरुदयैरष्टादश भगणा लभ्यन्ते तदेष्टोदयाख्येन किम् । अत्र लब्धानां भगणानां प्रयोजनाभावात् त्यागे शेषं द्वादशगुणं पञ्चदशहृतं जातो राश्यादिको मध्यमो भौमः $= \frac{१२ \text{ शे}}{१५} = \frac{४ \text{शे}}{५}$ अत उपपन्नं भौमानयनम् । अत्र स्फुटमध्ययोरन्तरांशसमानां दिवसानां संस्कारः किमर्थमुदित इति न ज्ञायते यतो भौमशीघ्रकेन्द्रगत्या यद्येकं दिनं लभ्यते तदा षष्टिगुणितान्तरांशैः किं जातानि दिनानि $= \frac{६० \text{ अन्तरांश}}{२८} = २$ अन्तरांश । स्वल्पान्तरात्, । इत्यनुपातेन द्विगुणान्तरांशसमानां दिवसानां संस्कारः समुचितः पूर्वस्थापितदिनेषु तदा शीघ्रोच्चभौमयुत्यनन्तरं दिनानि भविष्यन्ति । यदि आचार्यप्रकारेण भौमस्य स्फुटीकरणं यदीयकारणं साम्प्रतं मनसि न स्फुरति विलक्षणं स्यात्तदा युज्यते पूर्वप्रतिपादितसंस्कारः । अथ मन्दफलसंस्कारं विनैव स्थूलगणनया वक्रानन्तरं भौमो ४२ दिनैः षडंशान्, ततः ४० दिनैः पञ्चांशान् विपरीतं गच्छति ततो दिनषष्ट्या क्रमेण विंशत्यंशान् गच्छति, राश्यन्तरस्थिते भौमे तु मन्दफलादिजन्यगमनान्तरवशेन भिन्नान् भिन्नानंशान् गमिष्यत्येव ते तु परीक्षया निश्चित्याचार्येण लिखिता इति । एवमाचार्येणाष्टासु गतिष्वपि दिवसा य उपलब्धास्ते पठिता इति ।

३६–५६. इदानीं बुधस्य चारादिकमाह । दद्यात्सप्तचतुष्कानित्यादि ।

युगणेऽहर्गणे सप्तचतुष्कानष्टाविंशतिं चांशं घटीचांशं च दद्यात् क्षिपेत्, ततो योगेन यः स्यात् स च वसुभिरष्टभिर्गुणितो मुनिनवयमकै ६२७ भक्तश्च पूर्ववत् रोहिणस्य बुधस्योदया ज्ञेयाः । अवशिष्टदिनानामष्टांशोऽत्र शेषदिनानि वास्तवानि ज्ञेयानि तेभ्यश्चतुर्भक्तोदयसमा नाड्यो विशोध्यास्तदा चारज्ञानार्थं वास्तवा दिवसा ज्ञेयाः । त्रिदिवसपै १२३ गुणिताउदयाख्यास्ततो रामार्णवाः ४३ शोध्याः शेषं नववसुरामैः ३८६ छिन्द्याद् भजेत्तदा भगणाद्यो मध्यमबुधो भवेत् । अथ नववसुरामै ३८६ भक्ते यदवशिष्टं तस्माद्वक्ष्यमाणविधिना स्फुटो बुधो ज्ञेयः शीघ्रोच्चस्य इति ॥ स बुधः पञ्चयुतैरसशेषैरर्थादेकादशसमैः शेषैरष्टांशान्, ततस्त्रिंशद्भिः त्रिंशदंशान् स्फुटान्, ततो नवकृत्या, ८१ षष्ट्यंशान्, ततो वसुयुतयाऽशीत्या ८८ शतं शतांशान्, ततस्त्रिभिरधिकैः शर्वैरेकादशभिरर्थाच्चतुर्दशभिः १४ तीक्ष्णांशून् द्वादशभागान्, ततस्त्रिंशद्भिः ३० त्रिंशदंशान्, ततश्चतुरधिकेन शतेन १०४, ऊनं शतं सप्तनवत्यंशान् ६७, अस्मादनन्तरं अर्थसंयुतया षड्त्रिंशत्या एकत्रिंशता चाधिकां विंशतिं चयोर्विंशत्यंशान् भुङ्क्ते । एवं हि स्फुटः सौम्यो बुधो भवति । अनयोर्मध्यस्फुटबुधयोर्विश्लेषांशान् अन्तरांशान् मध्यमबुधात् स्फुटबुधस्याधिके पूर्वस्थापितदिवसेभ्यो गणको विशोधयेत् स्फुटान्मध्यमे बुधेऽधिके तु तानन्तरांशान् दद्यात् क्षिपेत्तदा चारज्ञानार्थं यदा शीघ्रोच्चसमो बुधस्तस्मादनन्तरं दिवसाः स्युरिति, अथ शीघ्रोच्चस्थबुधस्य मेषादिद्वादशराशिवशेन चारं कथयति मेषे दिनषट्कृत्येति । यदा बुधो मेषस्थस्तदा दिनषट्कृत्या ३६, पञ्चत्रिंशदंशान् । सप्तवा दिनषट्कृत्या ३७, द्विकृतां ४२ शान् । स्वरहीनया दिनषट्कृत्या

२६ चिसप्तकमेकविंशत्यंशान्, पुनः सप्तहीनया दिनषट्कृत्या २६, इषु ५ गुणितं षट्कं त्रिंशदंशान् भुङ्क्ते । एवं

मेषे दिनानि = ३६ । ३७ । २६ । २६
अंशाः = ३५ । ४२ । २१ । ३०
तथा वृषे, दिनानि = ४ × १० + ५ = ४२ । २ × १० + ३ = २३ । २ × १० + ३ = २३ । ४ × १० + ६ = ४६ ।
अंशाः = ५० − ६ = ४४ । ५० − ३३ = १७ । ५० − ११ = ३६ । ५० − ७ = ४३ ।
मिथुने दिनानि = २ × १० + २५ = ४५ । २० + ० = २० । २० + ६ = २६ । २० + २७ = ४७ ।
अंशाः = ५० − २ = ४८ । १४ । २७ । ४० ।
कर्कटिके दिनानि = ४ × १० + २ = ४२ । १ × १० + ८ = १८ । ३ × १० + ० = ३० । ४ × १० + ६ = ४६ ।
अंशाः = २६ । १२° । ३०′ । २६ । २५ ।
सिंहे दिनानि = ३ × १० + ४ = ३४ । १ × १० + ६ = १६ । ३ × १० + २ = ३२ । ४ × १० + ५ = ४५ ।
अंशाः = २५ । १८ । २७ । २८ ।
कन्यायां दिनानि = २६ । ३८ । ३८ । ३८ ।
अंशाः = २७ । ४५ । ५६ । ६२ ।
तुलायां दिनानि = २१ × २ = ४२ । २० × २ = ४० । १० × २ = २० । १७ × २ = ३४ ।
अंशाः = ४२ − ३ = ३६ । ४० − ८ = ३२ । २० + १ = २१ । ३४ + ३० = ६४ ।
वृश्चिके दिनानि = १ × १० + ८ = १८ । ४ × १० + ५ = ४५ । ३ × १० + ४ = ३४ । ४ × १० + ८ = ४८ ।
अंशाः = २० । ५२ । ४५ । ७४ ।
धनुषि दिनानि = ४० । १६ । ४२ । ३२ ।
अंशाः = ३६ । ११ । ४३ । ३५ ।
मकरे दिनानि = २० । १३ । ३८ । ३२ ।
अंशाः = १६ । १४ । ३६ । ५८ ।
कुम्भे दिनानि = २० + ३ = २३ । २० + २ = २२ । २० + ४ = २४ । २० + १२ = ३२ ।
अंशाः = २२ । २५ । २० । ६० ।
मीने दिनानि = २४ । २५ । २६ । २७ ।
अंशाः = ५० − २४ = २६ । ५० − २० = ३० । ५० − २० = ३० । ५० − १ = ४६ ।

४८–५१, श्लोकैस्तुलावृश्चिकधनुर्मकराणामंशास्तत्तद्विषयेभ्यः संस्कारकृतेभ्यः सिद्धाः सन्ति । एते मेषादीनां दिवसा अंशाश्च पाठाशुद्धा वास्तवा आचार्योक्ता वा नेत्यत्र संशयएव । ५४ – ५६ श्लोकानामर्थः स्फुटस्तथापि तदाशयो न बुद्ध्यतेऽतो न ते व्याख्यायन्तेऽस्माभिः ।

अत्रोपपत्तिः । साम्प्रतकालिकसूर्यसिद्धान्तानुसारेण बुधभगणाः = ४३२०००० बुधशीघ्रोच्चभगणाः = १७६३७०६० शीघ्रकेन्द्रभगणाः = १३६१७०६० ततोऽनुपातो यदि शीघ्रकेन्द्रभगणैः कुदिनानि = १५७७६१७८०० लभ्यन्ते तदाभ्रशीघ्रकेन्द्रभगणैः किं लब्धः पूर्ववदष्टोदयकालः $= \frac{१५७७६१७८०० \times ८}{१३६१७०६०} = ६२७^{दि} + २^{घ}$ ततोऽन्योऽनुपातो यदि अष्टोदयकालेनाष्टावुदया लभ्यन्ते तदाऽहर्गणेन किं जाता उदयाः पूर्ववत् केवलं ६२७ अनेन भक्तेन ततो वास्तवशेषमानम् = ८ अह − उ ($६२७^{दि} + २^{घ}$) = ८ अह − ६२७ उ − $२^{घ}$ उ = शे − $२^{घ}$ उ इदं शेषमष्टोदयसम्बन्धि, ततोऽष्टभिर्हृतेन जातमेकोदयसम्बन्धिशेषं = $\frac{शे}{८} - \frac{उ}{४^{घ}}$ अनेन ३६ श्लोकः ३७ श्लोकस्य पूर्वभागश्चोपपन्नो भवति । एवं २८६ एतैरुदयैः १२३ एते बुधभगणा आयान्ति तत एतद्द्वयं गृहीत्वाऽनुपातान्मध्यबुधः शेषवशेन भौमादिवत् शीघ्रोच्चसमे मध्यमे बुधे

मन्दफलसंस्कारेण स्फुटबुधश्च साधितः । ततो मेषादिद्वादशराशिवशेन बुधस्य चारा उदितास्तचापि किमपि भौमवन्मन्दफलोद्भूतं स्पष्टक्रियाधीनं कारणमस्ति तत्तु न बुद्धतेऽद्यावध्यस्माभिरिति सुधीभिर्भृशं चिन्त्यम् ।

५७. इदानीमत्तजदृक्कर्ममाह । ज्याविधीति ।

पूर्वोक्तज्याविधिना यो विक्षेपोऽर्थात् शरज्या तया गुणिताच्चरकालाद्योऽम्बराष्टवेदै ४८० रंशो भागो भवेत्तं यथाकक्षं यथायोग्यं याम्योत्तरे शरे सति स्वे ग्रहे जह्याद्वा क्षिपेत् । अर्थात् शरज्यागुणितपलात्मकचरात् शून्याष्टवेदै ४८० हृते यो लब्धो भागस्तमुदयज्ञानार्थं ग्रहे याम्योत्तरे शरे क्रमेण क्षिपेत् जह्यादस्तज्ञानार्थं त्वन्यथा कर्त्तव्योऽर्थात् याम्ये शरे ग्रहाज्जह्यादुत्तरे तु योजयेदेवमत्तजदृक्कर्मसंस्कृतो ग्रहो भवति तत एतद्ग्रहान्तरांशवशेन वक्ष्यमाणनियमानुसारेणास्तदर्शनं गणकेन वाच्यमिति ।

अथोपपत्तिः । कल्प्यते खसं, सममण्डलं । मेसं, नाडीमण्डलं । यसं, क्षितिजं । मेदृस्थ, क्रान्तिवृत्तं । य, क्षितिजे ग्रहबिम्बं । स्था, क्रान्तिवृत्ते ग्रहस्थानं । स्थास्था', ग्रहस्थानोपर्य्यहोरात्रवृत्तम् । दृ, ग्रहबिम्बे क्षितिजस्थे क्षितिजे क्रान्तिवृत्तस्य प्रदेशः । स्थाय, ग्रहस्य ध्रुवप्रोतीयः शरः । संच', ग्रहबिम्बवशेन चरमानम् । संच, ग्रहस्थानवशेन चरमानं तदन्तरं चच', स्थास्था'समं स्वल्पान्तरात्तत्तु स्यादृसमं तदानयनमेवास्माकमिष्टं तच्च स्याय—क्रान्तिखण्डोत्थं चरमेव तदर्थमाचार्येण स्थूलानुपातः कृतः यदि परक्रान्तिज्यया ४८ परमं पलात्मकं चरं लभ्यते तदा स्वयमितस्य शरस्य ज्यया किं लब्धं पलात्मकं स्यास्था' $= \frac{\text{चर} \times \text{ज्याशर}}{४८}$ इदं दशभक्तमंशादिकं जातं $= \frac{\text{चर} \times \text{ज्याशर}}{४८०}$ अत उपपन्नं यथोक्तम् । दक्षिणे शरे ग्रहस्थानं क्षितिजादूर्ध्वं गच्छति तदोदये ग्रहबिम्बं प्राक्क्षितिजेऽतो ग्रहस्थाने तदा धनं कर्त्तव्यं पूर्वागतमंशमानम् । उत्तरे शरे यथा मल्लिखितक्षेत्रे ग्रहबिम्बे प्राक्क्षितिजस्थे ग्रहस्थानमध एवायातो ग्रहस्थानाच्छोध्यं पूर्वागतमंशमानमस्तेत्वस्माद्विपरीतं भवतीति सर्वं चतुरस्रम् ।

५८–६०. इदानीं कालांशान् तत्स्फुटीकरणं चाह । एवं कृत इत्यादि ।

एवं कृतेऽर्थादत्तजदृक्कर्मसंस्कृतग्रहानयनानन्तरं ततो ग्रहार्कान्तरांशैर्ग्रहाणामस्तं वा दर्शनं वाच्यं तच्च क्रमेण चन्द्रादीनां द्वादश । मनवश्चतुर्दश । रवयो द्वादश । तिथयः पञ्चदश । अष्टौ । तिथयः पञ्चदश एते समयांशाः सन्ति तैरंशैस्तेषां चन्द्रादीनामुदयो वास्तो भवति । अथ समयांशानां स्फुटीकरणम् । ये पूर्वोक्ताः समयांशास्ते क्षितिज्या गुणिता ग्रहाधिष्ठितराश्युदयविनाडिकाहृता लब्धांशकप्रमाणास्तेषां ग्रहाणां स्फुटोदयो वा स्फुटास्तं

वाच्यमिति । एवं तेन खगांशेन ग्रहसम्बन्धिकालांशेन बुधशुक्रभौमगुरवो यदाऽर्कादूर्ध्वेऽूनास्तदा प्राच्यामुदयन्त इति शेषः । एवं शशिनश्चन्द्रस्य प्रत्युत्तरमर्थाद्यदा कालांशेन शशी रवेरधिकस्तदा दृश्यो भवति । एवं सर्वं विक्षेपात् शराज्ज्ञात्वा ततोऽनागतमागामिनमादेशमुदयास्तादिकथनं गणकः कुर्यात् ।

अत्रोपपत्तिरुपलब्धिरेव । कालांशानां स्फुटीकरणं च त्रैराशिकेन यदि त्रिंशत्या पाठपठिताः कालांशा लभ्यन्ते तदा ग्रहाधिष्ठितराश्युदयविनाडिकाभिः किं व्यस्तानुपातेन जाताः स्फुटाः कालांशाः = $\frac{\text{मध्यमकालांशाः} \times ३००}{\text{ग्रराउद० वि०}}$ । अत्र व्यस्तत्रैराशिकेऽप्युपलब्धिरेव वासना । अन्यत्सर्वं सुगमम् ।

६१–६५. इदानीं ग्रन्थोपसंहारमाह । आवन्त्यकः समासादित्यादि ।

आवन्त्यकोऽवन्तीनगरीस्थो वराहमिहरनामाचार्यस्ततः पञ्चसिद्धान्तेभ्य इदं स्फुटाङ्कसमं दृग्गणितैक्यरूपं ताराग्रहकारिकातन्त्रं समासात् संक्षेपात् शिष्याणां हितार्थं चक्रे कृतवान् । प्रद्युम्नस्याचार्यस्य यो भूमितनयस्तस्मिन्, अथवा विजयनन्दिकृते जीवे गुरौ, सौरे शनौ बुधे च यो गणको दृग्गणितैक्याभावाद् भग्नोत्साहो भग्न उत्साहो यस्य स साम्प्रतमिदं मदीयं प्रस्फुटं करणं करणग्रन्थं भजतात् भजतु । ६२ श्लोकस्य पादत्रयं भग्नम् । इदानीं सुजनं प्रशंसयति । यः परोक्षस्य पुरुषस्य दोषान् प्रस्तावेऽपि अर्थात् तद्दोषचर्चावसरेऽपि न वक्ति कथयति गुणांश्चानवसरेऽपि प्रथयति विस्तरतः प्रतिपादयति, एतादृशे तस्मै सुजनाय परहिताय परोपकारिणे नमः । अथ मत्सररहितो वराहमिहर एतद्वक्ष्यमाणं वरं श्रेष्ठं ताराग्रहतन्त्ररूपं करणं साधनमष्टादशभिरार्याभिर्ददाति शिष्येभ्य इति शेषः ।

६६. इदानीमुदयास्तादिषु विशेषमाह । आकरणादिति ।

आकरणात्संसाधनात्पूर्वं प्रथमं शीघ्रोच्चसमे ग्रहे रविभागाः सूर्यस्यांशा ज्ञेयास्ततोऽग्रे ये चारांशसम्बन्धिनो दिवसास्ते रवावधिकाः कार्या एवमिष्टचारांशकालिको रविर्भवति । एवं यदा दिनेभ्यः सकाशात् पूर्वरीत्या भागा अंशा रवेः साधितास्तदा शीघ्रोच्चस्य तेऽंशाश्चक्राद्भगणपूर्तिसमयाज्ज्ञेया इति ।

अत्रोपपत्तिरिति सुगमा । यतो यदि स्थूलरीत्या प्रतिदिनं रविगतिरेको भागः कल्प्यते तदा ग्रहशीघ्रोच्चकालिको रविश्चारदिनसमांशयुतश्चारकालिको रविः शीघ्रोच्चभगणपूर्तिकालाद्भवत्येव ।

६७. इदानीं पुलिशमतेन ग्रहोदयादीन् विवक्षुस्तत्र प्रथमं कुजोदयादिकमाह । नवयमगुणेति ।

प्रायः पुलिशाचार्योऽहर्गणस्य नाम न गृह्णाति (मध्यमरव्यानयनं विलोक्यम्) अतोऽत्राहर्गणस्याध्याहारः कर्तव्यः । अहर्गणे नवयमगुणर्तु६३२६ हीने ततः कृतैश्चतुर्भिर्गुणिते विषयसप्तखाग्निभि३०७५ र्हृते योऽवशिष्टस्तस्मिन् भूयः पुनश्चतुर्भिर्हृते महीजस्य निरंशदिवसा निरंशात् सूर्यभौमयुतिकालाद्दिवसा भवन्तीत्यर्थः ।

अत्रोपपत्तिः । पुलिशाचार्येण $\frac{३०७५}{४} = ७६९ - \frac{१}{४}$ एतैर्दिवसैः सूर्यभौमयुतिकालो गृहीतो यच्च पूर्वप्रकारेण ७८० एते दिवसा आयान्ति । ततोऽनुपातो यदि ३०७५ दिवसैर्युतिचतुष्कं लभ्यते तदाहर्गणेन किमत्र लब्धानां प्रयोजनाभावात्त्यागे शेषं युतिकालात्क्रियन्ति दिनानि गतानीति ज्ञानार्थं चतुर्भक्तमिति ।

९८–९९. इदानीं चारमाह । षड्वर्गैरित्यादि ।

षड्वर्गैः षट्त्रिंशद्दिवसैः कुजो रवेः सकाशात्तिथिभिः पञ्चदशांशैरूनः सन् दृष्टो भवति ततो वसुधृति१८८ भिर्दिनैः षष्ट्यंशसमः, अष्टशतेनाष्टाधिकशतेन १०८, षष्ट्यंशसमः, द्व्यधिकया सप्तत्या ७२, नवत्यंशसमः, अष्टयुक्तया षष्ट्या ६८ शतार्द्धांशसमः ५०, खाब्धिद्विकैश्च २४० दशगुणितसप्तांशसमश्चान्तरितो भवति, ततोऽस्तं याति, अस्तानन्तरं सप्ताष्टकेन षट्पञ्चाशद्दिवसैः पुनस्तिथिमितानामंशानामस्तकालिकरविभौमान्तरांशसमानामपचयो भूत्वा भौमस्य निरंशगतिरर्थाद्वक्रीभूतः सूर्यसमानो भवति – इति ।

दिवसाः						सूर्यात्भौमस्यान्तरखण्डानि
३६	..	..	..	..	..	१५°
१८८	..	..	..	..	..	६०
१०८	..	..	..	..	..	६०
७२	..	..	..	..	..	६०
६८	..	..	..	..	..	५०
२४०	..	..	..	..	..	७०
५६	..	..	..	..	..	१५
७६७						३६०

अत्रोपपत्तिः । पुलिशाचार्येण तत्तद्दिनैरक्षितोऽन्तरखण्डानि स्थूलरीत्या वेधेन गणितेन वा यान्युपलब्धानि तानि पठितानीति ।

७०–७२. इदानीं बुधोदयादिकमाह । विशशिवसुरसेत्यादि ।

अहर्गणे शशिवसुरसेन्द्र १४६८१ रहिते ततो नवयमैरष्टगुणितेऽर्करामगुण ३३१२ भक्ते यच्छेषं तस्मिन् गुणकारेण नवयम २९ मितेन विभक्ते शीतांशुपुत्रस्य बुधस्याहानि दिवसा भवन्ति तत ऋभिर्दिनैश्चारा एते वक्ष्यमाणाः । यदा सूर्यबुधयोर्युतिकालो भवति ततोऽनन्तरं दशभिर्दिनैः सूर्याद् द्वादशांशाल्पः सन् बुधः प्रागुदेतो भवति ततो मनुभिश्चतुर्दशदिनैराशा दशांशा अल्पा भवन्ति ततोऽष्टादशभिर्दिनैर्बुधो नवभिरंशैः सूर्यासन्नो भवति ततस्त्रिंशद्दिनैस्त्रयोदशांशैः सूर्यादधिको भूत्वा पश्चिमायामुदेति ततोऽष्टादशभिर्दिनैर्नवभिरंशैरयतो याति ततः षोडशभिर्दिनैरष्टांशैरल्पो भूत्वा पश्चादस्तमेति ततोऽष्टभिर्दिनैश्च पुनर्नवांशैर्हीनो बुधो निरंशो रविसमानो भवतीति ।

दिनानि						चाराः
१०	..	..	..	..	..	−१२
१४	..	..	..	..	..	−१०
१८	..	..	..	..	..	+ ६
३०	..	..	..	..	..	१३
१८	..	..	..	..	..	+ ६
१६	..	..	..	..	..	− ८
८	..	..	..	..	..	− ६
११४						

अत्रोपपत्तिः । पुलिशाचार्येण $\frac{३३१२}{२६}$ एते दिवसा एकस्यां युतौ कल्पितास्ततो भौमवद्वासनातिसुगमा ।

७३–७५. इदानीं गुरोरुदयादिकमाह । रहितेऽष्टद्वियमेत्यादि ।

अत्र ७३ श्लोकस्य प्रथमः पादोऽशुद्धस्तेन वास्तवं क्षेपमानं न ज्ञायते । अहर्गणे सप्तगुणिते द्विविषयस्वराश्वि २७५२ हृते यच्छेषं तत्पुनः सप्तभक्तं तदा देवगुरोर्बृहस्पतेर्निरंशेभ्यः सूर्यगुरुयुतिकालाद् दिवसाः स्युस्तत एतद्दिवसेभ्यो वक्ष्यमाणनियमेन गुरोश्चारा भवन्ति ते चाराश्चार्काद्रवेः शोधितास्तदेष्टसमये गुरुर्भवतीति शेषः । अर्थात्ते चारा रविगुर्वोरन्तरांशाः सन्तीति । युतिकालानन्तरं षोडशदिनैरवेः सकाशाद् द्वादशांशान्तरितो भूत्वा गुरुः प्राच्यामुदेति ततः कृतविषयैर्४दिनैः कृतवेदाः ४४, अंशाः, सप्तत्या ७० सार्णवा षष्टिः ६४, नवदिग्भिः १०६ शून्यार्कसमा संख्या १२०, अष्टाशीत्या ८८ रसस्वरसमा संख्या ७६, शून्यकृते ४० द्वात्रिंशत् ३२ एते आद्याभिः क्रमेणान्तरांशाः सन्ति एतानन्तरांशान् गुरुर्भुक्त्वा ततोऽस्तं गच्छति, अस्तानन्तरं षोडशभिर्दिनैः पुनर्द्वादशान्तरांशैर्गुरुर्निरंशो भवति सूर्येण सह समागममेतीति शेषः ।

युतिकालानन्तरं दिवसाः	अन्तरांशखण्डानि
१६,	१२
५४,	४४
७०,	६४
१०६	१२०
८८,	७६
४०	३२
१६	१२
३६३	३६०

अत्रोपपत्तिः । एकस्यां युतौ पुलिशाचार्येणैते $\frac{२७५२}{७} = ३६३\frac{१}{७}$ दिवसाः प्रकल्पितास्ततः पूर्ववद्वासना सुगमा ।

७६–७८. इदानीं शुक्रोदयादिकमाह । नयनार्केत्यादि ।

अहर्गणे नयनार्कमहीन्दुभि१११२२हीने यच्छिष्टं तस्मिन् द्विगुणे रूपेन्द्रियेश्वरै११५१भक्ते यच्छेषं तद्गुलितं द्विभक्तं तदा शुक्रस्य भौमादिग्रहवन्निरंशदिवसाः स्युः । अथ दिवसे-

भ्यश्चारादिकं कथयति विषयैर्नवकविहीन इति, विषयैः पञ्चभिर्दिनैः सूर्यान्नवभागाल्पः शुक्रः प्रागुदितो भवति ततस्तिथिभिः पञ्चदशदिनैरेकयमहीनः सूर्यादेकविंशत्यंशहीनो वसुकृत्या २०८ च तिथिभि१५रंशैरल्पो भवति पुनः कृताष्टभिः कृताधिकाष्टभिरर्थाद् द्वादशदिनैः सेषुः पञ्चांशाधिकः अर्थात् सूर्याभिमुखं पञ्चांशान् गत्वाऽस्तमेति पूर्वस्यामिति शेषः । पुनः षष्ठाष्टकेनाष्टचत्वारिंश४८द्दिनैः सूर्याभिमुखं दशांशान् गत्वा निरंशगो रविसमानो भवति । ततोऽस्मान्निरंशस्थानाद्विलोमगः सूर्योदयगः पश्चात्पश्चिमायां दिशि निरंशकालेन षष्ठाष्टक-४८ मितेन दिनसमूहेनोदेति ततो विलोमगतिर्भूत्वाऽस्तं याति, अर्थात् पश्चिमायां वक्रो भूत्वा शुक्रोऽस्तं गच्छति ।

निरंशकालाद्दिवसाः	अन्तरांशखण्डानि
५	− ९
१५	− २१
२०८	− १५
१२	+ ५
४८	+ १०
२८८	०

एवं २८८ दिनैः पश्चिमायां पुनर्निरंशकालो भवति तत २८८ एतद्द्विगुणेना ५७६ नेन पुनस्तद्विंशि युतिकालः स्यादिति ।

अत्रोपपत्तिः । पूर्ववत्पुलिशाचार्येण सूर्यशुक्रयुतिकालः शीघ्रकेन्द्रैक्यभगणपूर्तिकाल-समः $\frac{११५१}{२} = ५७५\frac{१}{२}$ एतद्गृहीतस्ततः सर्वा क्रिया पूर्ववदिति वासना सुगमा । पश्चिमायां दिशि तूदयप्रमाणं कथयित्वा प्रसिद्धत्वादस्तादीनां दिनमानं न कथितमित्यनुमीयते ।

९९—८१. इदानीं शनेरुदयादिकमाह । विधृतिशररसेत्यादि ।

अत्र ९९ श्लोकस्य प्रथमपादे कोष्ठकान्तर्गतं पदमशुद्धं प्रतिभाति छन्दोभङ्गकार-णात् । अहर्गणे धृतिशररसशशाङ्के १६५१८ विरहिते ततः शेषे त्रिगुणिते धृतिरुद्रै१११९ र्भक्ते यदवशिष्टं तस्मिन् त्रिभिर्हृते प्राग्वत् सौरस्य निरंशदिवसाः स्युरिति शेषः । ततो वक्ष्य-माणनियमेन चारप्रमाणं ज्ञेयम् । धृतिभिरष्टादशदिनैः सूर्यात् सार्द्धाष्ट्यंशाल्यः १९° । ३०′ शनिः प्रागुदितो भवति ततोऽष्टनवति ९८ भिर्दिनैः साद्विनवत्यंशे ९०° । ३० र्हीनो भवति सूर्यात्, ततो मनुभिश्चतुर्दशदिनैस्त्रयोदशांशाल्यः, गुणरुद्रैः ११३ शून्यार्कां १२०° शाल्यः, द्यूनेन शतेन ९८ शशिनवकांशा९१ल्यः, अतिजगतिभिस्त्रयोदशदिनैः साद्र्यार्कां १२° । ३०′ शाल्यो भूत्वाऽस्तमेति ततोऽस्तानन्तरमतिधृतिभिरेकोनविंशतिदिनैः साद्र्यान् षोडशांशान् १९° । ३०′ सौरः शनिर्गत्वा निरंशं सूर्यसङ्गमं याति । एवं शनिः सर्वदा रवेः सकाशाद्धीनः सन् चरति गच्छतीति ।

दिवसाः	अन्तरांशखण्डानि
१८	१६° । ३०′
६८	६० । ३०
१४	१३
११३	१२०
६८	६१
१३	१२ । ३०
१६	१६ । ३०
३७३	३६०

अत्रोपपत्तिः । पूर्ववत्पुलिशाचार्येण सूर्यशनियुतिदिवसाः $\frac{१११८}{३} = ३७२\frac{२}{३}$ एते कल्पितास्ततस्तत्तद्विनैः स्थूलगणनया दृष्ट्या वा येऽन्तरांशा उपलब्धास्ते पठिता इति । एवं पुलिशाचार्यपठितेभ्यो ग्रहाणां युतिदिवसेभ्यः स्वल्पान्तराद्विलोमयुत्या पुलिशमतीया ग्रहभगणा ज्ञातुं शक्यन्ते यदि पुलिशाचार्यमतीयाः कल्पसावनदिवसा ज्ञाताः स्युरिति ।

इति पौलिशसिद्धान्ते तारायहा नामाष्टादशोऽध्यायः ।

इति पुलिशाचार्यमतेन तारायहाणां भौमादीनां साधनरूपोऽष्टादशोऽध्यायो जात इति ।

मया प्रयासागतमेकमेव
लब्ध्वा बहुच्च स्खलितं खिलं च ।
पुस्तं वराहस्य कृतेः स्वबुद्ध्या
संशोध्य चक्रेऽच तदीयटीका ॥

वरपुलिशरोमकसूर्यधातृवसिष्ठकृतखचरक्रिया-
मवगन्तुमस्ति मतिः सदा तव चेदिमाममलां धिया ।
शृणु विच्च विच्चवराहकृतकरणप्रकाशकरीं हि या
रचिता सुधाकरशर्म्मणाऽच कृपालुजेन सुधीप्रिया ॥

इति श्रीकृपालुदत्तसूनुना श्रीसुधाकरद्विवेदिना कृता पञ्चसिद्धान्तिकाप्रकाशिका समाप्ता ।



CHAPTER I.

Introductory.

1. Having at the outset done devout reverence to the various most excellent Munis among whom Sûrya and Vasishṭha are foremost, and to my father and teacher by whom I was instructed in this Sâstra,

2. I shall endeavour to state in its entirety, according to the opinions of earlier teachers, that correction of the planetary motions (bîja) which is most excellent, easy, clear and a wonderful mystery.

The term bîja signifies any correction applied to astronomical elements which aims at bringing about an agreement between the celestial phenomena such as calculated and such as actually observed. Varâha Mihira seems anxious to show that the bîja applied by him is not his own invention but bases on the authority of former teachers.

3. There are the following Siddhântas: The Pauliśa, the Romaka, the Vâsishṭha, the Saura and the Paitâmaha. Out of these five the first two have been explained by Lâṭadeva.

4. The Siddhânta made by Pauliśa is accurate, near to it stands the Siddhânta proclaimed by Romaka; more accurate is the Sâvitra (Saura); the two remaining ones are far from the truth.

5. That subject which is the greatest mystery, which perplexes the minds of the writers of astronomical works, viz., the eclipses of the sun I am going to explain in this work, dismissing all jealousy.

6. Moreover, there are contained in this work the (rules for the calculation of the) direction, the duration, the period of total obscuration,

the hypothenuse, the time of the measures (*i. e.*, beginning, middle, etc., of eclipses); the eclipses or (eventual) non-eclipses of the moon; the conjunctions and obscurations of the stars and planets; the means of finding the difference in longitude;

7. The prime vertical; the rising of the moon; the construction of astronomical instruments; the shadow of the gnomon; other useful matters; the sine of terrestrial latitude; the sine of colatitude; the declination and other topics.

8. Deduct the Śaka-year 427 (*i. e.*, deduct 427 from the number of that Śaka-year for which the ahargaṇa is wanted), at the beginning of the light half of Chaitra, when the sun has half set in Yavanapura, at the beginning of Monday.

9. Turn (the number of solar years remaining after the deduction of 427) into (solar) months, add the months (*i. e.*, the elapsed lunar months of the current year), set the result down in two places; multiply it (in one place) by seven and divide by 228; add the resulting adhimâsas (to the number of solar months obtained above); multiply the sum by thirty; add the tithis (*i. e.*, the elapsed tithis of the current month); set the result down in two places.

10. Multiply it (in one place) by eleven, add 514 and divide by 703; deduct the quotient (from the number of tithis found above). The final result is the (sâvana) ahargaṇa, according to the Romaka Siddhânta. So it is also according to the Pauliśa which is not much older (?)

The three preceding stanzas contain a concisely stated rule for the calculation of the sâvana ahargaṇa (*i. e.*, the number of civil days which have elapsed from a certain epoch up to a given date), according to the Romaka Siddhânta. The general principles of the calculation are those followed in all Indian astronomical books and therefore do not stand in need of elucidation. The special features of the calculation according to the Romaka are as follows. The proportion by means of which the number of the intercalary months of the given sum of years is calculated is $\frac{7}{228}$, *i. e.*, seven months have to be added for each period of 228. This proportion results from the principles —stated in stanza 15—on which the luni-solar yuga of the Romaka Siddhânta is constructed. Nineteen solar years contain 235 lunar synodical months; in order to obtain the synodical months of a period of 228 Indian solar

months (=19 years) we therefore have to add seven to 228. For the purpose of converting the lunar months into sâvana days the Romaka Siddhânta employs the proportion $\frac{11}{703}$; 703 lunar days contain 11 kshayâhas *i. e.*, omitted lunar days. Since, as we see from stanza 15, the yuga of the Romaka comprises altogether 1057500 lunar days out of which 16547 are kshayâhas, the numerator of the above fraction would, strictly speaking, have to be increased by $\frac{41}{1057500}$; but for simplicity's sake this rather insignificant fraction is neglected. About the additional quantity 514 (as well as other similar quantities involved in the calculations of the Romaka Siddhânta) see the introduction.—The beginning of the day is reckoned—not, in the usual Indian fashion, either from midnight or sunrise, but from sunset; and not from the meridian of Laṅkâ (or Ujjayinî) but from that of Yavanapura, *i. e.*, Alexandria. The epoch finally from which the calculations start is the first of Chaitra 427 Śaka elapsed, *i. e.*, 505 A. D.

11. 12. 13. Three stanzas apparently containing a rule for calculating the ahargaṇa according to the Pauliśa Siddhânta. The details are obscure. Compare the Introduction.

14. According to the Saura (Siddhânta) there are in 180000 years 66389 intercalary months and 1045095 omitted lunar days.

15. The luni-solar yuga of the Romaka comprises 2850 years; (in these) there are 1050 adhimâsas and 16547 omitted lunar days.

